
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

॥ अथ गृह्यसूत्र गदाधरभाष्य आरंभ ॥ पत्रसंख्या १५३

श्रीगणेशाय नमः॥ ॐ नमश्चंडिकायै नमः॥ आविर्भूतश्चतुर्दोर्यः कपिभिः परिवारितः॥ हत
वान् राक्षसानीकं रामं दाशरथिं भजे॥१॥ स्वाभिप्रायेण हि मया न किंचिदिह लिख्यते॥ किंतु वाच
निकं सर्वमतो ग्राह्यं च निर्भयैः॥२॥ अथातोधिकार इत्यादिना श्रौतानि कर्माण्युक्तानि तदनंत
रं स्मार्तानि विधीयंते॥ तत्रैतत्प्रथमं सूत्रं॥ अथातो गृह्यस्थालीपाकानां कर्मेत्युच्यत इति सूत्रशे
षः॥ श्रौतानंतर्यप्रज्ञापनार्थोयमथशब्दः॥ आनंतर्यप्रज्ञप्तिप्रयोजनं तु अथातोधिकार इत्या
दि यत्साधारणं तस्य प्रवृत्त्यर्थं। श्रौतानामुपनिबंधनं पूर्वमिति प्रोक्ष्येत्य गृह्यानुपतिष्ठते पूर्व
वदिरिति सूत्रप्रवृत्त्याज्ञापयते। अत इति हेतुः॥ यतः श्रौतान्युक्तानि स्मार्तान्येवावशिष्यंते तेन
स्मा...न्युच्यंते॥ ननु पूर्वं गर्भाधानादीनामनुष्ठानात्पूर्वमनुष्ठानक्रमेण स्मार्तान्येव
वक्तव्यानि इति चेत्। नैवं। श्रौते श्रुतिः प्रत्यक्षाः श्रुतयः स्मार्ते तु च पुनः कर्तृसामान्याद
नुमेयाः श्रुतयः। स्मार्तानामपि हि वेदमूलत्वमुक्तं भट्टैः॥ तस्मात्प्रत्यक्षश्रुतित्वाच्छ्रौताना

॥१॥ ॥१॥

मेव पूर्वमभिधानं॥ स्मरणादेव स्मृतीनां प्रामाण्यमिति कर्कोपाध्यायैरुपन्यस्तं॥ गृह्यशालाग्निः॥
तत्र ये स्थालीपाकाः ते गृह्यस्थालीपाकाः तेषां गृह्यस्थालीपाकानां कर्म क्रियते। स्थालीपाकशब्द आ
ज्यपुरोडाशाद्युपलक्षणार्थः। कथं ज्ञायते येन स्थालीपाकमुपक्रम्याज्यमुपसंहरति निरूप्याज्य
मित्यादि। एवमाज्यग्रहणमपि चर्वाद्युपलक्षणार्थं। यतः सर्वसाधारणमेवेदं कर्म। न ह्यस्य कर्म
ण[illegible]ःकुत्रचिदृते। कस्यांचिद्विकृतावतिदेशोस्ति। यत्प्रधानविधिरंगविध्यन्वितः पठ्य
ते सा प्रकृतिः। यथा दर्शपौर्णमासौ प्रधानविधिरंगविधिरहितः पठ्यते सा विकृतिः। यथा सौ
र्यं नैंदर्शपूर्णमासविधौ प्रमातृद्विधेरिवरतः कर्मविधेः कस्मिंश्चित्प्रधानविधौ शेषभावोस्ति॥
यतः सर्वाण्येव कर्माणि प्रकृतस्य धर्मविधानं। सर्वसाधारणं कर्मेति। परिसमूह्योपलिप्योल्लि
ख्या[illegible]ध्युक्ष्याग्निमुपसमाधाय दर्भैः परिस्तीर्य गोमयेनोपलिप्य वज्रेणोल्लि
ख्यानामिकांगुष्ठेनोद्धृत्योदकेनाभ्युक्ष्य तस्मिन्नग्निं स्थापयेत्। त्रिरुल्लेखनं त्रिरुद्धरणमिति

ये २ त्रे ९ च४

हरिहरस्तु परिसमूहनादि पंचापि त्रिस्त्रिरित्याह। कर्कोपाध्यायैरपि विपर्यस्यापि त्र्युक्षणसकृदुक्षि
णाचेत्येतत्तत्र व्याख्यानावसरे यदभ्यु[?]क्षणरूपं दैवे स्मर्यते तत्त्रिस्त्रिः सकृत्कर्तव्यं। यथा परिसमूहो
पलिप्योल्लिखनमिति लेखनेनैवावदर्शितं। दैवे परिसमूहनादि त्रिस्त्रिः पित्र्ये सकृत्सकृदिति।
एते पंच भूसंस्कारा इति भर्तृयज्ञभाष्ये। आन्यत्र्या इति कर्कोपाध्यायैः तेन यत्र यत्राग्नेः स्थापनं
तत्र तत्रैवैते कर्तव्याः। अतः श्रौताग्निस्थापनेऽपि कार्याः। न चैषां स्थालीपाकविधावंतर्भावः। ए
न एव एव विधिर्यत्र क्व होम इत्यग्निहितेऽपि पुनरभिधीयते। उद्धृतावोक्षितेऽग्निमुपसमाधेयेति
ति। न तन्नैमित्तिकप्रवृत्तिस्तत्रैषां। अग्निसाध्यानि स्मार्तानि सर्वाण्यावसथ्येऽग्नौ कार्याणि। तथा च स्मृ
तिः। कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाहृते वापि श्रौतं वैतानिकाग्निषु इति। त
स्मिन्नग्न्याधानी स्याद्वस्तं च स्मरणाच्च। गृहाय हितं गार्ह्य[?] गृहे रावश्यं दंपत्योर्वर्तते। तस्मिन्नि
त्यावसथ्ये। अतश्च यत्किंचिद्दंपत्योर्हितं कर्म शांतिकपौष्टिकव्रतं गृहोमादिकं स्मार्तं तत्स
र्वमावसथ्येऽग्नौ भवतीति। अत एवाह कात्यायनः। न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिं।

॥२॥

स्वगर्भसत्क्रियार्थांश्च यावन्नासौ प्रजायते। अग्निस्कन्नामेध्येयादौ होमे सर्वत्र लौकिकः। न हि पि
त्रा समानीतः पुत्रस्य भवति क्वचित्। अतश्च सीमंतोन्नयनमपि स्मार्ताग्नावेव कार्यमिति देवभाष्ये
परिभाषायां। स्फ्येनोल्लेखनमिति गर्गहरिहरौ। काष्ठेन कुशमूलेन वेति केचित्। अत्रेदं विचार्यते
किमावसथ्याधानादिषु वक्ष्यमाणेषु सर्वकर्मसु अध्वर्योः कर्तृत्वमुत यजमानस्येति। अध्वर्युः
कर्मसु वेदयोगात्। इति परिभाषणात्। पूर्णपात्रं दक्षिणा वरो वेति दक्षिणाम्नानादध्वर्योः
कर्तृत्वमिति चेत्। उच्यते। न स्मार्तेषु कर्मसु अध्वर्योः कर्तृत्वं। वेदयोगाभावात्। समाख्या
हि अध्वर्योः कर्मसु योगः। समाख्या हि वेदयोगात्। न च स्मार्ते वेदयोगोऽस्ति। न हि ज्ञायते अ
मुकवेदोक्तं स्मार्तमिति। तथा च श्रुतिः। सहोवाच यद्दर्शे भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गा
र्हपत्ये जुहु[?] [?] यदि [?] यजुष्टो भुव इति चतुर्गृहीतमाज्यं गृहीत्वाग्नीध्रीये जुहुयात्
न्वाहार्यपचने वा हविर्यज्ञे यदि सामतः स्वरिति चतुर्गृहीतमाज्यं गृहीत्वाहवनीये जुहुयात्

ग्र१

युविज्ञातमसत्स्वग्न्यनुद्धृतेष्वाहवनीये जुहवच्चेति। अविज्ञातं स्मार्तयज्ञमज्ञायते किमार्ग्वेदिकं किं याजुर्वैदिकं किंवा सामवेदिकमिति। नापि दक्षिणान्यथानुपपत्त्यान्यस्य कर्तृत्वं। अस्ति ह्य त्राप्योपि ब्र[illegible] ह्माख्यारुता[illegible]वत्ता तावेस्यक्त्वेन कर्त्ततदर्थः परिक्रयोयमिति क्षीणा यपि तिः तस्मात्स्वस्यैव कर्तृत्वं। दक्षिणतो ब्रह्मासनमास्तीर्य। स्थापितस्याग्नेर्दक्षिणस्यां दिशि ब्रह्म णः उपवेशनार्थं दर्भानभिधाय ब्रह्मोपवेशनं कुर्यात्। ननु दक्षिणतो ब्रह्मयजमानयोरास नमिति परिभाषतो दक्षिणत आसनं प्राप्तं किमर्थं पुनर्दक्षिणग्रहणं। सत्यं। पुनर्दक्षिण ग्रहणं यजमानस्य तत्रासनं माभूदित्येतदर्थमिति मदोषः। एवं च यजमानासनं च नाभावेत्रा (3) (सर्वे) ग्नेरुत्तरतः स्यात्। उत्तरत उपचार इति परिभाषणात्। तत्र पुनर्वचनं यथा। पश्चादग्ने र्लौकिकं चाद्दक्षिणपादेन प्रवस्योपविशतीति तत्र तत्रैवोपवेशनं। यदा। दर्शपौर्ण मासविषया परिभाषेयं वेदिस्थेति [illegible] तस्माद्दक्षिणं वेद्यंतमधिस्पृश्य वासीतेति श्रौतो

ग्रा१

चोक्तत्वात्। तेनात्रौपदिवेद्यभावाद्दक्षिणग्रहणमपूर्वविधानार्थं॥ अतो यजमानोपवेशनमु त्तरतस्तव। अत्रौपस्तरणमात्रोपदेशाच्चतुर्थीकर्मणि दक्षिणतो ब्रह्माणमुपवेश्य सुपवेशनं (चा२) विधानाच्च न ब्रह्मोपवेशनं। मेवं। अदृष्टार्थप्रसंगात्। न ह्यदृष्टार्थं कश्चिदासनं प्रकल्पनं कु र्यात्। ब्रह्मासनव्यपदेशानुपपत्तेश्च। तस्माद्ब्रह्मोपवेशनार्थमेवास्तीर्णं॥ पश्च चतुर्थीकर्मण्यु (स५) पवेशनमुक्तं तदुपात्रस्थापनार्थंरं विधानार्थं तस्माद्ब्रह्मोपवेशनं भवत्येव। यदा ब्रह्मा न भ (दृ१) वति तदा कौशः कार्यः इति हरिहरः। अत्र लं च छंदोगपरिशिष्टे। प्रणीय। प्रणयनं चापां सर्वार्थप्र [illegible] परिस्तरणं क देशांतरे दृष्टं तदत्रापि कार्यं। परिस्तीर्य। अग्नेर्दर्भैः प्रदक्षिणं (णामा२) त्। अर्थवदासाद्य। अर्थः प्रयोजनं। अग्नेरुत्तरतः पश्चाद्वा द्वंद्वं प्रयोजनवंतां पात्राणां सादनं कार्यं क्रमेण मुख्यक्रमानुग्रहात्। पश्चाच्चेत् प्राक्संस्थानामुद[illegible]णां प्रागग्राणामासा दनं। उत्तरतः [illegible] उदक्संस्थानां प्रागग्राणां वा सादनं। कारिकायां। पश्चादुत्तरतो वा स्यात् (म) पात्रासाद[illegible]नोग्नितः। उत्तरे [illegible] चेदुदक्संस्थं प्राक्संस्थं पश्चिमे भवेत्। एतच्च विपुलास्थान

मुद्गगाणां।

१ प्राचं प्राचमुदगग्रं समीपतः। तत्तथा सद्वये त्पात्रयथार्थं विनियुक्तमतो

संभवेत्। असंभवे तु कात्यायनेनोक्तं प्राचीं प्राचमुदगग्रं समीपतः इति देवयाज्ञिकाः। प-
वित्रे कृत्वा। कौशे समे अप्रक्षीणाग्रे प्रादेशमात्रे अनंतर्गर्भे कुशौ छिंद्यादि सर्वधः। प्रोक्षणीसं-
स्कारः। प्रादेशमात्र वारणपात्रे प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय सव्यहस्तेन साङ्गुष्ठं कृत्वा
दक्षिणेनोर्द्ध्वनयनं कृत्वा प्रणीतोदकेन तत्प्रोक्षणं कुर्यात्। ततस्तस्मिन् पवित्रे नि धानं। अर्घ्य
व प्रोक्ष्य। तज्जलेन यथासादितानां पात्राणां प्रत्येकं प्रोक्षणं। निरुप्यात्तं। औपयिकासादिता
ज्यस्य स्थाल्यां प्रक्षेपः। चरुश्चैव तंडुलानां चरुस्थाल्यामावापः। अधिश्रित्य। तदाज्यमग्नौ स्था-
पयेत्। चरुश्चेदत्रावसरे औदुत्तरतो ग्नावधिश्रयणं। पर्यग्निकुर्यात्। अग्नेरुल्मुकं गृही-
त्वा आज्यस्य परितो भ्रामयेत्। चरुश्चेत्तमपि पर्यग्निकुर्यात्। उपलक्षणार्थं त्वादाज्यस्य।
स्रुचं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात्। अग्नौ स्रुवं तापयित्वा दर्भैः संमृज्य प्र-
णीतोदकेन अभ्युक्ष्य पुनस्तापयित्वा निदध्यात्। स्रुवस्यायं संस्कारो होमार्थः। एवं
च दृष्टार्थता तत्संस्कारस्य। अतः संस्कारविस्मरणे प्रायश्चित्तपूर्वकं प्राग्वत्स होमः कार्यः।

ग१

न५

दत्र६ ज्या

४

२ ततश्चरुमादायास्य पश्चिमतो नीत्वा आज्यादुत्तरतो निधानं। एवमेव सर्वं हविषां २

या

गं१

उद्धृत्य प्रायश्चित्तमात्रं। प्रोक्षणमुदकेनाभ्युक्ष्य इति गर्गः। आज्यमुद्वास्योत्पूयावेक्ष्य। अग्नेः स-
काशादाज्यमुत्तरत उद्वास्य पवित्राभ्यामुत्पूय तदाज्यमवलोक्य। चरुश्चेदाज्योद्वासनोत्तरं
तस्योद्वासनं। तच्चैवं। अग्नेः सकाशादाज्यं गृहीत्वा चरोः पूर्वेण नीत्वाग्नेरुत्तरतो निधानं हवि-
षां चैव पूर्ववन्नि सूक्तेः। प्रोक्षणीश्च पूर्ववत्। पूर्ववदिति पवित्राभ्यां प्रोक्षणीरुत्पूय तास्वेव प-
वित्रनिधानं। चशब्दादाज्यमपि पूर्ववदेव। अतः पवित्राभ्यां स्यात्। प्रोक्षणीसंस्कारोयं पपु-
क्षणार्थः। उपयमनान्कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयात्। उपयमनान्कुशानुग-
हीत्वा उपयमनानिति स्वः समिधो अग्नावभ्याधाय प्रक्षिप्य प्रोक्षणमुदकेनाग्निं प्रदक्षि-
णं परिषिंच्य स्रुवेणावक्ष्यमाणं होमं कुर्यात्। तिष्ठन्समिधः सर्वत्रेत्युक्तेरत्र तिष्ठता समिदा-
धानं समिल्लक्षणं च स्मृत्यर्थसारे। पलाशखदिराश्वत्थशम्युदुंबरजा समित्। अपामार्गा-
र्कदूर्वाश्च कुशाश्चेत्यपरे विदुः। सहचाः समिधः कार्या ऋजुश्लक्ष्णाः समास्त्वचा। शस्त्रा
दशांगुलास्तास्तद्वादशांगुलिकाः स्रुवा। आर्द्राः पक्वाः समच्छेदास्तर्जन्यंगुलिवर्तुलाः

यथा

वा६

एकसाध्येष्व बर्हिःषु न स्यात्परिसमूहनं। नोदगासादनं चैव गृह्ये प्रतिमाहिते स्मात् इति छंदोगपरिशिष्टे॥

अपाठिताश्चादिशाखाः क्रिमिदोषविवर्जिताः॥ ईदृशा होमपेय्यास्युः प्राप्नोति विपुलां श्रियं। मि
यदा। समित्याचितं वेदस्य त्रयः प्रादेशसंमिताः॥ इध्मस्तु द्विगुणा कार्यः त्रिगुणाः परिधिः स्मृ
ताः॥ एष एव विधिर्यत्र क्वचिद्धोमः॥ यत्र क्वचिद्धोमः शांतिपौष्टिकादिष्वपि एष एव विधिः स्यात्।
एकारो मंत्रप्रतिषेधार्थः। गृह्याग्निव्यतिरेकेणापि यथायं विधिः स्यादित्येवमर्थः॥ क्वचिछब्दः।
यथा दावाग्निमुपसमाधाय घृतोक्तानि कुशेन्ध्नानि जुहुयादित्यादौ। इति श्री अग्निचित्सम्रा
ट्स्थपति श्री महायाज्ञिक वामनात्मज दीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकांडे प्र
थमकंडिका॥१॥ आवसथ्याधानं दारकाले। आवसथ्यं तत्र स्थाग्निरावसथ्य इत्युच्यते।
तस्याधानं स्थापनं आत्मसात्करणं। आत्मनिष्ठफलसाधनकर्मानुष्ठानसंपादकसंस्कार
विशिष्टत्वेन संपादनमिति यावत्। तद्दारकाले भवति दारकालशब्देन [illegible] पाणिग्रहणं क्रि
या उच्यते। चतुर्थ्युत्तरकालं इति संप्रदायः। पित्रा प्रत्तामादाय निष्क्रामतीत्येष दारकाल इति
भर्तृयज्ञभाष्ये। दाया द्यकाल एकेषां एकेषामाचार्याणां मते दायाद्यकाले आधानं भ
गवो

वति। पैतृकद्रव्यस्य भ्रातृभिः सह ज्येष्ठस्य विभागकालो दायाद्यकालः तस्मिन्काले स्वे
न द्रव्येण कर्मानुष्ठानसमर्थो भवति। साधारणद्रव्यस्य परित्यागासामर्थ्यादनधिकार
ए व। अतो व्यवस्था। भ्रातृमतो दायाद्यकाले। अभ्रातृकस्य दारकाले। विभक्तस्यापि वि
विवाहकालेपि आधानेधिकार इति मदनपारिजाते। आश्वलायनादीनां वैवाहिकोग्निरे
वौपासनाग्निर्दृष्टः। अत्रत्यं सोयन गृह्णीयात्। अग्निसमावर्तमानो यत्रौपासं समिधमभ्या
दध्यात्तमग्निमिंधीत वैवाह्यं वा दायाद्यकाल एके प्रेते वा गृहपतौ स्वयं ज्यायान्वेशाख्याम
मावास्यायामन्यस्यां वा कामतोन एकेत्रैं इति। अत्रच्छंदोगगृह्ये विशेषः। भूर्भुवः स्वरि
त्यग्निमुखमग्निं प्रणयंति प्रेते वा गृहपतौ। परमेष्ठिकरणं तथा तिथिनक्षत्रसमवाये दर्शे वा
पौर्णमास्ये वाग्निसमाधानं कुर्वीतेति। अत्रकारिकायां विशेषः। अपि वैवाहिको येन न गृहीतः
प्रमादतः। पितर्युपरते तेन गृहीतव्यः प्रयत्नतः कृतदारो न तिष्ठेत क्षणमप्यग्निना विनेति
ष्ठन्भवेद्द्विजो व्रात्यस्तथा च पतितो भवेत्। पितृपाकोपजीवी स्याद्भ्रातृपाकोपजीवकः॥ ज्ञान

ध्ययनं निष्ठीवा न दुरात्मा नाग्निना विना। यथा संध्या यथा स्नानं वेदस्याध्ययनं यथा॥ तथैवोपा
सनं प्रोक्तं न स्थितिर्न द्वियोगतः। योऽग्निं स्मार्तं च नाद्रियते कर्म स्नानजपादिकं॥ होमान्समाचरेद्विप्रो न
स पुण्येन युज्यते। यो दद्यात्कांचनं मेरुं पृथिवीं च ससागरां॥ तत्सायं प्रातर्होमस्य तुल्यं भवति वा न वा।
योऽग्निहीनो विवाहाग्निं गृहस्थ इति मन्यते। अन्नं तस्य न भोक्तव्यं वृथापाको हि सः स्मृतः॥ वृथा
पाकस्य भुंजानः प्रायश्चित्तं समाचरेत्। प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुध्यतीति। तथा। काल
दये पिचे येन नाधानं तु कृतं पुरा॥ स वृत्ताऽन्यतमं कृच्छ्रमग्निम ‥ ध्याहरेत्ततः॥ एतदाधा
नं गृहपतौ मृते एकादशाहे वा कार्यं। तदुक्तं रेणुकादीक्षिते॥ एतद्गृहपतौ प्रेते कुर्यादेका
दशाहनि। प्रागेवैकादशश्राद्धाद्वृद्धिश्राद्धविवर्जितं। एवं ज्येष्ठः समं दद्यात्कनीयांश्च विव
र्जयेत्। एकादशाहिकं कुर्वीत द्वादशे वा विचक्षणाः॥ कालातिक्रमे तु प्रायश्चित्तमुक्तं। यावं
तः स्युरन्यतीतानि निरग्नेर्विप्रजन्मनः। तावंति कृच्छ्राणि चरेद्धोमं दद्याद्यथाविधि॥ द्वा
अधिकारे न कुर्वन्त मलेवास्तंगते गुरौ॥ तथा हवज्रो॥ आधानं पुनराधानं न कुर्यात्सिं
हगे रवौ गुरौ

तदा रोगगृहे ज्येष्ठो यो नादध्यादुपासनं। चांद्रायणं चरेद्वर्षं प्रतिमासमथोपि वेति। कालप्रसंगा
न्मुहूर्तविचारोऽप्यत्र क्रियते। तत्र कारिकायां। माघादिपंचमासेषु श्रावणे चाश्विने तथा॥ कुर्या
न्मृगोत्तमांगे वाप्याधानं शुक्लपक्षतः॥ मृगोत्तमां गोमृगशीर्षः॥ हस्तद्वये विशाखास्वाति कादि
मृगोत्तमांगे वाप्याधानं शुक्लपक्षतः। भौमार्कि वर्जितवारे नाधिमासे क्षयेपे तथा। चं
द्रयेतथा॥ पुनर्वसुद्वये तद्वत् रेवती श्रुतरासु च। भौमार्किवर्जितवारे नाधिमासे क्षयेपे तथा। चं
द्रे नु कूलेपर्वहि रिक्ता विष्टि विवर्जयेत्। चतुर्थी नवमी चतुर्दश्यो रिक्ताः॥ सर्वे ध्रुतिश्च व्यतिपा
तनामा स वैध्यनिष्टः परिघस्य चार्द्धं। विष्कंभे घटिकांतिस्रो नव व्याघातवज्रयोः॥ गंडातिगं
डयोः षट् च शूले पंचन शोभनाः॥ महेश्वरः। चूडाकर्मन्नप्राशिबेक। निर्लेपोऽन्याधान पाणि
ग्रहे देवस्थापन मौंजिबंधन विधीन्कुर्यान्न याम्यायने। देवेज्यास्फुजितो स्तयास्तमितयो
र्बाल्ये च वार्द्धेतयोः केतावभ्युदिते तथा ग्रहणतो यावत्तिथिः सप्तमीदिवे। ज्योगुरुः। भास्फु
जितः शुक्रः॥ केतुनिर्घातभूकंपविद्युत्तानितदर्शने। आधानं हि न कर्तव्यं सुधिया शुभमि
च्छता। पश्चिमायां दिशि सितो बालः स्याद्दशवासरान्। वृद्धः पंचदिनान्येवं प्राग्दिने पक्षमेव च।

गृहारंभः

४ २

शि घ्रौ स्त्रीवसितावुभयत्राप्युदीरितौ॥ अन्यैः पंचदशाहानि दशान्यैः सप्तचापरैः॥ उपरागनिवृ
त्तौ च यावत्स्याद्दिनसप्तकं। अगम्या[ ]धेयं विवाहादि मंगलं न समाचरेत्॥ रत्नमालायां। शौरौ शी
विलग्ने बुधरेघरे वा तदंशके वाप्यथवा शशांके। आधानकाले द्विजपुंगवानां जातोपि निर्वाण
मुपैति वन्हिः॥ विलग्ने लग्नपर्यायः॥ अं बुधरेकर्क्षे मीने मकरे च राशिद्वि चा। मेषकर्कटतुलामक
राश्चरलग्नानि घटे कुंभलग्ने। तदंशा चरांशेषु कुंभांशे चा। शशांके चंद्रे चरराशिस्थिते कुं
भराशिस्थिते चेत्यर्थः॥ त्रिकोणकेंद्रोपचयेषु सूर्ये बृहस्पतौ शीतकरे कुजे चा। शेषग्रहे षू
पचया। स्थिते षु मध्वं[ ]साद नमामनंति। त्रिकोणं नवपंचमं लग्नसप्तमदशमचतुर्थं
च केंद्रं। तृतीयषष्ठदशमैकादश मुपचयः। कुजो मंगलः॥ चंद्रे पत्नीमसूर्ये तिः क्षिप्रं व सं
धायकः क्षमासुचतेच। भानोः सूनौ देवपत्न्यैर वो वारो गोर्व्यै स्त्री दुःखितः स्यादिनेंद्रः। नो कु
र्याद्दुत भुक्प्र परिग्रह मिन क्षमापुत्रजीवें दुभि र्नीचस्थै विजिते रिपोर्भवनगो [ ] रस्तं
गतै र्वादि तः॥ चापस्थे तनुगे गुरौ क्रिय गते सप्तांबरस्थे कुजे शीतांशो त्रिषडायगो दिन

Margin: तत्संशस्थिते — पुष् — ६ — ना — गोमूत्रमे — न्त्या

स्पा

करे वास्यान्नदादीक्षितः॥ पापग्रहेषु धनगेषु धनेन हीनः सौम्यग्रहेषु धनवानुडुपेन्नदत्तात्
लग्नस्थिते च स बुधार्कजभार्गवेंद्रावुत्सादितोग्निरचिरात्खलु शमेति। चापस्थे धनुराशिस्थि
ते। तनुगे लग्नस्थे क्रियगते मेषराशिस्थिते। अंबरस्थे दशमस्थे। आयगे एकादशस्थे। कन्यायां मि
थुने च मंगलः॥ शतगृहस्थः। कन्यामिथुनतुलावृषेषु बृहस्पतिः। शतगृहस्थः॥ रविमंगलशनि
श्च पापग्रहाः क्षीणचंद्रश्च। धने द्वितीयस्थेषु। अथाग्न्याधिकारी निरूप्यते। ब्राह्मणाः क्षत्रिया वैश्याः
शूद्रे स्वानुलोमजाः॥ अधिकुर्वंति गार्ह्येषु सह[ ]भर्तृस्त्रियस्तथा। मासेर्द्धं स्त्रीप्रसूता स्यात्पु
त्रसू र्दिनविंशतेः। रजस्सूपरते स्नानदिना[ ]दूर्ध्वं रजस्वला॥ नाधिकारोस्ति सर्वेषां सूत
के मृतके षु च॥ तथैव पतितानां च तथा दोषा[ ]युजामपि॥ आन्याधानेधिकारोस्ति रथका
रस्य चोत्तरे। माहिष्येणाकरिण्यां तु रथकारः प्रजायते। वैश्यायां क्षत्रियाज्जातो माहिष्यो
मुनिभिः स्मृतः। जाता वैश्येन शूद्रायां करणी समुदीर्यते॥ वेदाध्ययनसंपं[ ]नाः प्रयोगेन
श्रुतेन चा। अधिकुर्वंति सर्वत्र यद्वार्थश्रवतां विना। यद्वाध्ययनवेदार्थविज्ञानरहितोपि

Margin: ना — पुष् — गेषु — द्वि

सन्। नाधिकारी क्रियाभ्रन्यो भर्तृयज्ञादिष्वासनात्। द्रविडस्त्वन्यथा प्राह सर्वभ्रन्येप्याधि
क्रियां॥ श्रद्धार्थांश्च भवेत्कृत्तं निंद्यं कृं सर्वसंमतं। भार्याः संतीह या वस्त्रस्ताभिः सर्वाभिरग्नितः
यज्ञासव र्ता घाऽन्येष्व भार्ययैव समन्विताः। यामि चाघती पापा रोगिणी द्वेषिणी च या। आधाने सा
परिस्याऽस्थान वास्याघ्या मतांतरात्। तुल्याधिका … भयोर्यज्ञपात्रे निरूपयेत्। अन्यतरस्त्वन्यतरा
भावे नाधिकारोस्ति कुत्रचित्। अथानधिकारिणः। आवश्यं विवाहं च प्रयोगे प्रथमे स्थितः। न
कुर्वन्नकेऽज्येष्ठे सोदरे चाप्रकुर्वति। … चल्लाव निःशाने विद्यमानेपि सोदरे नाधिकार
विधातोस्ति भिन्नोदर्येपि … र सौपं गंध मूकबधिर पतितोन्माद दूषणे। सन्यस्त छिन्नक
र्णदोयद्दोषं … दि दूषणेऽनके सोदरेऽज्येष्ठे कुर्यादेवेतरः क्रियां॥ ज्येष्ठे श्रद्धाविहीने च सत्या
धेयं तदाग्रया। पितृत्त्वसहेऽप्यनुज्ञातो नादधीत कदाचन। अपि पितरि चादध्यादाहिताग्निः सवे च
यदि। तथैव भ्रातरि ज्येष्ठे यत्ने … व विवाहयेत्। अनाहिताग्नौ पितरि यो[ऽ]…धानं करोति। हि॥
अरण्योरग्निमारोप्य तमाधायादधीत सः। उद्वाहं चाग्निसंयोगं कुरुते योग्रजे स्थिते॥

परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः। परिवित्तिः परिवेत्ता नरकं गच्छतो ध्रुवं। अपि चीर्णप्रा
यश्चित्तौ पादोनफलभागिनौ॥ पितृव्यपुत्रविमातृसुतः परनारीसुतोपि वा। दत्तकाद्यपरनारी
सुताः॥ विवाहे चाग्निसंयोगे न दोषः परिवेदने। देशांतरस्थक्लीबैकवृषणानसहोदरान्॥ वे
श्यानिष्ठांश्च पतितान् शूद्रतुल्यातिरोगिणः॥ जडमूकांधबधिरकुब्जवामनखंजकान्॥
अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च॥ धनवृद्धिप्रसक्तांश्च कामतोकारिणस्तथा॥ कु
टिलोन्मादरोगांश्च परिविंदन्न दुष्यति। गीतवादित्रनिरतान्नर्तकान्पारदारकान्॥ वा[illegible]कं
गारूढांश्चैव परिविंदन्न दूष्यति। योगशास्त्राभियुक्ते च द्विजे प्रव्रजिते तथा। नास्तिके चाग्नि
संयोगे न दोषः परिवेदने। पितापितामहो यस्य अग्रजो वाप्यनग्निमान्। इत्यातपोग्निसंयोगे
न दोषः परिवेदने। परिवादनवाक्येषु श्रूयते दोषसंयुतः। तेषामप्यधिकारोस्ति प्रायश्चि
त्तादनंतरं॥ पितापितामहो वापि नास्तिको वाप्यनाश्रमी॥ यस्य दोषोस्ति नैवेह तस्याधा
ने कदाचन। अग्रजे सति … मन्यते तु। प्रतिपर्व भवेत्तस्य ब्रह्महत्या न संशयः॥
नानयः परिविंदंति वैनेदानतपोसि च॥ न च श्राद्धं कनिष्ठस्य विरूपा या च कन्यका॥ ज्येष्ठो

भ्राता यदा तिष्ठेद् आधानं नैव चाश्रयेत्। अनुज्ञातस्तु कुर्वीत शंखस्य वचनं यथा॥ ज्येष्ठभ्रात्रा ह्यनुज्ञा-
तः कुर्यादग्निपरिग्रहं। अनुज्ञातोपि सन् पित्रा नादध्यान्मनुरब्रवीत्। धनवार्धुषिकं राजसेव-
कं कर्षकं तथा॥ प्रोषिते च प्रतीक्षेत वर्षत्रयमपि त्वरन्॥ प्रोषितश्चेत्त्रिवर्षं स्यात् तद्वा दूर्ध्वं समा-
चरेत्। आगते तु पुनस्तस्मिन् पादकृच्छ्रं प्रचरेत्। देशांतरस्थो नष्टो वा ज्ञायेता हितवा मिती। क-
नीयानधिकारी चेदादधीत विचारयन्। द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोगतः। न्यायः प्रती-
क्षितो भ्राता श्रूयमाणः पुनः पुनः। प्रोषितस्य यदा त्वेषो ज्ञायेत नाना हिनिष्टः(?) षड्वत्सरान् प्रतीक्षे-
त आदधीतानुज्ञस्तथा॥ पितरि प्रेत भार्ये वा देशांतरगतेपि सन्। अधिकारविघातो हि न पुत्र-
स्योपजायते। सोदराणां च सर्वेषां परिवेत्ता कथं भवेत्। दारैस्तु परिविद्यंते नाग्निहोत्रेण नै-
ज्यया(?)। अथ आहरणीयं योनिमाह। वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुर्मास्य पच-
नवत् सर्वमरणिप्रदानमेके पंचमहायज्ञा इति श्रुतेः। पशुभिः समृद्धस्य वैश्यस्य गृहादग्नि-
हुतोच्छिष्टं संस्कृतं वा आनीयाधानं कुर्यात्। एके अरणिप्रदानं। अरण्युपादानकमि-
च्छंति। अयमर्थः। पराभ्यो … पर्वोक्तावेव अरणी प्रदानं उपादानकरणं उत्पत्तिस्थाने यस्या

ग्नेः सो … रणिप्रदानमुक्तम … ग्निमादधीतेति मन्यंते। अतो विकल्पः। अथ सौरवायनगृह्ये। बहुपशु वि-
ट्कुलं वरीषं(?) बहुयाजि … नामन्यत मंतस्मादग्निमंधीते तच्छंदोगपरिशिष्टे। वैश्यकुलाद्वांवरी-
षाद्वा बहुयाजि … न एवा गारा ब्राह्मणस्य वा राजन्यस्य वा वैश्यस्य वा पि
षादग्निमाहृत्याभ्यादध्यादपि वा बहुयाजि … न एवागारात् ब्राह्मणस्य वा राजन्यस्य वा वैश्यस्य वा(?)
वा अन्यं मन्यापि तावाभ्यादध्यात् पुण्यस्त्वेवानर्द्धुको भवतीति यथाकामयेत तथा कुर्यात् सर्व एवास्य गृह्यो
ग्निर्भवतीति तथा गृह्यांतरे छंदोगभाष्ये। ब्राह्मणकुलात्तु ब्रह्मवर्चसकामोग्निमाहृत्यादधीत राज-
न्यादोजोवीर्यकामो वैश्यात्पशुकामो वरीषात्। धनधान्यकाम अरण्येय मुत्पुण्यको शाका
मइति। पुनराधाने अग्न्यनुगमने आधानेयायोनिर्गृहीता सैव भवति। तथा च छंदोगभा-
ष्ये ग्रामस्वांतरगृह्ये। एवं वानुगते ग्नेो योनिः पुनराधेये चेति। वैश्यगृह्यान्यभावे ग्रामस्वांतरो
कौंयो नौ न्याहरणमिति हरिहरः। अस्मत्तस्तत्रोपरि तु वैश्यगृहादग्न्याहरणं वारण्योरितियु-
क्तं। न तु वैश्याभावे गृह्यांतरोक्तापायेण्यहरणं। गृह्यांतरयोन्यपेक्षयापावरं विकल्पेनैव स्वगृ-
ह्योक्तानि ग्राह्येति न मो हरिहरमिश्रे भ्यः। यस्मिन्पक्षे वैश्यगृहादग्न्याहरणं तस्मिन्पक्षे या

ती५

वह्नीवं वैश्यस्याग्निर्योनित्यासः शांते नौ वैश्यकुलादाहृत्य सर्वप्रायश्चित्तं हुत्वानेन विधिना
यावज्जीवं वर्त्तयेदिति गर्गपद्धतौ। चातुःप्राश्यपचनवत्सर्वमिति। चातुःप्राश्यपचनं यस्मिन् कर्म
णि विद्यते त दिहापि सर्वं भवति। कुतः पंचमहायज्ञा इति श्रुतेः। पंचमहायज्ञानां श्रौतत्वेपाठ स्मार्त्ता
यनमतेऽयमाग्निरतस्तद्वदिहापि सर्वं भवतीति पूर्वपक्षः। सिद्धांतस्तु न तस्य त्वं। चातुःप्राश्यपचन
वतीतिकर्त्तव्यतोऽभवति प्रकारत्वा। उपदेशातिदेशयोरन्यतरेण धर्माणां प्रवृत्तिः। नाऽत्रोपदे
शो न चातिदेशः। तस्मान्नैव चातुःप्राश्यपचनवतीतिकर्त्तव्यता प्रवर्त्तते। ननु हि किमर्थमिदमु
क्तं आधानसामान्याच्छ्रौतानां पंचमहायज्ञानां साधनभूतत्वाच्छ्रौताधानधर्माः स्युरिति
बुद्धिः स्यात्तां निराकर्तुमनुक्तमपि प्रदोषः। ग्रंथांतरे चानयैव भंग्या स्याच्छ्रौताधानेतिकर्त्तव्यताउ
क्तास्ति। तान्निवर्त्तयितुमिहास्त्वेवकृता पूर्वः पक्षः कृतः। अरणीलक्षणं चोक्तं यज्ञपार्श्वस्य
संग्रहकारिकायां। अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः। तस्य या प्राङ्मुखी शाखा वोदी
ची चोर्ध्वगापि वा॥१॥ अरणीस्तन्मयीं कुर्यात्तन्मय्येवोत्तरारणिः। सारवद्दारवं चात्र मोवि

मु

ली च प्रशस्यते। संसक्तमूलो यः शम्या स शमीगर्भ उच्यते। अलाभे त्वशमीगर्भादाहरेदवि
लंबतः। चतुर्विंशांगुला दीर्घा विस्तारेण षडंगुला॥ चतुरंगुलमुत्सेधा अरणी याज्ञिकैः स्मृ
ता॥ मूलाद्दष्टांगुलं त्यक्त्वा अग्राच्च द्वादशांगुलं॥ अंतरं देवयोनिः स्यात्तत्र मथ्यो हुताशनः॥
मूर्द्धाक्षि कर्णवक्त्राणि कंधरा चापि पंचमी॥ अंगुष्ठमात्राण्येतानि ह्यंगुष्ठं वक्ष उच्यते॥ अं
गुष्ठमात्रं हृदयं त्र्यंगुष्ठमुदरं तथा॥ एकांगुष्ठा कटिर्ज्ञेया द्वौ वस्ती द्वौ च गुह्यकं। ऊरू जंघे च पादौ
च चतुस्त्र्येकैर्यथाक्रमं॥ अरण्यवयवा ह्येते याज्ञिकैः परिकीर्त्तिताः॥ यत्तद्गुह्यमिति प्रोक्तं देव
योनिः स उच्यते। तस्यां यो जायते वह्निः स कल्याणकृदुच्यते॥ प्रथमे मंथने ह्येष नियमो ने
तरेषु च॥ अष्टांगुलः प्रमंथः स्याच्चात्रं स्याद्द्वादशांगुलं॥ ओवीली द्वादशैव स्यादेतन्मंथनयं
त्रकं॥ गोवालैः शणसंमिश्रैस्त्रिवृद्वृत्तमनंशुकं। व्यामप्रमाणं नेत्रं स्यात्तेन मंथ्यो हुताशनः॥
चात्र बुध्ने प्रमंथाग्रं गाढं कृत्वा विचक्षणः॥ बहुदिने मंथनेन प्रथमं नान्येन त्रैवोक्तं॥ उत्त
रायाम मानादि ग्राह्यो मंथो धरारतो॥ व्याख्यातं केऽप्यदेवं तन्निर्मूलत्वादुपेक्ष्यते। मानप्र

११

कारो यज्ञपार्श्वे। शिरश्चक्षुः कर्णमास्यं प्रथमे रोप्रकीर्तितः। द्वितीये कंधरावक्षोन्ततीये तु उदरं स्मृतं॥ चतुर्थे चैव योनिः स्याद् उरू द्वंद्वं च पंचमे॥ षष्ठे जंघे तथा पादौ पंचमाचारणिरंगतः॥ यदि मंथे च्छिरस्याग्निं शिरोरोगैः प्रमीयते। यजमानस्तथा कंठे हंसे चैव विशेषतः। मंथेयोय जमानस्य पक्षहीनो भवेद्ध्रुवं। योमंथस्तु उदरे कर्त्तास्तु क्षुधया म्रियते तु सः। देवयोन्यां तु यो मंथे देवसिद्धिः प्रजायते। मंथे द्व ऊरुद्वये यस्य शत्रु संकर्मतस्य तत्। जंघायां यातुधाने भयः पादयोः स्यात् पिशाचके॥ प्रथमे मंथने ज्ञेयं द्वितीया दोन शोधयेत्। अष्टांगुलः प्र मंथः स्याद् दीर्घो द्व्यंगुलविस्त्तारे तु तेषो द्व्यंगुलस्तस्य वैशान पर्व तु ऊर्ध्वगः॥ एवमष्टादशप्रोक्ताः प्रमं पादस्तु तदारणेः। पादोतस्या स्मृतं मूलं मग्रस्तु शिर उच्यते। अध्वर्युः प्राङ्मुखो मंथे स्त्यादि करणा हि सा॥ ॐ विलीयज्ञमानेनध्वत्वा गादं च मंथयेत्। मंथनीयाप्रथमं पत्नी यदा कश्चिद् दृढो द्विजः। मूलादष्टांगुलं सत्त्याज्य अग्राच्च द्वादशांगुलं॥ अंतरा देवयोनिः स्यात्तत्र मथ्यो हुताशनः। मूलाद् अंगुलमुत्सृज्य अग्रात् सार्द्धांगुलं तथा। यो निमध्ये पुनर्मानि क तो म थ्यो हुताशनः। नान्यत्र

११

ति
क्षे नमध्ये यान्न कुर्यायोनि संकरं। छिद्रिता स्फाटिता चैव सुशिराग्रंथि मस्तका॥ चतुर्विधारणी स्यात् स्यात् श्रेयस्कामैर्द्विजादिभिः॥ छिद्रिता हरते पुत्रान् स्फाटिता शोकमावहेत्। ग्रंथिमस्तहरे सत्त्ली सुषिरा पतिमारिणी। २॥ इति श्रौतस्मार्ताधाने ऽरणी लक्षणं॥ इतरे पुच संस्कारे षु रणी द्वादशांगुला॥ मूलात्त्रिभागात् जननी तदर्द्धे नोत्तरारणिः॥ वह्न्यजाता रणिः पक्षं कुमारा गुः प्रसिद्धये॥ निर्मार्थयं च विहितं पितासंस्थाप्य यत्नतः। जाते कुमारमध्ये या दाग्निं यथा विधिं स्वयं॥ आयुष्य होमान् जुहुयात्तस्मान्नग्नौ समाहितः। तत्रान्नप्राशने चोलं मौंजी बंधनमेव च॥ व्रतादेशश्च कर्त्तव्यास्तस्मिन्नो दानिकाः क्रियाः। कुर्याद्दैवाहिको होमो वन्हौ तस्मिन् समाहितः। शालाग्निकर्म तत्रैव कुर्यात्तत्किंच नैहिकं। निस होमं पंचयज्ञान् कुर्यात्तस्मिन्नाहितः। स्मार्त्तसंस्थापादिकं यच्च तत्सर्वं तत्राग्न्यतइति स्तातार णीबस्तस्य युगांतरे भवति नकलौ। प्रजार्थं तु द्विजाग्र्याणां प्रजारणि परिग्रह इति कलिवर्ज्जत्वात्। दानवाचौन्वारंभण नाम चरणाव्रत प्रमाणेषु यजमानं तु यत्र यत्रोपदिश्यते। तत्र तत्र बहु सर्वग्रंथिनि भिनु पात्सदेति

छेदांगपरिशिष्टं। ब्रह्म सर्वाणि मध्यपर्वाणि तन्मूलाग्रे च यो यत्रांगुष्ठनोदनात्तत्रांगुष्ठस्यांगु
लीनोदनाय मंगुलीनां॥ छेदो गानां सपरिशिष्टः कृतात्। अंगुष्ठेररणीमाने। वारिनंगुष्ठपार्श्वा
दंगुलैररिति। सूत्रोक्तपक्षस्तु यत्प्रमाणे नोर्ध्वबाहुः प्रपदोच्छ्रितेन समस्त्विं नवेति। पंचारत्निर्द्
शवितस्तिर्विंशतिश्चांगुलः पुरुष इति सत्वाच्चतु पुरुषस्य पंचमांशोररतिस्तु अ ष
तुर्विंशोगुलमिति शमवात्तेयी मिराधान प्रकरणेऽप्युक्तं। अथ पात्रलक्षणमुच्यते। तत्र यज्ञ
पार्श्वसंग्रहकारिकायां॥ खादिरोस्या व्रतिर्वज्रो रत्निमात्रः प्रशस्यते। आसनं ब्राह्मणः कार्यं वा
रणं वा विकंकतं। हस्तमात्रं चतुस्त्रिंशक मूलदंडसमन्वितं। द्विषष्ठांगुलसंख्याको मूलदंडो विकं
कतः। प्रस्तमात्रोदकग्राही प्रणीता च समो भवेत्। विकंकतं पाणिमात्रं प्रोक्षणी पात्रमुच्यते॥
हंसमुखं प्रसेकं च हस्तबिलं चतुरंगुलं॥ आज्यस्थाली च कर्तव्या तैजसद्रव्यसंभवा माहेयी
वा प्रकर्तव्या नित्यं सर्वाग्निकर्मसु। आज्यस्थाल्याः प्रमाणं तु यथाकामं तु कारयेत्। मृन्मयी
दुंबरी वापि चरुस्थाली प्रशस्यते॥ तीर्यगूर्ध्व समिन्मात्र दृढा नातिबृहन्मुखी कुलालचक्रघटि
ना

१२ १२

लं वंशरत्निमात्रं स्यादुपलाच दृषत्तथा। विस्तारो दृषदः प्रोक्तो द्वादशांगुलसंख्यया॥ ८
पालाशो जानुमात्रं स्यात् सपृथुबुध्नमुलूखलं॥ ८
तमासुरं मन्मयंस्मृतं। तदेव हस्तघटीकं स्यात् स्यादि खलु दैविकं॥ यज्ञवास्तु निमुष्टीच स्तंबे दर्भ
बटौ स्तथा॥ दर्भसंख्या न विहिता विष्टरास्तरणे ष्वच॥ अंगुष्ठपर्वरत्निश्चाररत्निमात्रः स्रुवो भवेत्।
पुष्कराद्धं भवेत्खातं पिंडकार्द्धं स्रुचस्तथा। पिंडकार्द्धं मुष्टिप्रभृति स्वर्चः। यावतानेन भोक्तु स्तु तलिः
प्र नैव लायते। तेवशार्थमतः कुर्यात् तत्पात्रमिति स्थितिः। यवैर्वैगव्रीहिभिः पूर्णे पूर्णंतत्पूर्णपात्रकं।
वरो भिर्भूषितं द्रव्यं सारभूतं नदुच्यते॥ अष्टमुष्टिर्भवेत् किंचित् किंचि दष्टौ च पुष्कलं। पुष्कलं
नि च चत्वारि पूर्णपात्रं तदुच्यते॥ इत्याधान पात्राणि॥ अन्यान्यप्यत्रैव लिख्यते। मूर्द्धंवरानि
मात्रं स्यात् [illegible] दर्विका वैणवं तु वा। अर्द्धखातं बहदकं मध्ये शस्त्रासमन्वितं॥ खादिरं मुहसे प्रोक्त
मरत्नी त्रय संमितं। प्रादेशमात्रं विज्ञेयं मेक्षणं च विकंकतं। वृत्तमंगुष्ठपर्वाग्रमवदानक्रिया
क्षमं। इद्दृशेव भवेद्दर्वी विशेषस्तम हं ब्रुवे। वारण्यरत्निमात्रा स्याच्चतुर्थांशाधिक पुष्करा॥
हस्तकाकारा च पृथु [illegible] ग्राऽजसे सर्पफणाकृतिः अकर्षफलकं हस्तमात्रं स्याद्धनुराकृतिः। अ
ग्रे सर्पफणाकारं खादिरं वा विकंकतं॥ कंकातानि त्रिदंतीनि वारणानि भवंति हि। वारण्यरत्नि

२ वापिकुर्यात्स्थैव यथा र्थेनः॥१३

मा त्रास्याद्भिं स्यात्संदशांगुले॥ द्वात्रिंशदंगुला राम्या वारणी समिधीयते॥ श्रेपणींन्यरिधीन्कुर्या द्बाहुमात्र नपुंष्करान्॥ श्रीपर्णो हस्तमात्रोच श्रपण्यो भ्रत मेव च॥ तच्छूलं यस्य कस्यापि यज्ञि यस्य तरो भवेत्॥ लौही वा मन्मयी वास्या सम्मुखा च यथार्थतः॥ लौही वा मृन्मयी वा त्राणि वारण न्यत्रयाणि प्रोक्तान्यसंभवे॥ वैकंकतानि कार्याणि सूत्रांतर मतादपि॥ आभावे मुख्य वृक्षस्य यज्ञि यस्य तरोरिह॥ यत्किंचि त्पात्रजातं तदिति भास्कर संमतिः अन्यस्य स्यारणी ग्राह्या नान्यस्याद्देव वदत तः॥ एवं सर्वेषु शास्त्रेषु दृष्टा सूत्रांतरे ष्वपि॥ अन्त्या धेयदेवताभ्यः स्थाली पाकं श्रपयि त्वाज्य भागा विष्टान्याहुती जुहोति तन्नोग्ने स त्वन्नो अग्ने इमं मेव रुण तत्वायामि येते शतं म याश्चा सत्तु दुत्तमं भवतन्न इत्स्वष्टौ॥ श्रोतस्याग्न्याधेय स्य देवताः अग्नि पवमानो ग्नि पावको ग्निः शुचिरिदिति श्रोतीति॥ आत्म स्थाली पाकं ओदनेक्त प्रकारेणा श्रपयित्वा आज्य भागो कुत्वा तन्नो अग्नेत्रर्षौ निसृत्पेनाहुतयो होतव्याः॥ अत्र च चरुव्रीहिणां भवति कामादि आनो न्यत्रो व्रीहियवयो रेकतरेण स्थाली पाकं श्रपयेत्॥ न पर्वचो दित त्वात् संदे

१३ घ

पि

न्य

१३

५ श्रा मादीआनौन्यनोपि व्रीहियवयोरेवान्यतरे स्थालीपाकं २ श्रपयवी रं

हो संभवादिनिवृत्तिरिति सीतायज्ञे वक्ष्यमाण न्यायात्॥ अयमर्थः स्रूचस्य कामादि छयायां अन्यत्र पक्षादिषु यागं कुर्वन् व्रीहियवयोरन्यतरं चरुं श्रपयेत्॥ नैवात्र संदेहो व्रीहि न्यवा न्वाहि पर्व चोदितत्वादुक्तत्वात्॥ याव स्यचरोर संभवादिनिवृत्तिः पूर्व चोदितस्य व्रीहि न्यवान्वे त्वस्य॥ अवस्त्राव वितांर्तरूष्म पके ईषद सिद्धे तंदुल पाके च रुशब्द प्रसिद्धेः॥ आग्रयणेष्टौ व्रीहिणां यवानां मग्रपा कस्येति सिध्यति॥ किमर्थं व्रीहिणां यवानामिति ग्रहणं उच्यते॥ वैश्वदेव श्च रु विहितः॥ सो पि यवे यथा स्यादिति यवानामित्युक्तं॥ व्रीहि ग्रहणं तु यवानामेव निषेधो मा भूदिति॥ अतः सर्वत्र व्री हीणामेव चरुं कार्यं इति गम्यते॥ श्रपयेदिति ग्रहणं॥ सिद्ध चरो रुपादान निवृत्यर्थं॥ आघारा वाज्य भागा विसर्जनेन प्राप्त त्वात् पुनराज्य भाग ग्रहणं न क्रियेत नहि तन्नो अग्ने नये ति द्विती यांशं क्येत॥ तथा च तन्नो अग्ने स हस्वा सेति तन्नो अग्न इति प्रथमा॥ स त्वन्नो अग्न इति द्वितीया॥ इमं मे वरुण इति तृतीया॥ तत्वायामीति चतुर्थी॥ ये ते शतमिति चैर्वं पंचमी॥ अयाश्चाग्न इति षष्ठी॥ उदुत्तममिति सप्तमी॥ भवतन्न इत्यष्टमी॥ पुरस्तादेव मुपरिष्टा स्थाली पाकस्याग्ना ५ अष्टा आहुतीनामयं सरायिचाना र्थे॥ अष्टावि ति ग्रहणं मंत्र प्रतीक संशय निराकरणार्थं॥ याघाष्टसंख्या ग्रहणं॥५

तरं ५

मस्ति तयोर्देवतासम्बन्धात्। किन्तु बहुत्वविशिष्टा नाम मंत्रदेवतास्तं।। २

धेयदेवताभ्यो हुत्वाज्यं जुहोति। अग्न्याधेयदेवता इत्यवाच्यो। अग्न्याधेयदेवताभ्यो हुत्वेतिव
क्ष्यमाणत्वात्।। याच्यं वाग्न्याधेये हि विकल्पेन द्वयोरपि देवतार्थ्यं यथास्यादि स्वदोषः। स्था
लीपाकस्येति सर्वत्रैव षष्ठी। पुरस्तात्स्थालीपाकस्य स्थालीपाकस्य पूर्वं मध्ये च होमः।
अग्न्याधेयदेवताभ्यो हुत्वाज्यमुपरिष्टादष्टर्चहोमः। स्विष्टकृते चायास्याग्नेर्वषट्कृतं यत्क
र्मणात्यरीरिचं देवा गातुविद इति। उपरितनांते अष्टर्चहोमांते स्थालीपाकस्याग्नये स्विष्टकृ
ते स्वाहेत्याहुतिं जुहोति। चशब्दादाज्येन अयास्यग्न इति मंत्रेणाहुतिं जुहुयात्। स्विष्ट
१४ कृद्धोमस्य प्राशनमनुग्रहणमयास्यग्न इति होमस्यावसरविधानार्थं। मंत्रस्यायमर्थः
हे गातुविदो यज्ञवेत्तारो देवाः अग्नेः संबंधीयद्वषट्कृतं हुतं। यत् येन कर्मणा यत्र १४
२३ न विधिना कृत्वा अहमत्यरीरिचं अधिकं कृतवानस्मि तेन कर्मणा प्रसन्ना भवतां प्र
सादात्तद्यागिति अनश्वमव्याहतमस्तु। बर्हिर्हुत्वा प्राश्नाति। परिस्तरणात् बर्हिर्हस्तेनैव
हुत्वा पात्रांतरस्थापितहोमशेषद्रव्यं भक्षयति। प्राशनस्य प्राप्तत्वात् बर्हिर्होमोत्तरविधा
ब

नार्थं ग्रहणं। शेषरक्षणं भक्षणं च श्रौतसूत्रे उक्तमस्ति। पाकयज्ञे सर्वत्रस्यास्य सर्वहोमे हुता
शेषं प्राशनमिति।। अस्यार्थः। पाकयज्ञे न च स्मार्ते होमा उच्यंते। तत्र होमार्थं यद्द्रव्यं गृहीतं
तस्य असर्वहोमः कर्तव्यः। स्रुवादिभिर्यद्गृहीतं तद्धुत्वा किंचित्परिशिष्य पात्रांतरे स्थापनमित्य
र्थः। सर्वहोमान् हुत्वा पात्रांतरस्थापितसर्वशेषाणां प्राशनं। बर्हिर्होमाश्चात्रैव वचनान्न्या
न्यकर्मसु बर्हिर्होमे प्रजापतिर्देवता। अनिरुक्तत्वात्। तथा च लिंगं। अनिरुक्तो प्रजापति वे
रिति। आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते। मंत्रश्च देवतायाश्च प्रजापतिरितिस्थि
तिरिति छंदोगपरिशिष्टे कात्यायनोक्तेश्च। ततो ब्राह्मणभोजनं। तत इति सूत्रादेवं सा
यते मध्ये मार्जनं पवित्रप्रतिपत्तिः। प्रणीताविमोको दक्षिणादानं च कृत्वा ततो ब्राह्म
स णभोजनं। एकादि बहुषु समर्थेषु तुल्यत्वादेकस्मिन्नपि चरितार्थत्वादेकस्यैव भो तु
जनमिति। यत्र बहूनां भोजनं तत्र स्वयमेवोपदिशति। यथा संस्थिते कर्मणि ब्रा
ह्मणान् भोजयेदिति। तथा सर्वासां पयसि पायसं श्रपयित्वा ब्राह्मणान्भोजयेदिति
न्

अत्र स्मृत्यंतरोक्त [illegible] त्रयोविंशतिब्राह्मणभोजनमिति हरिहरपद्धतौ ॥ चतुर्विंशद्भोजन [illegible] मिति रे
णुकादीक्षितः ॥ यज्ञपार्श्वे विशेषः ॥ गर्भाधानादिसंस्कारे ब्राह्मणान् भोजयेद्दश ॥ शतं वि
वाहसंस्कारे पंचाशन्मेखलाख्ये विधौ । आवसथ्ये त्रयस्त्रिंशच्छ्रौताधाने शतात्परं ॥ अष्टकं भो
जयेद्यज्ञ कृत्वा तत्र संस्कारसिद्धये ॥ सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ ॥ चातुर्मास्ये तु चत्वा
रि शतानि पंच सुराग्रहे ॥ अयुतं वाजपेये च ह्यश्वमेधे चतुर्गुणं ॥ आग्रयणे प्रायश्चित्ते
ब्राह्मणान् दश पंच चेति । अत्रैवं व्यवस्था । यत्र ततो ब्राह्मणभोजनमिति सत्त्वमस्ति । तत्रैकं
पर्यं [illegible] यित्वा यज्ञपार्श्वोक्तं ब्राह्मणभोजनं । यत्र विवाहादौ सत्त्वं नास्ति तत्र कर्मांते परिशि
ष्टोक्तमेव भोजनं । इति श्रीत्रिरग्निचित्सम्राट्स्थपति श्रीमहायाज्ञिकवामनात्मजदीक्षि
तगदाधरकृते गृह्यभाष्ये प्रथमकांडे द्वितीयकंडिका ॥ अथावसथ्याधाने पदार्थक्रमः ॥
तत्र चतुर्थ्युत्तरकाले भ्रातृमातृः भ्रातृमातृस्कंधनविभा [illegible] गकाले ॥ गृहपतौ प्रेते

१५

एकादशेऽहनि प्रागेवैकादशश्राद्धाद्द्वादशेऽहनि वा मातृपूजाभ्युदयिकरहितं ज्येष्ठः कुर्यात् ।
कालातिक्रमे तु प्रायश्चित्तं कृच्छ्रमाघादि पंच मासेषु आवतो आग्निनैवाकार्यं ॥ तत्र पर्वपने
ष्टवर्षातिक्रांत [illegible] संवत्सरसंख्यया प्राजापत्यरूपं प्रायश्चित्तं मुख्यविधिना चरेत् । तदशक्तौ
प्रतिप्राजापत्यं गां दद्यात् । तदभावे तन्मूल्यं निष्कमेकमर्धं वा दद्यात् । तदभावे प्रतिप्राजापत्यं
द्वादशब्राह्मणभोजनं । अयुतगायत्रीजपं । गायत्र्याति [illegible] लाज्यसहस्रहोमं वा त्वेषु रोपेक्षया
कुर्यात् । तत्रैव संकल्पः । आधानाकरणजनितदोषनाशार्थं वर्षसंख्याकान् कृच्छ्रानह
माचरिष्ये ॥ अथवा प्राजापत्याम्नायहेन प्रतिप्राजापत्यमेकैकां गां ब्राह्मणेभ्योऽहं संप्रददे ।
अथवा एतावतीनां गवां मूल्यमिदं संप्रददे । ब्राह्मणान् भोजयिष्ये । एवमग्रेपि संकल्पः । ततः
सायंप्रातर्होमद्रव्यं प्रसृतमाहुतिचतुष्टयपरिमितं अतिक्रांतदिवसानां गणयित्वा विप्रेभ्यो
दद्यात् । तन्मानं च कारिकायां । षष्टिप्रस्थमितं धान्यं त्रिप्रस्थमितं घृतं । इति सं वत्स
रस्योक्तं । प्रसृतिर्द्वितीयं मानं प्रस्थमानं [illegible] चतुष्टयमिति च ॥ तत्र संकल्पः । होमाकरण

जनितप्रत्यवायपरिहारार्थं एतावद्वार्षिकं दक्षिणायवतंदुलानामन्यतमं ब्राह्मणेभ्योऽहं संप्रददे।
तन्मूल्यं वा दद्यात्। इतरप्रत्यवायादिकर्मद्रव्यहान्या [illegible] निवृत्तिः॥ होमं दद्यादिति वचनादिति
रामवाजपेयि[illegible]नः॥ हरिहरस्त्वाप गंगाधरस्तु सायंप्रातर्होमपक्षादिकर्मपिंडपितृयज्ञाद्यनुसं
धानार्थं साधनभूतं होमद्रव्यमिति लिखितवान्। ततो यथोक्ते काले पूर्वाह्णे वैश्वदेवं कृत्वा
गणपतिं पूजयित्वा पुण्याहवाचनं कुर्या[illegible]त्। तत्र यत्र कर्तव्यं तदुच्यते। व्यासः। संपूज्य ग
धमाल्या[illegible]द्यैर्ब्राह्मणान्स्वस्ति वाचयेत्। धर्मकर्मणि मांगल्ये संग्रामे द्भुतदर्शने। इति
परिशिष्टे। अथ स्वस्तिवाचनमदितिपत्नीपुंसवनादिविवाहांतोपनयनसंस्काराः प्रतिष्ठोद्या
पने प्रवर्तितकर्माण्याद्यंतयोः कुर्यादिति। आश्वलायनस्मृतिः॥ वैदिके तांत्रिके चादौ ततत
पुण्याहमिष्यते॥ शौनकः॥ पुण्याहवाचनविधिं वक्ष्यामो यच्च पूज्याविधि॥ प्रयोक्तुं कर्मणा
मादावंते चोदयसिद्धय इति॥ तच्च कर्मप्रयोगांतर्गतमिति। केचित्तु तत्प्रयोगबहिर्भूतमिति॥

१९

व

सर्वेषु कालेषु समस्तदेशेषु॥ नदेवलग्नं॥ यात्रायोगे [illegible]
हरस्मः॥

आद्यपक्षे कर्मप्रयोगसंकल्पे दक्षाकार्यं। द्वितीये तु तत्तत्कर्मसंकल्पः॥ अथ प्रयोगः॥ हेमाद्रौ
दानखंडे॥ बह्वृचगृह्यपरिशिष्टोक्तो हेमोक्तः सकलसाधारण[illegible]शिष्टाचारप्राप्तश्च पुण्याहवा
चनप्रयोगः॥ कृतमंगलस्नानः स्वलंकृतः स्वाचमनः प्राङ्मुखो यजमानो वस्त्राच्छादिते पीठे उप
विश्य पत्नीं च स्वदक्षिणतः प्रोक्षितामुपवेश्य संस्कार्यं तथैवोपवेश्य॥ ॐ सुमुखश्चैकदंतश्चेत्या
दि [illegible] शुक्लांबरधरं। अभिप्सितार्थः। सर्वमंगलमांगल्ये। सर्वदा सर्वकार्येषु। इति श्लोकान्
पठित्वा। ॐ लक्ष्मीनारायणाभ्यां नमः॥ उमामहेश्वराभ्यां नमः॥ शचीपुरंदराभ्यां नमः॥
मातृपितृभ्यां नमः॥ इष्टदेवताभ्यो नमः॥ कुलदेवताभ्यो नमः॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः॥
आचम्य प्राणायामो कृत्वा देशकालौ संकीर्त्य अमुकफलसिध्यर्थं श्वोद्य वा अमुकक
र्म करिष्ये। तदंगतयादौ पुण्याहवाचनादि करिष्ये॥ इति संकल्पयेत्॥ यदा तु प्रयोगाद्बहि
र्भूतं पुण्याहवाचनाद्यंगं तदामुकफलसिध्यर्थं अमुककर्म कर्तुं अंगभूतमादौ पुण्या
हवाचनादि करिष्ये इति प्रत्येकं संकल्पः। प्रधानसंकल्पस्तु सर्वेषु आतद्दिनेष्वेवाकार्यः।

ततः कर्त्ता स्वपुरतः मही द्यौः पृथिवी च न इति भूमिं स्पृष्ट्वा। ओषधयः समिति तंदुलपुंजं कृत्वा॥
आजिघ्र कलशमिति तंदुलोपरि सलक्षणं धातुमयं मृन्मयं वा कलशं निधाय। इमं मे वरुणेति ती
र्थजलेन पूरयित्वा। गंधद्वारामिति गंधं कलशे प्रक्षिप्य चंदनातं अनुलिप्य। या ओषधीरिति स नादि
र्वौषधीः। ओं ओषधयः समिति यवान्। कांडात्कांडादिति दूर्वाः। अश्वत्थे व इति पंच पल्लवान्। स्योना
पृथिवी ति पंच सप्त वा मृदः। याः फलिनीरिति फलं। परिवाजपतिरिति पंचरत्नानि॥ हिरण्य
गर्भ इति हिरण्यं। युवा सुवासा इति वस्त्रेणांसूत्रेण च वेष्टयेत्। पूर्णा दर्वीति धान्यपूर्णं फ रशे
लसहितं पात्रमुपरि निदध्यात्। तत्त्वायामीति कलशे वरुणमावाहयेत्। चंदनादिना पूजयेच्च।
ततः कलशे देवता आवाहयेत्। कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः॥ मूले तत्र स्थि
१७ तो ब्रह्मा मध्ये मातृगणाः स्मृताः॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा। ऋग्वेदोऽथ यजु
र्वेदः सामवेदो ह्यथर्वणः॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः॥ अत्र गायत्री सावित्री गा १७
शांतिः पुष्टिकरी तथा॥ आयांतु मम शांत्यर्थं दुरितक्षयकारकाः॥ सर्वे समुद्राः सरितस्ती

र्थानि जलदा नदाः॥ आयांतु मम शांत्यर्थं दुरितक्षयकारकाः॥ इति॥ ततः कलशप्रार्थना॥ दे
सि वदानवसंवादे मथ्यमाने महोदधौ॥ उत्पन्नोऽसि तदा कुंभ विधृतो विष्णुना स्वयं॥ त्वत्तोये सर्वती
र्थानि देवाः सर्वे त्वयि स्थिताः॥ त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥ शिवः स्वयं त्वमेवा
सा सि विष्णुस्त्वं च प्रजापतिः॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥ त्वयि तिष्ठंति सर्वेऽपि यत
कामफलप्रदाः॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॥ सांनिध्यं कुरु देवेश प्रसन्नो भव स
र्वदा॥ अवनिकृतजानुमंडलः कमलमुकुलसदृशमंजलिं शिरस्याधाय दक्षिणेन पाणिना
सुवर्ण [illegible] पूर्णकलशं धारयित्वा आशिषः प्रार्थयेत्॥ प्रार्थनामाह॥ एताः सत्या आशिषः
संतु॥ दीर्घा नागा नद्यो गिरयः त्रीणि विष्णुपदानि च॥ तेनायुःप्रमाणेन पुण्याहं दीर्घमा पुण्यं
युरस्तु। शिवा आपः संतु। सौमनस्यमस्तु। अक्षतं चारिष्टं चास्तु। गंधाः पांतु सुमंगल्यं चा
स्तु। अक्षताः पांतु आयुष्यमस्तु। पुष्पाणि पांतु सौश्रियमस्तु। तांबूलानि पांतु ऐश्वर्यमस्तु॥
दक्षिणाः पांतु बहुदेयं चास्तु। दीर्घमायुः शांतिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो

१८

वितं बहु पुत्रं चायुष्यं चास्तु । अद्य सर्व ब्राह्मणैः स्वस्ति इति प्रत्युत्तरं देयं ॥ ये कृत्वा सर्व वेदय
ज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तंते । तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशी
र्वचनं बहु ऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ॥ विप्राः वाच्यतामि
ति वदेयुः ॥ एवमुत्तरं त्रीपिवारान् प्रत्युत्तरं ॥ ततो यजमानः ॥ भद्रं कर्णेभिः ऋ० द्रविणोदाः
द्रविणसः ऋ० सविता पश्चात् ऋ० नमो नवो भवति ऋ० उच्चादिवि ऋ० आपः पुंदं तु ह्री वसेदी
र्घायुत्वाय वर्चसे । यस्यात्मकारिणामन्त्यमानो मर्त्यं मर्त्यो [illegible] तुवे दोपनीतोऽ
स्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां । यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्यो
नं ॥ अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति । व्रतनियमतपःस्वाध्या
यक्रतुदमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयतां ॥ विप्राः समाहितमनाः
स्मः ॥ प्रसीदंतु भवंतः विप्राः प्रसन्नाः स्मः यजमानः शांतिरस्तु । पुष्टिरस्तु तुष्टिरस्तु
वृद्धिरस्तु । अविघ्नमस्तु । आयुष्यमस्तु । आरोग्यमस्तु शिवं कर्मास्तु । कर्मसमृद्धिर

१८

श्री सरस्वती प्रीयतां ॥ श्रद्धामेधे प्रीयेतां ॥ भगवती कात्यायनी प्रीयतां ॥ भगवती माहेश्वरी प्रीयतां ॥ भगवंतौ विघ्नविनायकौ प्रीयेतां ॥ भगवान् स्वामि
महासेनः प्रीयतां [illegible] सर्वाः कुलदेवताः प्रीयंतां [illegible]
हताः ब्रह्मद्विषः [illegible] शाम्यंतु घोराणि ॥ शाम्यंतु पापानि ॥ शाम्यं[illegible]

स्तु । वेदसमृद्धिरस्तु । शास्त्रसमृद्धिरस्तु । पुत्रसमृद्धिरस्तु । धनधान्यसमृद्धिरस्तु । इष्टसं
पदस्तु । अरिष्टनिरसनमस्तु । यत्पापं तत्प्रतिहतमस्तु । यच्छ्रेयस्तदस्तु । उत्तरे कर्मण्यवि
घ्नमस्तु । उत्तरोत्तरमहरहरभिवृद्धिरस्तु । उत्तरोत्तराः क्रियाः शुभाः संपद्यंतां । तिथि
करणमुहूर्तनक्षत्रसंपदस्तु । तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां ॥
तिथिकरणे मुहूर्तनक्षत्रे सग्रहे सदैवते प्रीयेतां ॥ दुर्गापांचाल्यौ प्रीयेतां ॥ अग्निपुरोगा वि
श्वेदेवाः प्रीयंतां ॥ इंद्रपुरोगा मरुद्गणाः प्रीयंतां ॥ अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां ॥ ऋषि
गणाः छंदांस्याचार्या वेदा यज्ञाश्च प्रीयंतां ॥ ब्रह्म च ब्राह्मणाश्च प्रीयंतां ॥ श्रीभगवान्नारायणः
प्रीयतां ॥ भगवान्पर्जन्यः प्रीयतां ॥ भगवान्स्वामी महासेनः प्रीयतां ॥ पुण्याहकालान्वाच
यिष्ये वा[illegible]च्यतां । उद्गाते ॐ मा वदा ॥ अनया पुण्याहं पूर्वकुर्वते ॥ ब्राह्मणाः मम
गृहे अस्य कर्मणः पुण्याहं भवंतो ब्रुवंतु ॥ इति स्वयं मंद्रस्वरेण ॥ ॐ पुण्याहं पुण्य
मिति तथोक्ते पुनरेवं मध्यमस्वरेण [illegible] तथैव तैरुक्ते पुनरेवमुच्चैस्वरेण [illegible] तथैवते

त्तु नः ग

कौ स्वस्त्यये आदित्य मम तत्स्वस्ति ब्राह्मण इत्यादि कर्मणः स्वस्त्ययनं पूर्ववत् स्वस्ति भवंतो ब्रुवंत्विति
त्रिः॥ आयुष्मते स्वस्तीति प्रतिवचनं त्रिः॥ ऋध्यताम् ...कामः॥ सर्वामृद्धिं प्रति तिष्ठति। ब्राह्मणानि मघा॥२
इत्यादि० अस्य कर्मणः ऋद्धिं भवंतो ब्रुवंत्विति त्रिः॥ ॐ ऋध्यतामिति प्रतिवचनं त्रिः॥ श्रिये जातः
श्रिय श्री० मित्रेभ्यो॥ श्रियः एवैनं० एवं वद ब्राह्मणानि इत्यादि अस्य कर्मणः श्रीरस्त्विति भवंतो ब्रुवंतु इ
ति पुनः ब्रूयात्॥ अस्तु श्रीरिति विप्रास्त्रिः॥ ततः कर्तुर्वामतः पत्नीमुपवेश्य पात्रपातितजलेन पल्ल
व दूर्वादिभिरुदङ्मुख विप्रा अभिषिंचेयुरित्थं ततः। तत्र मंत्राः देवस्य त्वेत्यादि। सुरास्त्वामभि
लोका षिंचन्त्वित्यादि पौराणान्मंत्रानभिषिंचेयुरिमं पठस्याभिषेके॥ ततः नीराजनं कुर्यात्॥ अथाभ्यु
१९ दयिक श्राद्धविधिः॥ तच्च गर्भाधानादिषु च गर्भसंस्कारेषु जातकर्मादिषु पत्य संस्कारेषु
आग्न्याधानादिषु श्रौतकर्मसु स्मार्तकर्मसु वापीकूपतडागारामप्रतिष्ठापनादिषु देवप्र
तिष्ठायां वानप्रस्थाश्रमसंन्यासस्वीकारे तुलापुरुषादिमहादानादौ नवग्र[illegible]व्रते १९
हप्रवेशे महोत्सवा २

५ विहितानां युगपदनुष्ठाने कर्मनाशाशक्तस्य पुत्रादीनां प्रायश्चित्ततया पुनःसंस्काराणां युगप५

सर्वेषु पुत्राभिषेके शांतिकपौष्टिकेषु चैव पाकमोत्सर्जनयोरप्येके नवीनयोर्नयोरन्यत्राप्येवं
विधे कार्यं। इदमाभ्युदयिक श्राद्धं वक्ष्यमाणं च मातृपूजनमेकस्मिन्नेकसंस्कारेष्वेककर्तृके
दुष प्रति षु युगपत्प्रसितेषु सर्वादौ सकृदेव तंत्रेणैव कार्यं। न तु संस्कारमात्रस्य यथा दैवादकृतजातकर्मा व
क दिस्योपनयनकाले जातकर्माद्यनुष्ठाने देशांतरगतस्य मृतबुध्या कृतौर्ध्वदेहिकस्यागतस्य पु
नर्जातकर्मादिसंस्काराणां [illegible]पदनुष्ठाने वा। तदुक्तं ब्रह्मपुराणे। गणशः क्रियमाणानां मातृ
भ्यः पूजनं सकृत्। सकृदेव भवेच्छ्राद्धमादौ न पृथगादिष्विति। कात्यायनः। कुड्यलग्नं वसोर्धा
राः पंच धाराघृतेन तु॥ कारयेत्सप्त वा धारा नातिनीचा न चोच्छ्रिताः॥ गौरी पद्मा शची मेधा
सावित्री विजया जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पुष्टिस्तथा तुष्टिरा
त्मदेवतया सहेति। आत्मदेवता आत्मकुलदेवता। आयुष्याणि च शांत्यर्थं जपेदत्र समाहि
तः॥ आयुष्याणि आनो भद्रा इत्यादीनि। ततः वृद्धिश्राद्धं नवदैवत्यं पार्वणत्रयात्मकं। तत्र
क्रमः माहाश्वलायनाचार्यः। माता पितामही चैव संपूज्या प्रपितामही॥ पित्रादयस्त्रय

२०

श्चैव मातुः पित्रादयस्त्रयः। एतेनवार्चनीयाः स्युः पितरोऽभ्युदयेषु द्विजैः॥ यत्तु वृद्धवशिष्ठः। नांदीमुखे विवाहे च प्रपितामहपूर्वकं। नामसंकीर्तयेद्विद्वानन्यत्र पितृपूर्वकमिति। स्मृत्यर्थसारे चाऽवृद्धमुख्यास्तु पितरो वृद्धिश्राद्धेषु भुंजते। इतितच्छाखांतरविषयं। [illegible] कात्यायनानां तु आनुलोम्येन मात्रादिक्रमेणैव नांदीमुखाः पितरः पितामहाः प्रपितामहा इति प्रयोगदर्शनात्। यत्तु ब्रह्मपुराणे। पिता पितामहश्चैव तथैव प्रपितामहः॥ त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्तिताः॥ तेभ्यः पूर्वे [illegible] त्रयो ये तु ते [illegible] तु नांदीमुखाः स्मृता इति तन्महालयप्रकरणपठितप्रोष्ठपदपौर्णिमासीनिमित्तकश्राद्धविषयं तत्प्रकरणपाठादिति स्पष्टं हेमाद्र्यादयः ऊचिरे इहत्वचनांदीमुखसंज्ञकान् मात्रादि [illegible] तु दिशेत्। विष्णुपुराणे। कन्याविवाहादीननुक्रम्य। नांदीमुखान् पितृनादौ तर्पयेद्विधिपूर्वकमित्युक्तेः॥ वृद्धपराशरेण तु देवानामपि नांदीमुखविशेषणमुक्तं मत्स्ये। नांदीमुखेभ्यो देवेभ्यो प्रदक्षिण[illegible] कुशासन निर्मितेर्वृद्धिश्राद्धे च कालः। कर्मादौ तेषु मतं पार्वणं। कर्म हि पितृपा[illegible]र्वणं। कर्म [illegible]न्ते माता मह पार्वणमिति। अस्या[illegible]

३ तर्पयेत्। प्रयत्नो गृहीस्विति॥ ब्रह्मपुराणे व्रजन्माद्यनुक्रम्य पितॄन्नांदीमुखान्नाम तर्पयेत् ३ २०

सं भवेद्व्याहत[illegible] तु मनुः॥ कृत्तिकाभे श्राद्धकालानां नांदीश्राद्धत्रयं बुधः। पूर्वेद्युरेव कुर्वीत पूर्वोक्ते मातृपूर्वकमिति। इदं च नैमित्तिककर्मसु अन्येषु तु कर्माहव[illegible] श्राद्धं। पुत्रजन्मनि तु दिवा रात्रौ वा भुनेक्तवतोपवासिना वा पुत्रजन्मानंतरमेव कार्यं। अत्र संकल्पादौ विशेषः संग्रहे। शुभाय प्रथमं तेन वह्नौ संकल्पमाचरेत्। नषष्ठ्या यदि वा कुर्यान्महादोषोऽभिजायते। अन समूहद्धशब्दानामरूपाण्यामगोत्रिणां॥ अनाम्नां तिलाद्यैश्च नांदीश्राद्धं च सव्यतः। आश्वलायनकारिकां च संबंधनामरूपाणि वर्जयेदत्र कौणि। इदं तु शाखांतरविषयं॥ अत्र सव्यवसुश्च्छेदे वौत स्थाने द्वौ विप्रौ मात्रादीनां च प्रत्येकं द्वौ द्वौ एवमष्टौ। अत्र नाप[illegible] सव्येति व स्थाने यवाश्चव स्वधा स्थाने स्वाहा शब्द सव्यानुनिपाताभावः प्राङ्मुख एव कुर्यात्। प्रदक्षिणमुपचारो [illegible]द मैः क्रिया सा दै[illegible] विशेषाग्रं ग्रु ग्रंथांतरतो ज्ञेयाः। पिंडदाने कृतदेशाचारतोऽन्यवस्था। भविष्यपुराणे। पिंडनिर्वपणं कुर्यान्न वा कुर्यान्नराधिप। वृद्धिश्राद्धे महाबाहो कुलधर्माननवेक्ष्य तु। पिंडदानपक्षेऽवसिष्ठेनोक्तः। दधिकं विशेष कर्धुसंमिश्रौ पिंडा दद्याद्यथाक्रमं। कर्कंधुबदरीफलं। तथा॥ एकैकस्मै पिंडद्वयं देयं। एकं नाम्ना परं तु ष्णीं दद्यात्पिंडद्वयं बुध इति चतुर्विंशतिमतात्। अन्येच बहवो विशेषा ग्रंथांतरतो ज्ञेयाः॥ एवं विंशति ब्राह्मणाः॥ पक्षा मात्रादीनां त्रयाणां द्वौ द्वौ॥ ~~[illegible]~~।

स्या

ह्येयाः। दाक्षिणानां गुर्जराणां च विस्तृतिर्वृद्धिश्राद्धाभावान्नेहोच्यते ॥ अथाभ्युदयिके कर्तृनिर्ण *यि*
यः॥ सा[...]यणीये। नांदीश्राद्धं पिता कुर्याद्दाद्ये पाणिग्रहे पुनः॥ अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं ॥
द्वितीयपाणिग्रहादौ वरस्य कुर्यादित्यर्थः। कात्यायनः। स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु। पिं
डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात्। तेषां सुतानामुद्वहनात्प्रथमविवाहपर्यंतं पितास्वपितृभ्यः
पिंडान्दद्यात्तेपलक्षितं वृद्धिश्राद्धं कुर्यात्। तस्य पितुरभावे तु तस्य संस्कार्यस्य पितॄणां यः क्रमस्तेन क्र
दि मेण पितृव्याचार्यमातुलो श्राद्धं दद्यान्निस्वपितृभ्य इति हेमाद्रिणा व्याख्यातं। जीवत्पितृकस्तु पि
तृमात्रादिभ्यो वृद्धिश्राद्धं कुर्यात्। नष्टे जीवति चैव च सन्यस्ते तात च पतिते सति। एभ्य एव पिता दद्या
त्तेभ्यो दद्यात्स्वयं सुतः। एतत्साग्निकविषयमिति केचित्॥ विष्णुः। पितरि जीवति यः श्राद्धं कुर्यात्तेभ्य एव
२१ [illegible] कुर्यात्स एषां पिता कुर्यात्तेभ्य एव कुर्यात् पितरि पितामहे च एषां पितामहः। पितरि पिता *र्*
महे प्रपितामहे चैव न दद्यादिति। आश्वलायनगृह्यपरिशिष्टे तु जीवितो न संस्कारे मातृमाता *षु*
महयोः कुर्यात्। तस्यां जीवत्यां मातामहस्यैव कुर्यादिति। अथास्य शिष्टप्रचारादवार परिगृहीतः *२१*
व सु

संकल्पविधिना प्रयो[...]गः। उपनयनादि महत्सु कर्मसु पूर्व[...]वेद्युर्जातकर्माद्यल्पकर्मसु तदह
रेव नांदीश्राद्धं कुर्यात्। त[...]त्रादौ कृतमंगलीकस्नानो धौतवासाः कृतस्वस्त्ययनो नांदीश्राद्ध
पूर्वांगमातृकापूजनं कुर्यात्। पूजाप्रकारस्तु। पूजोपकरणान्युपकल्प्य प्राङ्मुखो उपविश्य कु
शायवस्त्रलान्यादाय अद्येत्यादि अमुककर्मांगत्वाय गणपतिसहित गौर्यादिचतुर्दशमातृका
पूजनमहं करिष्ये। इति संकल्प्य अक्षतैः। ॐ भूर्भुवः स्वः गणपतये इहागच्छ इह तिष्ठ। ॐ भू
र्भुवः स्वः गौरी इहागच्छ इह तिष्ठ। एवं पद्मे। शची मेधे। सावित्री विजये। जये देवसेने। स्वधे।
स्वाहे। धृते। तुष्टे। पुष्टे। आत्मकुलदेवते इ[...]ति प्रत्येक[...]मावाह्य। ततो मनोज्योतिरिति प्रति
ष्ठाप्य। ॐ गणपतये नम इति प्रणवादिनमोंत चतुर्थ्यंत स्वस्वनाममंत्रेण पंचदशोपचारैर
पि षोडशोपचारैः पूजयेत्। मातृणां गणदेवता[...]रूपत्वेतु गणपति गौरी पद्मा शची
मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा धृति पुष्टि आत्मकुलदेवताः इहागच्छ

तइहतिष्ठतइत्यावाह्य प्रतिष्ठाप्य ॐ गणपत्यादिभ्यो नमः इति सर्वत्र षुपचारैः पूजयेत् ततः पं
च सप्त वा नातिनीचानत्युच्छ्रिताः कुड्यादिषु वसोः पवित्रमसीति घृतधारा उत्तरसंस्थाः कुर्या
त्ताः ततो वसोर्धारादेवताभ्यो नमः इति पंचोपचारैः पूजां कुर्यात् ॥ वसोर्द्धाराकरणं च का
ना त्यायनानामेव नान्येषां ॥ आयुष्यमंत्रजपः ॥ आयुष्यं वर्चस्यमुमा ॥ नेतद्रक्षांसि·पि
षोयु·यदाबध्नन्दाक्षायणाः ॥ १ ॥ सं ३ ॥ २ ॥ इत्यायुष्यमंत्रजपः ॥ अथ नांदीश्राद्धं तच्च त्रिविधं ॥ नि
नैमित्तिक वीवाहादिनिमित्तं पुत्रजन्माद्यनियतनिमित्तं ॥ आधानादिनिमित्तं चेति ॥ तत्र वि
२२ वाहादिनिमित्तं प्रातःकार्यं तदाह शातातपः ॥ प्रातर्वृद्धिनिमित्तकमिति ॥ अत्र प्रातः २२
शब्दः सार्द्धप्रहरात्मके काले वचनात् तदाह गार्ग्यः ॥ लगारसंमिति भानोः प्रथमः प्र
हरः स्मृतः ॥ स एव सार्द्धसंयुक्तः प्रातरित्यभिधीयते ॥ आधानादिनिमित्तं तत्परा
ह्णे कार्यं ॥ तदाह गालवः ॥ पार्वणं चापराह्णे तु वृद्धिश्राद्धं ग्निकमिति ॥ आधाना
तथा

नानिमित्तं वृद्धिश्राद्धं अपराह्णे कुर्यादित्यर्थः ॥ पुत्रज[illegible]ादौ निमित्तानंतरमेव तत्कार्यं निर्णय
कर्तार म्स्तेप्येवं ॥ तत्र प्रवृद्धिकर्त्ता काले सुस्नातः सुप्रक्षालितकरचरणः स्वाचांतः सुस्नातान्नाचांतान् ॥
ना श्रेष्ठो ब्राह्मणान् गृहबहिरुपलिप्ते गोमयोपलिप्ते मंडले स्वागतं वः सुस्वागतमिति प्रत्येकं त्र
श्रोत्तरपूर्वकं प्रागग्रकुशोत्तरेषु आसनेषु प्राङ्मुखान् दक्षिणोपक्रमान् उदगपवर्गान् उपवेश्य
स्वयमुदङ्मुख उपविश्य आद्ययोर्विप्रयोर्जानुनी स्पृष्ट्वा न प्राग्वद्देशकालौ संकीर्त्य अमुककर्मनि
मित्ताभ्युदयिकश्राद्धाख्ये कर्मणि नांदीमुखास्मन्मात्रादित्रयनांदीनांदीमुखाः पित्रादित्रयनांदी य
मुखास्मन्मातामहादित्रयसंबंधिसत्यवसुसंज्ञक विश्वेदेवार्थे भवंतो मया निमंत्रिता इ
ति तांबूलादिदानपूर्वकं निमंत्रयेत् ॥ निमंत्रितोस्मि इति प्रतिवचनं पुनस्तांबूलादिकमादा
य तदुत्तरयोर्विप्रयोर्जानुनी स्पृष्ट्वा अद्येह अमुकगोत्राणां नांदीमुखास्मन्मातृपिता
महीप्रपितामहीनां अमुका अमुकदेवीदानां अद्येहकर्तव्यामुककर्मनिमित्ताभ्युदयिकश्रा

विप्रया

भवंतो मया निमंत्रितो इति तांबूलादिदानपूर्वकं निमंत्रयेत्॥ निमंत्रितो स्म इति प्रतिवच
नं पुनस्तांबूलादिकमादाय तदुत्तरपौत्रानुजीस्य ब्राह्मं अद्येहामुकगोत्राणां नांदीमुखानां पितृ
पितामहप्रपितामहानां अमुकामुकशर्मणां अद्य कर्त्तव्यामुककर्मनिमित्तमाभ्युदयिकश्राद्धे भ
वंतो मया निमंत्रितो॥ इति तांबूलादिदानपूर्वकं निमंत्रयेत्। निमंत्रितो स्म इति प्रतिवचनं। पुन
स्तांबूलादिकमादायाद्येहामुकगोत्राणां नांदीमुखानां मातामह प्रमातामह वृद्धप्रमाताम
हानां अमुकामुकशर्मणां अद्य कर्त्तव्यामुककर्मनिमित्ताभ्युदयिकश्राद्धे भवंतो मया
निमंत्रितोइति ब्रूते तांबूलादानपूर्वकं निमंत्रयेत्। निमंत्रितोस्म इति प्रतिवचनं। अक्रोधनैः
शौचकारिभिः सर्वत्र नियमानुश्रावयेत्॥ ततो देवद्विजपूर्वकं चरणप्रक्षालनं विधाय अ
द्येह नांदीमुखास्मन्मात्रादित्रय नांदीमुखास्मत्पित्रादित्रय नांदीमुखास्मन्मातामहादित्रय
संबंधि सत्यवसुसंज्ञका विश्वेदेवा एतत्पादार्घ्यं वो नमः इति गंधाक्षतादीयुक्तं पादार्घ्यं दद्यात्॥ अ
द्येहामुकगोत्राः नांदीमुखास्मन्मातृपितामहीप्रपितामह्योमुकामुकदेव्यः एतत्पादार्घ्यं वो नमः॥

२३

इति मातृवर्गब्राह्मणचरणयोर्दद्यात् [illegible] अद्येहामुकगोत्राः नांदीमुखास्म
त्पितृपितामहप्रपितामहाः अमुकामुकशर्मणः एतत्पादार्घ्यं वो नमः इति पित्रादिवर्गब्राह्मणच
रणयोर्दद्यात्। अद्येहामुकगोत्राः नांदीमुखास्मन्मातामह प्रमातामह वृद्धप्रमातामहाः अमुका
मुकशर्मणः एतत्पादार्घ्यं वो नमः इति मातामहवर्गब्राह्मणचरणयोरर्घ्यं दद्यात्। ततो ब्राह्मणाना
चमनमुखायम[illegible]प्याचम्य श्राद्धदेशप्रथमकल्पिते [illegible] आसनेषु इदमासनमास्यतामिति प्रपो
गेणोदगपवर्गं प्राङ्मुखान्देवपूर्वकं द्विजानुपवेश्य स्वयमुदङ्मुख उपविश्य कर्मसौकर्यार्थं क
र्मपात्रं जलेनापूर्य दूर्वांकुशदधियवकुशांस्तत्र निक्षिप्य प्राणायामत्रयपूर्वकं विष्णुस्मरणं
कृत्वा कर्मपात्रजलेनोपकरणानि प्रोक्ष्य दूर्वांकुशयवजलानि दक्षिणकरेणा[illegible]दाय पूर्ववद्
देशकालकीर्त्तनांते अमुककर्मनिमित्ता[illegible]भ्युदयिकश्राद्धाख्ये कर्मणि अमुकगोत्राः नांदी
मुखास्मन्मातृपितामहीप्रपितामह्यो[illegible]मुकामुकदेव्यः अमुकगोत्राः नांदीमुखास्मत्पि
तृपितामहप्रपितामहाः अमुकामुकशर्मणः अमुकगोत्राः नांदीमुखास्मन्मातामहप्रमातामह

ह

पअमुगोत्राणांनांदीमुखास्सन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्मणां
वृद्धप्रमातामहाः अमुकाअमुकशर्मणः प्रधानदेवताः सत्यवसुसंज्ञका विश्वेदेवाः अंगदेवताः
यथोक्तलक्षणं विप्रब्राह्मणमाहवनियार्थं अमुकगोत्राणां नांदीमुखास्सन्मातृपितामहीप्रपिता
महीनां अमुकाअमुकदेवीदानां अमुकगोत्राणां नांदीमुखास्सपित्नपितामहप्रपितामहानां
अमुकामुकशर्मणां अमुककर्मनिमित्तं सत्यवसुसंज्ञकाविश्वेदेवपूर्वकं सांकल्पिकमाभ्युद
दयिकं श्राद्धं क्षवदनुज्ञया अहं करिष्ये इति संकल्पः। कुरुष्वेति प्रतिवचनं। ततः सप्रणव गायत्र्या
स्त्रिर्जपः। विष्णुस्मरणं मात्रादित्रयपित्रादित्रयमातामहादित्रयसंबंधश्राद्धसंबंधिनः। सत्य
वसुसंज्ञका विश्वेदेवाः इदमासनं वो नम इति प्रागग्रकुशत्रयं सयवकुशं दक्षिणतः आसने

२४

परि दत्वा अमुकगोत्राः नांदीमुखाः सन्मातृपितामहीप्रपितामह्यो मुकामुकदेव्यः इदमासनं
वो नमः इति मातृवर्गब्राह्मणद्वयासनोपरि विभज्य दत्वा अमुकगोत्रनांदीमुखास्सपित्नपि
तामहप्रपितामहाः अमुकामुकशर्मणः इदमासनं वो नम इति पित्रादिवर्गब्राह्मणद्वयासनो
परि दत्वा पित्रादिपदस्थाने मातादिपदेश्वेतानदीयब्राह्मण [illegible] द्वयासनोपर्यासनं दद्यात्।

२४

ततः प्रत्यासनं दिपस्थापनं।। ततो द्वितिय ब्राह्मणेन हस्ते प्रथम ब्राह्मणहस्तो दत्वा तत्र जलदान पूर्वकं
गंधादि दत्वा कुशयव जलनादाय मात्रादि पित्रादि मातामहादि त्रय संबंधि सत्यवसुसंज्ञका विश्वेदेवाः
इमानि गंधपुष्पधूपदीपवासोलंकारण बूतांबूलानि वो नमः अमुकगोत्राः नांदीमुखान्मातृपिता
मही प्रतितामह्यो मुकामुकदेव्यः इमानि गंधाक्षतांबूलानि वो नमः अमुकगोत्राः नांदिमुखास्सपित्न
पितामहप्रपितामहाः। अमुकामुकशर्मणः। इमानि गंधपुष्पतांबूलानि वो नमः। अमुकगोत्राः। नां
खादिमुखास्सन्मातामह प्रमातामह वृद्धप्रमातामहाः अमुकामुकशर्मणः। इमानि गंधतांबूलानि वो
नमः। अन्नपरिवेषणं पात्रमालभ्य पृथिवीते जुहोमि स्वाहेति। तपितां गुष्ठमन्त्रेण गाह्य। इदमन्न
मिमापः इदमाज्यं हविः इत्युक्त्वा। मात्रादित्रयपित्रादित्रयमातामहादित्रयसंबंधिनः सत्यवसुसं
ज्ञका विश्वेदेवाः इदमन्नं घृताद्युपस्कारसहितं परि[illegible] विष्टं परिवेष्यमाणं चातिदृप्तेः तृप्तिपर्यंतं
अमृतरूपं वो नमः इत्युत्सृजेत्। एवमेव मात्रादि [illegible] पात्रद्वयमालभ्य अमुकगोत्राः नांदिमुखाः
सन्मातृपितामहीप्रपितामह्यो अमुकामुकदेव्यः इदमन्नं घृताद्युपस्कारसहितं अमृतरूपं

न

वो नमः॥ एवमेव पित्रादिपात्रयोर्मातामहादिपात्रयोरपि संकल्पं कुर्यात्॥ ततो मन्त्रस्तु बिल्व मेव वर्द्धं जपः। तस्मान् ज्ञात्वा अन्नं विकीर्य सकृद पोदत्वा पूर्ववत् गायत्री जपित्वा मधुमती मधुमध्विति च। संपन्नं इति स्पृष्ट्वा॥ सुसंपन्नमिति तैरुक्ते शेषमन्नं किं क्रियतां इति स्पृष्ट्वा इष्टैः सह भुज्यतामिति तैरुक्ते ब्राह्मणानाचामयेत्॥ सुप्रोक्षितमस्तु। शिवा आपः संतु। सौमनस्यमस्तु। अक्षतं चारिष्टं चास्तु॥ नांदीमुखा मातरः प्रीयंतां॥ नांदीमुखाः पितामह्यः प्रीयंतां॥ नांदीमुखाः प्रपितामह्यः प्रीयंतां॥ नांदीमुखाः पितरः प्रीयंतां॥ नांदीमुखाः पितामहाः प्रीयंतां॥ नांदीमुखाः मातामहाः प्रीयंतां॥ नांदीमुखाः प्रमातामहाः प्रीयंतां॥ नांदीमुखाः वृद्धप्रमातामहाः प्रीयंतां॥ इति क्षीरयवजलानि दद्यात्॥ ततः प्रांजलीः आशीः प्रार्थयेत्॥ अघोराः पितरः संतु॥ संत्वित्युक्ते ब्राह्मणाः॥ गोत्रं नो वर्द्धतां इति यजमानः॥ वर्द्धतामित्युक्ते॥ दातारो नोभिवर्द्धंतां॥ अभिवर्द्धतामित्युक्ते॥ वेदाः संततिरेव च॥ अभिवर्द्धतामिति क्रमेणोत्तरे॥ श्रद्धा च नो मा

मुकगोत्राणां अमुकशर्मभ्यां इयं द्राक्षादत्ता इति मातृप्रादिब्राह्मणाभ्यां दक्षिणां दद्यात्॥५

च

व्यगमत्॥ माचाल॥ बहुदेयं च नोस्त्विति॥ अस्त्विति प्रतिवचो॥ ततो मातृादित्रय पित्रादित्रय मातामहादित्रयसंबंधीवैश्वदेविक नांदीश्राद्धप्रतिष्ठार्थं अमुकशर्मभ्यां ब्राह्मणाभ्यां इयं द्राक्षामलकार्द्रमूलकादिरूपा विश्वेदेवता दक्षिणायमादत्ता इति देवब्राह्मणाभ्यां दक्षिणां दत्वा अमुकगोत्राणां नांदीमुखानां मातृपितामहीप्रपितामहीं अमुकामुकदेवीनां दत्तोतदाभ्युदयिक श्राद्धप्रतिष्ठार्थं अमुकगोत्राणां नांदीमुखानां पितृपितामहप्रपितामहानां अमुकामुकशर्मणां दत्तो तदाभ्युदयिक॰ दत्ता इति पित्रादिब्राह्मणाभ्यां दक्षिणां दत्वा पित्रादिपदस्थाने मातामहप्रमातामहे पदप्रक्षेपेण मातामहादिब्राह्मणाभ्यां दक्षिणां दद्यात्॥ ततो विश्वेदेवाः प्रीयंतां भिक्षुकादेवद्विजाभ्यां विश्वेदेवाः प्रीयंतां इति प्रत्युत्तरे दत्ते स्वस्ति भवंतो ब्रुवंतु। इति सर्वान्प्रत्युक्ता स्वस्तीति तैरुक्ते ब्राह्मणान्प्रणिपत्य प्रसाद्य वाजे वाजे इति मात्रादि वर्गत्रय द्विजपूर्वकं देवद्विजौ विसृज्य आमा वाजस्येति विप्राननुव्रज्य प्रदक्षिणीकृत्य आचामेत्॥ ततो मातृकादि विसर्जयेत्। जीवन्मातृकस्य न मातृपार्वणं। जीवन्मातामहस्य न मातामहपार्वणं। द्वारलोपात्॥ जीवत्पितृकस्तु ये भ्यः पिता दद्या

नं
क

नां

वृद्धप्रमातामहे

तेभ्यो दद्यादित्युक्तमेव ॥ यदा तु पक्वान्नासंभवस्तदा आमश्राद्धविधिना आमान्नेन कर्तव्यं । आमा
न्नस्याप्यलाभे हिरण्येन कर्तव्यं । ततः पत्नीयजमानयोरहतवस्त्रपरिधानं । ततः सपत्नीकः प्राङ्मुख तर
उपविश्य अद्येत्यादि देशकालौ स्मृत्वा श्रौताग्निमहमाधास्य इति संकल्पं कुर्यात् । आभ्युदयिकश्रा
द्धात्पूर्वं संकल्प इति हरिहरः । श्राद्धोत्तरमिति रेणुकः । वैकल्पिकावधारणं । मंथं निर्वृत्त ततः पात्रा ना
सादनं । द्वे पवित्रे । घृतस्थाली । मृण्मयी । चरुस्थाली औदुंबरी । पालाशास्समिधः प्रांचावाघारौ ।
ण कोणयो राज्यभागौ दक्षिणोत्तर्यात्रे इत्येवं धारणं । हरिहरमते ब्रह्मवरणं । अरणीप्रदानं च । तत्रै
वं ब्रह्मा अरणी आदाय अधरारणिं यजमानाय प्रयच्छति । नेच्चावसथ्याग्निसाधनभूते इमे
अरणी आवाभ्यां परिगृहीते इति परिगृहीतः । अरणीप्रदाने स्मार्त्ते निर्मूल्यत्वादुपेक्षणीयं । प्रदा
२६ नाभावेऽपि धारणं भवत्येव । अधरारणिं पत्नी बिभृयात् उत्तरां पतिरिति यज्ञपार्श्वे परिशिष्टात् । २६
उक्तप्रकारेणारणीमानं ॥ अरणीपतने । ततो यवोनचतुर्दशांगुलमानेन मेखला मुक्तं
रत्नमग्नेः खरकरणं सभ्यावसथ्यो गार्हपत्यवत्कुंडमिति । निगमपरिशिष्टात् । यज्ञपार्श्वे पि

वृत्तमेव कुंडमुक्तं । मेखलादादशांगुलोच्छ्राकार्या ॥ ततः खरे परिसमूहनं । उपलेपनं । उल्लेख
नं । उद्धरणं । अभ्युक्षणं । अरणिपक्षे । अग्निमंथनं ॥ तत्र यजमानः प्राङ्मुख ऊं वली धारयति । प्र
त्यङ्मुखी पत्नी मंथनं करोति । पत्नी बहुत्वे सर्वाभिर्मंथनमिति रेणुकः । पत्न्या मंथनाशक्तौ ब्रा
ह्मणेन केनचिन्मंथनं कार्यं । काष्ठैरग्नेः प्रज्वालनं । खरे निधानं । अथवा वैश्य[illegible] हाद्दाहृत्याग्नेः
ण खरे स्थापनं । कश्यादिस्मरेमंत्रे [illegible] रेणुक गंगाधर हरि [illegible] विचारणीयं । कर्मकाले
प्रतिमंत्रं स्मरणं । उक्तपूर्वमेव स्मरणं वृत्ताक मर्रिंभः । एतान्यविदितार्थो धीते नु ब्रूते यजते या
जयते तस्य ब्रह्म निर्वीर्यं यातयामं भवतीत्यर्थानुक्रमण्यामुक्तत्वात् तत्तत्पदार्थज्ञानमात्रमपेक्षि
तं न तु कर्मकाले उच्चारणं । यथार्थज्ञाने । अस्मिन्नावसथ्याधाने हं ब्रह्मा भवेति । ब्रह्मणो व्यप
देशः । दक्षिणतो ब्रह्मासनमास्तीर्य तत्र ब्रह्मोपवेशनं । अग्नेरुत्तरतः प्रणीताप्रणयनं । परिस्त
रणं । पात्रासादनं । त्रीणि पवित्रच्छेदनानि । पवित्रे द्वे । प्रोक्षणीपात्रं । वारणं वैकंकतमिति
रेणुः । आज्यस्थाली । चरुस्थाली संमार्जनकुशाः । उपयमनकुशाः समिधस्तिस्रः । प्रादेश

मात्राः। खादिरः स्रुवः। आज्यं। व्रीहितंडुलाः। दक्षिणापूर्णपात्रः। वरो वा। पवित्रे कृत्वा प्रोक्षणीसं
स्कारः। प्रत्येकं पात्रप्रोक्षणं। प्रणीताग्न्योर्मध्ये निधानं। आज्यनिर्वापः। चरुपात्रे प्रणीतोदकमा
सिच्य तंडुलप्रक्षेपः। चर्वाज्ययोः सहाधिश्रयणं। दक्षिणत आज्यं उत्तरतश्चरोः पर्यग्निकरणं
उभयोः। स्रुवप्रतपनं। संमार्जनकुशैः संमार्जनं प्रणीतोदकेनाभ्युक्षणं। पुनः प्रतपनं। आज्यो
द्वासनं। चरोरुद्वासनं। आज्योत्पवनं। अवेक्षणं। अपद्रव्यनिरसनं। प्रोक्षण्युत्पवनं। उपय
मनादानं। तिष्ठतः समिधः प्रक्षेपः। प्रोक्षण्युदकेन पर्युक्षणं। प्रणीतासु पवित्रकरणं। अ
न्निरूपणं ततः प्राङ्मुख उपविश्य दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धे स्रुवेण होमः। मनसा पूर्व
घारः। प्रजापतये स्वाहा। ॐ इदं प्रजापतये न मम इति त्यागांते ऽग्नौ द्रव्यप्रक्षेपः सर्वत्र त्यागां
ते द्रव्यप्रक्षेपः। इंद्राय स्वाहा। ॐ इदमिंद्राय न मम। ॐ अग्नये स्वाहा। ॐ इदमग्नये। सो
माय०। इदं सोमाय०। ततोष्टर्चहोमः। सर्वत्र होममंत्रेषु नान्ना नोपि स्वाकारः कार्यः। सर्वत्र
मंत्र स्रुक्स्रुहोति उपदेशादि स्रुक्लात्वा। त्वन्नो अग्ने० मुग्ध्यस्मत् स्वाहा॥ ॐ इदमग्नीवरुणाभ्यां

पद्धतिकारा... स्यस्येव

स्वस्य स्य ब्राह्मणाः

२१

२१

।इदं देवेभ्यो गातुविद्भ्यो० भूः स्वाहा। इदमग्नये० भुवः स्वाहा०

न मम इति। स त्वन्नो० रधि स्वाहा॥ इदमग्नीव० इमं मे० चके॥ इदं वरुणाय० तत्त्वा यामि मोषीः॥ इदं व
रुणाय० ये ते शतं० स्वर्काः॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम॥ अ
याश्चाग्ने० भेषजं। इदमग्नय०। उदुत्तमं० तये। इदं वरुणाय० भवतन्नः० मघवन्०। इदं जातवेदोभ्यां॥ इद
मग्निभ्यामिति वा त्यागः। ततः स्थालीपाकहोमः। अग्नये पवमानाय स्वाहा। अग्नये पावकाय स्वाहा।
अग्नये शुचये स्वाहा। अदित्यै स्वाहा। सुगमा त्यागाः। ततः पुनरष्टर्चहोमः। ततश्चरोः पादग्नये स्विष्ट
कृते स्वाहा। अ इदम० आज्येन। अयास्याग्नेर्विदः स्वाहा०। इदं वायवे। स्व० इदं सूर्याय० अप्स इदं भूः
इदं भुवः। इदं स्वः इति त्यागाः। इति वासुदेवमहाः। त्वन्नो अग्ने० स त्वन्नो अग्ने० अयाश्चाग्ने० ये ते श
तं उदुत्तमं। त्यागाश्चोक्ताः। प्रजापतये हा। इदं प्रजापतये। बर्हि होमः। स्वाहेति ॐ इदं प्रजाप
तये न मम इति त्यागः। ततो अवशेषप्राशनं। पवित्राभ्यां मार्जनं। पवित्रयोरग्नौ प्रक्षेपः। यत्रैदेवि
लिसं तत्त्वेद्धहिद्धग्निरसदिति लिंगात्। पवित्रयोः ससवने लिसलात्। ब्रह्मणे दक्षिणादानं। प्रणीताप्रण
एक ब्राह्मणभोजनं। ततः स्मस्पंतरोक्त ब्राह्मणभोजनं। अत्र मणिकावधानमिति हरिहरेणु

रू

प्रणीताप्रण यनं।

॥ अत्राग्रयदामः ॥ कश्चित् संस्कारांगत्वानुभवति ॥ यथाऽज्याहुतिहोमे ॥ आज्यात्स्थे अयणा यंगं॥
चेर्याहुतौ चरुसंस्काराः ॥ पर्यग्निकरणादि ॥ यस्येवा ग्निर्गोपचारस्तस्ये वा त्यग्नि दुरूपा जरसकत्स्या
कदीक्षितौ ॥ आधानेपदार्थोपचारेने मित्तिकमिति होमस्याभावः अगत्यभावात् ॥ नन्वग्निमंथनादू
र्ध्वं अग्नितत्रहोमः स्यादिति चेत् ॥ मैवं ॥ आवसथ्यशब्दो हि संस्कारनिमित्तः ॥ न जातिनिमित्तो न यो
गनिमित्तो वा ॥ संस्कारेषु सत्सु शब्दप्रयोगादर्शनात् ॥ अतश्च येपदार्था दृष्टार्था अदृष्टार्थाश्च पठ
तितास्ते सर्वे आवसथ्याधानशब्दवाच्याः ॥ एवं सति संस्कारैकदेशाभावेप्यनावसथ्यो ॥ अतः सकल
मेसमुदायावृत्तिरिति संप्रदायः ॥ तथा च कारिकायां ॥ अग्न्याधेयस्य मध्ये च विलिष्टं किंचिदाप्य
ते ॥ प्रायश्चित्तं न विद्येत आधानावृत्तिरिष्यते ॥ तत्राग्निमंथनादूर्ध्वं विशिष्टे मंथनादितः ॥ आव
र्तनमिदं कर्म पूर्वं च नांदिकं विना ॥ इति ॥ इत्यावसथ्याधानं ॥ आधानमध्ये पदापत्नीरजस्वला
तदा विशेषः कार्यः ॥ अर्वाकूपूर्णप्रदानाच्छेदाधाने स्त्री रजस्वला ॥ तच्छुद्धौ पुनराधानंमा
त्रपठनपूर्वकं ॥ स्नातांते अरणीतत्रयोनिः सैवोत्तरस्तथा ॥ आधानानंतरं चेत्स्यादशौचयुक्ता
कथंचन ॥ मणिकादि न कर्तव्यमपि देवोब्रवीदिदं ॥ आधानाद्ग्रहणा दूर्ध्वं न स्यात्तत्रैव सू
तके ॥ मणिकादि न कर्तव्यं कुर्यादिकादशेऽहनि ॥ बौधायनमतादेवं भारद्वाजमतादपि ॥ अत्र

११ मणिकवृत्त्यमानं समुद्रोसि शाम्भरित्यं तेन ॥ आपोरेवतीः क्षयथाहि वस्वः क्रतुंच भद्रं विभृथामृतं च ॥ रायश्च स्थस्वपत्ये स्वपत्नीः ११
११ सरस्वतीत द्रूणतेवयो धाः ॥ आपो हिष्ठेति तिसृभिश्चोदकुम्भः शोकुः ॥ ततो ब्राह्मणभोजनं ॥ ११

प्रायश्चित्तं देव भाष्ये ॥ पत्न्यां रजस्वलायां सूतिकायां वा प्रारब्धं कर्मक्रियेतरवेति गार्ग्यधरः ॥ तत्वापि
कांडमंडनः ॥ रजोदोषसमुत्पन्ने सूतके मृतकेऽपि वा ॥ नित्यं नैमित्तिकं कुर्यात् काम्यं कर्म न किंचन ॥ आधा
ने पुनराधानं पुत्रः सोऽमणीतथा ॥ चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रिया ॥ अकाम्यहेपि नैते प्रां
स्तत काम्या वनुष्ठितः ॥ प्रक्रांतेषु चैतेषु सूतकादि समुत्पद्येत ॥ कर्तव्यान्येव हौतानि वारितान्यप्यशेषई ति ॥
अतः प्रारब्धस्य सूतकस्य रजोदोषादावप्यनुष्ठानमेवयुक्तं न शुद्धिप्रतीक्षणं ॥ कारिकारमते तु आधा
नेन भवतीत्युक्तमेव पूर्वं ॥ अथ पुनराधाने निमित्तानि लिख्यंते ॥ अग्नावनुगते यस्य होमकालद्व
यं व्रजेत् ॥ उभयोर्विप्रवासे वा लौकिकाग्निर्विधीयते ॥ १ ॥ अनो विना समारूढं अर्ध्वं दशाम्याप
राह्ण नो ॥ हतोग्निर्लौकिको ज्ञेयः श्रुतौ सर्वत्र दर्शनात् ॥ कुरुक्षेत्रादि तीर्थानां गमने देशविप्लु
वे ॥ समारोपं विनैवाग्नी ज्ञोढे हेतुर्विपश्चितः ॥ आरोप्याग्नीनरण्योः स्वानुद्देश्ये तस्य हाग्निभिः ॥ देशे
ग्निर्यदि नश्येत मध्यमानो हुताशनः ॥ ग्रामांतरसीमांतरं गच्छेत् स ह्यो हव्यवाहनः ॥ आहुतौ वस
शंतिष्ठे पुद के नरा मंगतः ॥ शिक्ये नोद्वाहयेदग्नीन्पुनराधानमर्हति ॥ २ ॥ अग्निहोत्रे तारहितः

पंथानं शतयोजनं। आहिताग्निः प्रयायाच्चेद् अग्निहोत्रं विनश्यति। अथ स्वयमनुवृ [illegible] सो ह्यावयेस्
तिगादिना॥ तस्यास्य पुनराधेयं पवित्रेष्टिरथापि वा ॥५॥ विहृताग्निः सभार्यश्चेत् सीमामुल्लंघ्य
गच्छति। होमकालात्ययेत स्य पुनराधानमिष्यते॥ त्रेताचे बहुभार्यस्य प्रतिचारे तु गच्छति। पुनरा
धानमत्रैके इच्छंति नेतु सूरयः। दाहद्वयाग्निभिर्यैः सिद्धं त्रीन् पूर्वं संस्थितां॥ पात्रैश्चाग्निमा
दध्यात् कृतदारो विलंबितः। दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः॥ आहरेद् विधिवद् दारानग्नीं
श्चैवाविलंबयन्॥ जीवंत्यामपि पत्न्यां द्वितीयापरिणये कृते उत्सर्गो भ्रानीत्यस्या न्यया सह
पुनरादध्यादिति। स्मृतिचंद्रिकायां। भार्यायां विद्यमानायां द्वितीयामुद्वहेद् यदि। तदा वैवाहिकं क
र्म कुर्यादावसथ्येऽग्निमान् नूः। उपघात क्रियालोप उपेक्षा च प्रमादतः। चतुर्विधमिदं प्रोक्तं पु
नराधानकारणं। प्रसिद्धः कर्मणां लोप उपघातो रजस्वलादिना। उपेक्षणं प्रवासादि प्रमादोऽग्ने
रधारणं। स्पृष्टो यदि चांडालैः रुदक्यादिभिरेव वा। उपघातेषु सर्वेषु पुनराधेति सन्निधानं। यज
मानश्च पत्नी च उभौ प्रविवसितौ यदा। आहोमान्निवर्तेत पुनराधानमर्हति ॥१५॥ यदोभाव

श्री

२९ नि

२९

प्यतिक्रम्य सीमां प्रस्थागतो पुनः॥ होमकालमतिक्रम्यत दान स्यं पति वन्हयः॥ विनाग्निभिर्यदा पत्नी
नदीमंबुधिगामिनी॥ अतिक्रामेत्तदाग्निनां विनाशः स्यादिति श्रुतिः। पत्यंतरे यद्वापि वा पत्नी हुताशन
समीपगा। तदा पत्नी यथाकाममतिक्रामेन्नदीमपि। पत्नी सीमामतिक्रांता यत्नमानो गृहे यदि। आ
होमाद्यदि नागच्छेत् पुनराधानमर्हति। एकाकिनी यदा पत्नी बहिर्मार्यया गच्छति। तत्र नाशोऽपरेद्यु
ः भर्याघालेन दुष्यति। रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा॥ प्रवसन्नग्निमान्विप्रः पुनरा
धानमर्हति ॥२१॥ बह्वीनामपि चैकस्यामुदक्यायां तु न व्रजेत्। एकोऽपि चतुर्थेऽह्नि गंतुमिच्छन्नि
मित्ततः। त्र्यहं मुक्त्वा तु यो लोभात् प्रसेवेत सर्वसंधिषु। करोति पुनराधाने प्रायश्चित्तं मृणाहते। नाग्नि
कार्यस्य वेलायां प्रवसेन्न च पर्वणि। अविनाच निमित्तेन श्रौताग्निर्यतु न व्रजेत्। नदीसंतरणा
नीनां सीमातिक्रमणे तथा॥ सर्वत्राग्नेः तसीम्नो वा स्वामिस्पर्शात् सुरप्रनयः। प्रसह्य मरणीक्षु
रेवान्यथाग्निविनाशनं॥ आरंभणं पक्षे तु र्ननारंभणमिष्यते। तत्र नानारभेदग्निं पुन
राधिरुदाहृता॥ न कार्यारंभणं किंचिल्लो [illegible] ॥ इत्यादिनिबंधनात्॥ उदक्या चेदुवे सपत्नी प्र

स्नातस्त्रवं सत्यपि ॥ अन्वारंभविकल्पत्वात्पुनराधिर्नतन्मतात् ज्येष्ठान्वारंभवेबद्धेः बहुभार्यस्यनेतरः ॥
नरुच्येकश्मिन्नीपालिप्रयायाद्यग्निभिः सह ॥ राष्ट्रभंगेऽग्रांदसंज्ञाप्राप्ताबुचितेयानीमहरौ ॥ अन्यथाहि
प्रवसंस्तोवृत्तयोल्लौकिकाः खलु ॥ राष्ट्रभंगेऽग्नीदागमनेप्राप्तेदेशेमनसंपती ॥ गुह्या अत्रलुप्तेनस्मा
र्त्तिग्नीः सर्वमीरितं ॥ सायंप्रातर्हुतिसर्वमिवंस्यान्मनेन्चह ॥ यस्त्वग्न्यो जेयमात्माधर्दत्तलवाम्यन्नमा
यिकः ॥ पत्नीविरहितोवह्निर्न्यथाकामंसानिर्हरेत् ॥ होमं हूयास्य पेदर्शपूर्णमासास्य जेतथा ॥
न पैरेनगिन्मादध्यादितिभार्गवशासनं ॥ बहुभार्यस्तोऽग्निरावसथ्याः केपंचन ॥ आवदेकोऽपि
तिष्ठे न तावदन्योनमथ्यते ॥ वैश्वदेवार्तथाहोमाय्याज्ञेयंनैवमंथनं ॥ एकेनोन्नरितोवह्निरावसथ्य
स्समथ्यते ॥ आवसथ्यात्तु कर्मार्थं योग्निरुद्धियतेक्वचित् ॥ पूर्वेण यो जीयत्वातंतस्मिन्हो
३० मोविधियते ॥ चतुर्विंशतिमते ॥ प्रातर्होमंतुनिर्वर्त्यसमुद्धृत्यहुताशनात् ॥ रोषं महासने
रे न्यस्त्वा तत्र पाकं समाचरे[illegible]त्रांत तोऽस्मिन्वैश्वदेवादिकंसकुर्यादंतंद्धृतः ॥ बहुर्त्यकारिकाय ॥ ३०
तमग्निंपुनराहृत्यशालाग्नावेवनिक्षिपेत् ॥

नित्यपाकाय शालाग्नेरेकदेशस्यकार्यते ॥ पाकार्थमुल्मुकं हृत्वात्रअपक्वं माहानसे वैश्वदेवोग्न्यागा कं
रस्यापि पाकार्थोग्निश्चलौकिकः ॥ नरिपाकोऽन्नैवपचेत् श्राद्धादाबुत्सवेषु च ॥ हुते चैव वैश्वदेवे च लौकि
कोनैवकार्यतः ॥ होमेनानौतीरतः केचिदाहुः सर्वत्र लौकिकं ॥ नतत्स्मे मंडं संते ग्रामुपयद्धौ मदग्नीना
तु ॥ समासं चोल्मुकस्याहूरग्न्यागारे माहानसात् ॥ पाकांते वैश्वदेवाद्योङ्के तदप्युपपद्यते ॥ आहृते
उल्मुके पाकः शाग्निर्ह्रे हूरपतेपद्रेगे ॥ वच[illegible]नोहाताः सा तु लौकिक स्यपवगतिः ॥ दीपको धूप दा ५
पोके कश्चैव तौ पार्श्वं यश्च नीयते । सर्वे ते लौकिकाः ज्ञेयास्तावन्मात्रापवगतिः ॥ पचनाग्नौ पचेदन्नं
सूतके मृतके पि[illegible]वा । अपक्वातु वसेद्रात्रिं पुनराधानमर्हति । अरण्योर्दग्धयोर्वापि नष्टयो
श्चीणयोस्तथा । आहृत्यादौ समारोप्य पुनस्तत्रैव निर्मथेत् । अरण्योरल्पमध्यगं यावत्तिष्ठ
नताय ति पूर्वयोः पुनराधानमन्यारण्योर्विधीयते । पूर्वैर्वयोनिः पूर्ववत्पुनराधानकर्मणि । एका
किनीयदा पत्नी कदाचिद्ग्राममाव्रजेत् । होमकाले पि संप्राप्ता न सा दोषेण युज्यते । अप
तत्रैव प्रवसेद्ग्रामे गाहाप्रमादतः ॥ लौकिको ग्निः सविज्ञेयः इत्येषा नैगमी श्रुतिः ॥ भार्या

ए

या प्रोषिता यां चेदुदेसकौंस्तमेतिवा। तत्र स्यात्पुनराधेयमन्ये त्वाहुर्विहान्यथा॥ पत्न्याः प्रवा
सविषये पुनराधीरुदाहृता। वाक्यैर्मनीषिभिः प्रोक्तैरेकभार्यस्य सेष्यते। अनुमार्यस्य ज्येष्ठा चे
त्प्रवसेत्पुनराहितिः॥ ज्येष्ठा चेदग्निसंयुक्ता गच्छेत्स्वन्या यथा रुचिः॥ यजमानेन सहिताय ज्ञातार
व केवला॥ किस्यामपत्निछंस्यामग्निहोत्रं सोपतः॥ पतिस्तिष्ठति चेदग्निना शेने सपरेदन्ययु॥ मी
यदा सीमामति क्रम्यराज्ये तत्रैवकत्स्यति। आगृहस्य प्रयाणयत्प्रवास उच्यते बुधैः॥ यत्पुनारा
यणो नो कंयामा ज्ञाग्निसमन्वितात्॥ ग्रामाग्रामांतरे वासः प्रवासोप्यमीदृशः॥ ग्रामांतरे॥ य
न गार्यावापत्न्यां वान्यत्र वा क्वचित्॥ सिमामतिस्य चेद्द्रात्रौ वाश्मः प्रव स्मनं स्मृते॥ प्रवेसं पर्येनाति सेधन
पर्यायकदाचन॥ इति कूर्मपुराणोक्तं तथा बौधायनेनच॥ सहाग्निर्वसेपत्निको गाच्छेत्तीर्थानि
३९ मानवः॥ पुराणेवच नासक्तेः प्रवासोस्तीतिकेचन॥ न कुर्याद्ग्न्युपस्थानं प्रवासे सोमी ३९
योषितः॥ त्यागात्प्रोषितास्कुर्युरश्मसेवसधर्मकं॥ आगतोपस्थितिं चापिस्त्रीणांने

छंति स्वरूपः॥ स [illegible] गृहस्य प्राणयत स्वाग्निसमन्वितं॥ क्लिष्टचेतसं तु [illegible] व स्वर्धमनसा सह गच्छति।
अनस्यारोपयेदग्निं स्त्रहाञ्चाप्यपितत्र च॥ स्वांगेन वानयोदग्निकात्सायनमतादपि। न येद्वेणास्व श्रा लर
न्योयोयाज्येन समन्वितः॥ प्रत्यहे छानयन्नग्निमुच्छुसेच्चेद्विनश्यति। यदि वानुच्छुसन्नी ह्यानिधायोच्छु
नु स्यतं पुनः॥ हरेदुच्छुसंत्रैवं न स्याद्विहरणे नलः॥ शाकटेनापि दूरं वा हरेदेव यथा [illegible] रुचिः॥ स्त्री
गोनेवाप्यवा स्त्रस्यापरा सात्वाक्ष्ये ष्वंसन॥ कर्मार्थं हरतो ग्नीनां नानुषीसादि चोद्यते। कात्याय
नमता के चिच्छुसंतोप्यतिदूरतः॥ प्रतापक्षेत्तान यं स ग्नीनूशकटेन विनाप्यनु॥ आधानवसरे ज्ञा
तेयद्याधातु रूपद्रवः॥ अरक्षिर्नाम सा प्रोक्तातत्र स्यात्पुनराहितिः॥ उद्धाते [illegible] ग्नेविहाराद्धान्कृमध्य
माने प्यत्र त्मनी। लोकान्यादाव निक्षिप्सेभ्युदयेस्तमयेपि वा॥ विनष्टहेतुना नेन जातवेदा
विनश्यति। विहारोत्तरकालेवा नष्टे पूर्वापरौ नलो॥ रो बंप्रबोधितं स्वत्र आप्यग्निर्विन
श्यति। [illegible] ल्यवेहनिर्मथ्य लौकान्यादिभ्य काला २
चेद्यदि। उदयास्तमयात्स्वर्वक कौञान्त्रामिच्छति। लोकान्यादावलव्धेपि पुराकोस्तमयोदयात्।

मंथनारंभमात्रेण नाशो वह्नेर्निवारितः। उभयोर्नाशविज्ञाने पूर्वमर्कोस्तमेति चेत्। कर्कोग्निनाशमाचरेत् पश्चात् तज्ज्ञाते पि नेष्यति। [illegible] रकयोर्नित्य पक्षे पि सर्वात्यनुगामो यदि उदयास्तमये तत्र नाशो मेके न तु भयोः। अथ चेदुभया दाते स्तुदपास्तमौ तु रा॥ परे ग्निरेको ज्ञातश्च तावता पि न नश्यति। तदनुगति मात्रेण स्याद ग्न्याधिर्न पूर्व योः॥ समेत्वेबिर्सं समारूढो रण्योरसनि वा यदि। तत्रैवैनं तौ स्याद समारूढाग्नि वत्। आरूढोपि यथाशास्त्रमवरूढोन शाखतः॥ तृतीये होमकाले थ संप्राप्ते पुनराहितः॥ यदा तु लौकिकाग्न्यादिनि [illegible] नंतदा। यदा तु लौकिकाग्न्यादो मध्यमानोप्यनंतरं॥ द्वितीया द्वा तृतीया द्वा होमकालात् पुरा यदि। अग्निर्न ज्ञायते तत्र पुनराधेयमाचरेत्। हुते षु पक्ष होमेषु पक्षत्रयमनंतरं॥ कर्तव्यं पुनराधेयं मध्यमानो हुताग्निः। दृष्टमात्रो नुदृष्टे च त्वेतत् तस्य विनाशनं॥ शांत शेषानुगमे [illegible] चान्ये पुनर्निर्मथ्य कल्प्यते। नष्टे मथितमात्रेवा समारोपयत्तु तं पित्वा पुनर्निर्मथ्य कल्पयत्यं यत्तु स्तु पावरोहणं। कालेन हेतुना वह्निरुपशांतो यदा भवेत्। कर्तव्यं पुनराधेयं यज्ञपार्श्वेति रूपितं। तदेव पुनराधेय ३२

मग्नावनुगते सति॥ असमाधाय चेत्स्वामी सीमामुल्लंघ्य गच्छति। श्वसूकरकराभकाकभगालैः॥ कुक्कुटमर्कटभ [illegible] अंत्यजपातुकीभिर्मिः कुणपैर्नस्ततिकर्यारेरनस्वलयावा। रेतोमूत्रपुरीषैर्वा पूयास्रश्लेष्मशोषितैः॥ दुष्पास्थिमांसमज्जाभिरन्येवा पि जुगुप्सितैः॥ आरोपितारणिस्पर्शोकृते ग्नेः स्पर्शनेपि॥ आसारूढेषु मज्ज्ये द्वावुद् द्वापतितादिभिः॥ अथवा योषितं गच्छेदन्तेते कामतो हितः॥ वदंत्येषु निमित्तेषु केचिदग्निविरोनीनं॥ तत्रारणिगतो वह्नौ नष्टे स्यात् पुनराहितः॥ इतरेषु निमित्तेषु आग्न्याधेयं प्रचक्षते यद्वा सर्वोपघातेषु पुनस्त्वेति समिंधनं॥ द्रव्यस्थान्युप घातेषु द्रव्यशुद्धिः समिंधने॥ समिंधनं पुनस्त्वारूढ इति मंत्रेण समिंधनस्याप्यग्नेः पुनरिंधनप्रक्षेपेण प्रदीप्ततरकरणं॥ आरोपितारणीचोमेरकावा यदि नश्यति। तत्राग्न्याधेयमिच्छंति पुनराधेयमेव वा॥ इस्त नारोपितारण्योः क्षये गाहेन वेपुनः। तदलाभे यदेहायादत्र स्यात् पुनराहितः॥ अरसो दर्कांत्स्वकाके श्च पातिता मेध्य रासमैः। अनारूढारणिस्पर्शे तो विहायान्ययोर्ग्रहः॥ भवतन्नः समनसेप्रस्तु मज्ज्येयदूषितारणी॥ रकारुण्ये वदुष्टाचेत्तामेवा

स्पुनिमज्जयेत्॥ तत्रारण्यारणि लाभाभावेतु दीप्ते पुनराहितिः॥ काष्ठमुध्यावि ज्ञोध्येवाप्सु क्षेप्तो दोषे
ति संतते॥ नष्टायामरणौ यावदग्निस्तिष्ठति वेश्मनि॥ तावद्धोमादिकं कृत्वा तन्नाशे पुनराहरेत्॥
प्रागादिस्थोदयाद्धोमे संकल्पेन [illegible] जुहो [illegible] तिचेत्॥ अग्न्याधिः पुनराधिर्वानो भयं स्वाम्य संनि
धौ॥ नाशापहिरावग्नीनां यदारूढारणेर्यदा कुर्याच्च पुनराधेयमिति बोधायनोऽब्रवीत्॥
अत्रेते श्रुनिमित्ते ष्टु नष्टानां पुनराहितिः॥ स्थितानुत्सृज्य चान्येषु पुनराधेयमिष्यते॥ अग्नि
होत्रं च निस्येष्टिः पितृयज्ञ इति त्रयं॥ कर्त्तव्यं प्रोषिते पत्यौ नान्यत्स्वामिक्रियान्विते॥ नैमि
त्तिकाः स्तके जाते ष्टिर्गृहदाहेष्टिपूर्विकाः॥ स्वाम्यागमनपर्यंत मुत्कृष्य व्याहृयशेषतः॥ अगन्या
धेयादिकं प्राप्तमनुभयानुगमादिना॥ स्वाम्यागमनपर्यंत मुत्कृष्यव्यमसंशयं॥ मथिता पाव
कं सर्वप्रायश्चित्तिं विधाय चाभिसंत्रायेऽग्न्यादिर्भि [illegible] वा द्वादशानुगमात्कृतिः॥ अग्निहोत्रं य
यथा [illegible] काले निस्येष्टिं च समाचरेत्॥ आस्वाम्या [illegible] गमनाग्निषेदा गत्वा पाद धीतसः॥
एवं केनाव सिद्धान्तात्प्रोषितस्याग्नि शुश्रूषा यः॥ आवश्यं भाविनी मुख्या स्धुनाव क्ष्ये मतां

५ सुतकादावनुच्छित्तिः॥ अनामेष्वपि चैतेषु॥ ६

तरं॥ काम्याः क्रिया न कर्त्तव्या स्वामिनी प्रोषिते सति॥ नित्या [illegible] नैमित्तिकीः कुर्यात्सु सर्वस्यापिम
न्तरि। तत्रापि नैव कर्त्तव्याः क्रियाः सोऽत्र स्वेदिकाः॥ आधाने पुनराधाने नस्तः पत्न्याः प्रवासि
नी॥ उभयानुगमा [illegible] दौतु प्राप्ते गन्याधेयतः पुरा॥ न किंचिद्दक्षिहोत्रादि कर्त्तव्यामि
ति दर्शने॥ रजोदोषसमुत्पन्ने सूतके मृतकेऽपि वा॥ नित्यं नैमित्तिकं कुर्यात्काम्यं कर्मन
किंचन॥ आधाने पुनराधाने पशुः सोत्रामणी तथा॥ चातुर्मास्यानि सोमश्च तथैवाग्रयण
क्रिया॥ अकाम्यत्वेऽपि नैते षां सूतकादिसमुद्भवे कर्त्तव्यान्येव चैतानि वारितान्यप्यशेषतः॥ ज्ञा
तो पि वा विनाभस्मस्पर्शं ज्ञातत्वं विना॥ प्रायश्चित्तं विष्णुमंथने चोदितं विना॥ होकिंकाः स्या
[illegible] दतो [illegible] लुसादरभ्यावर्त्तयेत्पुनः॥ यदि चावर्त्तयेद् [illegible] न्होताद्दैवपदश्रुतेतिच॥ ह्रुयमाना
पितु प्येतद्धोमकाताष्टका पुरं॥ भस्मस्पर्शं विनाप्येके लौकहेन मन्यते होमाष्टकाधिकेतु
हिध्यतोप्याज्ञि विन श्यति॥ अतोल्पहोमलोपेपिय दुष्काष्टेदिन श्यति॥ आधान पुनराधा
नेविकल्पेनात्र चोदिते॥ लुप्तेहोमद्वये प्राह लौगाक्षीरनेलाहितिं॥ स्वस्त स्वग्निपुक

नाका

र्त्तव्या तंतुमस्यैव केवलं ॥ आपद्यग्निषु दीप्यत्सु मासार्द्धे चेन्न हूयते ॥ सर्वहोमानतिक्रांतान्प
श्चात्तस्य होमं वदेत् ॥ समस्य त्तु तु पापस्ध्यादिष्टिस्तंतुमती भवेत् ॥ न तत्र पुनराधेयमिति कौत्सीत की
र्त्तितः ॥ वत्सरं वत्सरार्द्धं वा होमलोपे मतांतरं ॥ आपत्काले [illegible] न नश्यंति दीप्यंते चेद्धुताशनाः ॥
पं चकार्याः पुरोडाशा होमं तु सेर्द्धवत्सरे ॥ पथिकृद्यस्य मा इष्टिः पावकः शुचिरेव च ॥ व्रतपतिस्तंतुमां
मो श्चाग्ने दैवतौ गुणाः क्रमात् ॥ सम्यकुर्यात्पुरोडाशान्होमलुप्ते तु वत्सरं ॥ पवमानः पावकश्च शुचि
३४ पथिकृदित्यपि ॥ वैश्वानरोत्र तपतिस्तंतुमानिति सप्तमः ॥ विशेषितोग्निरेव स्याद्देवतात्र यथाक्र ३४
मं ॥ एकारंभपराद्धंति विच्छेदेष्वपि शेषतः ॥ मनस्वंती व्रतस्युती नाधानमनलेसति द्वयमापत्सु घो
रसु मिलितारूपयोक्ष्यते ॥ द्वादशाहात्तु विच्छेदे कुर्युरन्ये मनस्वंतीं ॥ अरण्योः क्षयनाशाग्नि
दाहेष्वग्निं समाहितः ॥ पालयेदुपशांते स्मिन्पुनराधानमिष्यते ॥ एकारण्यां विनष्टायां मस्ति
चेदितरारणिः ॥ तं छित्वा मंथने प्रोक्तं भाष्ये बौधायनीयके ॥ अरणीमंथनाशक्तेन्नं तु मि
र्मथनेन वा ॥ स्यातां चेदरणीनूने ग्राह्ये शास्त्रोक्तलक्षणे ॥ श्वो भूते तु ष्ठिते दर्शे तस्मिन्नडी

उद्बुध्यस्वाग्ने इत्यनेन योनिरित्यपि ॥
र्णारणिद्वयं ॥ शकलीकृत्य ताम्रौ तस्यैवाग्नौ निक्षिप्य दीपयेत् ॥ ततो दक्षिणहस्तेन नूतनामुत्तरारणिं ॥
गृहीत्वा सव्यहस्तेन गृह्णीयादधरारणिं ॥ ते उभे अरणी तत्र दीप्ते ग्नौ धारयन् जपेत् ॥ उद्बुध्यस्वा
ग्ने प्रविश त्वयोनिमित्यादिव यत्सायेत्यो ते वेजातवेदः ॥ अरण्योररणीमनुसंक्रमस्व जीर्णां तनुम
जीर्णयानिर्णुदस्वेति ॥ प्रथमो मंत्रः ॥ मंथनं स्यादत्रा सम्यक् मथिताग्निविहत्य च ॥ विलाप्य त्वाज्य
दर्भाभ्यां स्रुच्यादाय चतुर्ग्रहीतं ॥ जुहोत्याहवनीये ग्नौ मनस्वत्साद्ध्यतां यथा ॥ इष्टिं तंतुमतीं कुर्यात्
णा छरावं [illegible] दक्षिणां दद्यात्सुवर्णं प्रादेशमात्रं तु शरावं निमोदितं ॥ इत्यन्यशोपितोरण्योः क्षये
ग्राह्ये नवे पुनः ॥ तदलाभे यदोद्वाये न दास्याम् पुनराहितिः ॥ कामेष्विमि त्वयोगे वा पुनराधेयमिष्यते ॥
निमित्तेषु यथायोगमाधानमपि वा भवेत् ॥ तत्र येषु निमित्तेषु भूरगमाहिकया धिः ॥ विधि ॥ तत्रैव
पुनराधेयमन्यथाधानमिष्यते ॥ अन्यत्राप्यपरे प्राहुः पुनराधिविकल्पनं ॥ यदि तत्र वै डीनाया
लं [illegible] स्तुर्वीत्वास्यैक वत्सरं ॥ तत्त्वाशोपुत्रमत्र्यायां शाक्तिनामवशेधने ॥ पुण्यान्यन्यानि
कुर्वीत श्रद्धधानो विमत्सरः ॥ न व ल्प्यः दक्षिणेर्यज्ञैर्यजेतेह कथंचन ॥ इंद्रियाणि च शाः स्वर्गा

मायुःकीर्तिप्रज्ञां पशून्॥ हंस त्येन न धवेनैव विप्रो नल्पं यजन्॥ इति पुनराधान राधेयं योनि
मित्तानि॥ अथ पुनराधाने प्रायश्चित्तक्रमः॥ तत्र प्रमा[illegible]दोग्निरात्रमग्निस्तागे प्राणायाम शतं॥
विंशति रात्रे एकदिनोपवासः॥ मासद्वये त्रिरात्रमुपवासः॥ अब्दे प्राजापत्यकृच्छ्रः॥ एवं त्यागानु
सारेण प्रायश्चित्तं कृत्वा पुनराधानं॥ आलस्यादिनाबुद्धिपूर्वकमग्नित्यागे तत्कालानुसार
ेणैं द्वादि[illegible] प्रायश्चित्तं॥ द्वादशाहपर्यंतं त्रिरात्रमुपवासः॥ मासपर्यंतं द्वादशरात्रमुपवासः॥
अब्दपर्यंते। मासं पयोव्रतं। द्विवर्षपर्यंतं चांद्रायणं॥ अब्दपर्यंते चांद्रायणं। सोमायनं तद्ध
र्ध्वं अब्दद्वये धेनिनो गोदानं चेति प्रयोग पारिजाते॥ स्मृत्यर्थसारे तु। द्वादशाहातिक्रमे त्र्य
हमुपवासः॥ मासातिक्रमे द्वादशाहमुपवासः॥ संवत्सरातिक्रमे मासमुपवासः॥ पयोभ
क्षणं वा इति विशेषः॥ एवं कालविलंबे संकल्पपूर्वकं प्रायश्चित्तं कृत्वा पुनराधानं॥ यत्र तु
केनचिन्निमित्तेनाग्निनाशः कालविलंबश्च नास्ति। तत्र प्रायश्चित्तं पुनराधाने। यत्र तु केन

मि चिन्निमित्ते[illegible]नाग्निनाशः कालविलंबश्च नास्ति तत्र प्रायश्चित्तमकृत्वैव पुनराधानं॥ नि

स्त्रियां विधाय देशकालौ संकीर्त्य तावंतं कालं आवसथ्याग्निविच्छेदजनितप्रत्यवायपरिहा[illegible]रा
र्थं एतावत्प्रायश्चित्तममुकप्रत्याम्नाय हेम्नोऽहं करिष्य इति संकल्पः॥ [illegible]लुप्तानां होमानां तंतुलादि
द्रव्यं ब्राह्मणाय संप्रददे इति होमं दद्यात्॥ सायंप्रातर्होमानंतर्यादर्शपौर्णमासस्थालीपाकानां
च संनिपर्यासे। व्रीह्यादि द्रव्यमात्रं च दद्यात्॥ इति प्रयोगरत्ने॥ ततः शुभे काले शुचिराचांतः प्राणाया
म्य देशकालौ स्मृत्वा विच्छिन्नस्यावसथ्यस्य पुनराधानं करिष्य इति संकल्पः॥ नांदीश्राद्धाभावः।
स्वरे पंचभूसंस्कारादि ब्राह्मणपर्यंतेऽग्निमाधानवत्सर्वं कार्यं। अथ सभार्यस्य प्रवास प्रसक्तोऽग्नि
समारोपविधिः॥ प्रातर्होमानंतरं अरणी यदि मथंते योनिरिति मंत्रेणावसथ्य प्रतपति। अथवा
या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानं[illegible]च्छा वसूनि कृ[illegible]ण्वन्नर्य्या पुरूणि यज्ञो भूत्वा
यज्ञमासीद स्वां योनिं जातवेदो भुव[illegible] आजायमानः इति मंत्रेण पाणी प्रतप्याग्निं समारोपयेत्॥ तस्मादुत्क्षरणकाले अरणी समारोपे अरणी निर्मथ्य प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो
हव्यं वह नः प्रजानन्। प्रजां पुष्टिं रयिमस्मासु धेह्यथा भवयजमानाय शं योः॥ इत्यनेन ख
इति अरणीपक्षे समारोपः॥ आहरणपक्षे तु अयं ते योनिरिति मंत्रेणाश्वत्थस्य समिधमावसथ्ये
प्रतपति॥

१माह सत्यरेपं चमूसंस्कारान् इत्युग्निं १

रेग्निस्थानं पे॥ अत्र यु समित्समारोपणं वैश्यादिगृहादग्निं स्थापयित्वा प्रत्यवरोहेति मंत्रेण तां समिधमग्नौ निदध्यात्॥ आत्मसमारोपपक्षे सर्वदा स्वरूपस्य इन्धिनिवृत्तेनिमज्जनेन। स्नानं स्त्रीगमनं चाकुर्वन् मूत्रपुरीषोत्सर्गौ शौचमकृत्वा चिरकालमतिष्ठन् होमकाले आत्मसमारूढम् ग्निं उच्छ्वासरूपेण प्रत्यवरोहेति मंत्रेण लौकिकाग्नौ निदध्यात्॥ एवं यथाधिकारमग्निं प्रतिष्ठाप्य होमं कुर्यात्॥ इदं समारोपणं द्वादशरात्रपर्यंतमेव कुर्यादिति प्रयोगरत्ने॥ कातीयानां त्वरणी समारोपः श्रौते दृष्टः तद्वत्स्मार्तेपि कार्य इति शिष्टाः॥ समित्समारोपेपि अयंते योनिरिति मंत्रेण समारोप्य प्रादुःकरणकाले लौकिकमग्निं स्थापयित्वा तूष्णीं समिधमादध्यात् इति वृद्धाः॥ वस्तुतस्तु कातीयानामपि समित्समारोपः। शाखांतरोक्त एव भवति। स्वशाखायां समित्समारोपस्यानुक्तत्वात्। आवसथ्याधानं दारकाले इत्युक्तं। दारग्रहणं कथं क्रियते तदुच्यते तत्र वरस्यार्घदानं स्मर्यते तत्प्रसंगेन यावंतोर्घ्यास्ते कथ्यंते॥ षडर्घ्या भवंति। अर्घ पूजायामिति धातोर्भावे घञ्प्रत्ययः। न्यंकादित्वात्कुत्वं। ततो दंडादिभ्यो यदिति यत्प्रत्ययः॥ अर्घमर्हंती त्यर्घ्याः॥ षट्पु

३९

रुषाः अर्घार्हा भवंत्येतीर्थः। तानाह॥ आचार्यो ऋत्विक् विवाह्यो राजा प्रियस्नातक इति। उपनयनपूर्वकं कृत्स्नवेदाध्यापिता आचार्यः। ऋत्विजो दक्षिणापरिक्रीतः कर्माणि करोति। विवाह्यो जामाता॥ राजदंडपूर्वं परिपालनकर्ता प्रियो इष्टस्तु लक्षणः तिः समानजातिर्वा स्नातको ब्रह्मचर्यात्समावृत्तः। तस्य चार्हणमाचार्यकर्तृकं स्मृतं। ते प्रतीमं स्वधर्मेण ब्रह्मदायहरं पितुः॥ स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवेति। एवं सूत्रे षट्ग्रहणं प्रियस्नातकयोः पृथक्कूलज्ञापनार्थं। प्रतिसंवत्सरोर्हयेयुः। न प्रतिसंवत्सरं गृहे आगतानाचार्यादीनर्घेणार्चयेयुः। न संवत्सरादर्वाक्। प्रतिसंवत्सरानर्हयेयुरित्यविशेषेणोक्तत्वाद् ऋत्विजोपि संवत्सरांतेर्हयितव्या इति प्राप्ते आह॥ यक्ष्यमाणास्तु ऋत्विजः॥ ऋत्विजस्तु यक्ष्यमाणा यागकाल एव पूजनीयाः। न ततोन्यत्र। इदं सूत्रं हरिहरेणान्यथा व्याख्यातं। यज्ञं करिष्यंतो यजमानाः॥ ऋत्विजो पूजकानिति॥ पूजनीयास्तु तेः कालस्य॥ इदानीमर्हणप्रकारमाह। आसनमाहार्यहसाधु भवानास्तामर्चयिष्यामो भवंतमिति। अर्घ्यासमासनं पीठादि आसनमाहार्येति। प्रेषपत्केनैवानुचरद्वारानाय्य साधु भवानित्यर्थतः अर्घ्यं प्रतिवदति। अर्घ्यं प्रत्यध्ये षड्जमनतत्॥ यि

प्याहरंति विष्टरं पाद्यं पादार्घ्यमुदकमर्घ्यमाचमनीयमाहरंति॥ तत्र विष्टरस्त्रिवृद्दरलीमात्रः॥ कौशो रज्जुविशेषइति। भर्तृयज्ञः॥ प्रादेशमात्रं त्रिवृत्तं कौशं वा कुशानिर्मितं॥ विष्टरं स्तरयः प्राकुरमावे बल्वजादिभिरिति रेणुकः॥ पंचविंशतिदर्भतरुणामयमिति हरिहरः॥ पंचाशद्भिर्भवे द्ब्रह्मातदर्धेन तु विष्टरइति परिशिष्टात्॥ पादयोरन्यमिति वचनादत्र द्वयोराहरणमिति भर्तृयज्ञः॥ पाद्यं पादयोरधस्तात्सन्निधानार्थं विष्टरं॥ भर्तृयज्ञमते पादप्रक्षालनार्थमुदकं पद्यशौन। पादार्घ्यमुदकं सुखोष्णं। अर्घशब्देनोदपात्रमेवोच्यते। तत्रैकमुदपात्रमुपनिनयंतीं यथा राज्ञ आगतायोदकमाहरेदेवं तदति लिंगात्॥ उदकं गंधपुष्पा क्षतबदराणीति भर्तृयज्ञः॥ गंधपुष्पाक्षतकुशा तिलशुभ्रसर्षपदधिदूर्वान्वितं सुवर्णादिपात्रस्थमुदकमितिहरिहरः॥ आचमनीयमाचमनार्थमुदकमेव। दधिमधुघृतं एकस्मिन्कांस्यपात्रेणापिहितं मधुपर्कशब्देनोच्यते॥ मधुपर्के दध्यालाभे पयो ग्राह्यं यो प्रतिनिधिः मध्वालाभे घृतं गुडो वेत्साश्वलायनः॥ अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि। अर्घ्यइतुर्थीति रिक्तोन्योविष्टरादी निद्रव्याणि त्रिस्त्रिर्वार त्रयं वदति वि

३१

स्तमपरे

यं

कूर्च

पा ५ द्वे

२७

ष्टरो विष्टरो विष्टरः प्रतिगृह्यतामित्येव। विष्टरं प्रतिगृह्णाति वर्ष्मोस्मि समानामुद्यतामिव सूर्यः॥ इमं तमभितिष्ठामि यो मा कश्च। मि दास्त तीत्येनमभ्युपविशति। ततो ध्यार्घ पितुः सकाशाद्विष्टरं तच्छिमिव प्रतिगृह्य तं विष्टरं आसनेनिधाय वर्ष्मोस्मीति मंत्रेणोपविशति ग्रहणोपवेशनयोर्मध्ये पतितोपि मंत्रइमं मभितिष्ठामीति लिंगादुपवेशने विनियुज्यते। पाणिभ्यां विष्टरप्रतिगृह्यइति हरिहरः तरतीव मंदं। प्रमाणमित्रस्यायमर्थः॥ अर्घ्यमास्मानं स्तौति। अर्घ्यहा कुल यकुलज्ञानाचारवपुर्वयोगुणै रहं समानानां सज्जातीनां मध्ये वर्ष्मः श्रेष्ठः अस्मि भवामि। उद्यतां उदयं प्रकाशं कुर्वतां ग्रहनक्षत्रादीनां मध्ये सूर्यइव किंचाइमे विष्टरं तं पुरुषमुद्दिश्य विष्टरवत् बद्धं अभिलक्षीकृत्य तिष्ठामि अधः करोमि पर्युपविशामि यः कश्चन मां अभिदासति उपक्षीणं कर्तुमिच्छति। दस्युउपक्षये। पादयोरन्यं विष्टरआसीनायउपविष्टाय पादयोरधिधानार्थमन्यं विष्टरं ददाति एतच्च पादप्रक्षालनोत्तरं द्रष्टव्यं। तथा सति दृष्टार्थता स्यात्॥ प्रक्षाल्य हि पादौ विष्टरे क्रियेतइति। तेनात्रार्थेन पाठबाधः॥ तदुक्तं॥ विरोधेर्थस्य परत्वादिति॥ सव्यं पादं प्रक्षाल्य दक्षिणं

घस्तात्

तथ

भावात्

पाद्य

हरः॥५

ज्येष्ठः६

विष्टरे आसीनाय ३

प्रक्षालयति॥ ब्राह्मणेभ्यो दक्षिणं प्रथमं॥ विराजो दोहोऽसि विराजो दोहमशीय मम पद्याय विरा
जो दोह इति। ततः पाद्यं प्रतिगृह्य विराजो दोहो[…]शीति मंत्रेण सव्यं पादं प्रक्षालयति॥ क्षत्रिया
दिष्वयं॥ ब्राह्मणेष्वस्यान्त्र दादक्षिणं पादं प्रथमं प्रक्षाल्य सव्यं प्रक्षालयति मंत्रार्थः। प्राण
धारणादिगुणैः सकलसोऽहि[…] न विविध तपाराजाई इति वैराजन्नं तस्य विराजो दोहः परिणा
मसारो रसः। स त्वमसि मव[…]॥ हे उ[…]दक ते त्वां विराजो दोहं अशीय॥ अश्नुवै व्याप्नुयां॥
किंच मयि विविधेय पाद्याय पादयोः साध्वी सपर्या तस्यै तदर्थं विराजो दोह॥ मंत्रसंस्कृतं त्वं भ
वेति शेषः॥ अर्घ्यं प्रतिगृह्णाति। आप[…]स्थ युष्माभिः सर्वान्कामानवाप्नवानीति। अर्घ्यः समर्पितः॥
अर्घ्यं प्रतिगृह्णाति। आपस्थ युष्माभिरिति मंत्रेण। मंत्रार्थः। हे आपः यूयं आपः स्थ अभिहित
वः। भवथ युष्माभिः कृत्वा सर्वान्कामान् अभिप्रेतार्थान् अवाप्नवानि […] लभेयं। निनयं त्वभि
मंत्रयते समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत॥ अरिष्टास्माकं वीरा मा परासेचि मत्पय
इति। तमर्घ्यं भूमौ निनयन्न प्राययन्नभिमंत्रयते समुद्रं व इति मंत्रेण नतु मंत्रांते […]। अर्घ्यं

अ

प्रक्षाल्य दक्षिणं
ततः ३
ल४

३८

३८

त्रिरसामि वंद्य प्रागुदग्वा निनयनमिति वासुदेवः। मंत्रार्थः। हे आपः यो युष्मान् समुद्रं प्रहिणोमि
मयामि। अतः स्वां योनिं स्व[…]कारणभूतं समुद्रं अभिलक्ष्य गच्छत व्रजत किंच युष्मत्प्रसादादस्मा
कं वीराः पुत्राः भ्रातरः अनुपहताः संतु। मत्तः पयः अर्घ्यादि मे गावं जलं मा परासेचि। अपगतं मा स्तु।
सदेवाहमर्घ्योऽभवानीत्यर्थः॥ आचाम[…]न्यशसासंसृज वर्च[…]सा। तं मा कुरु प्रियं प्रजाना
मधिपतिं पशूनामरिष्टं तनूनामिति। ततो दत्तं आचमनीयं प्रतिगृह्य आमागन्निति आचमति सकृ
द्वक्षपति। ततः स्मार्तमाचमनं। मंत्रार्थः। हे वरुण जले शतमेवं रूपेण त्वामाश्रितं मा मां यशसा स
ह भावं सामीप्यं वा आगन् आ उपसर्गोऽग्निति क्रियापदेन संबध्यते। तथा वर्चसा ब्रह्मवर्च
सेन संसृज। संस्पृष्टं कुरु। किंच प्रजानां पुत्रपौत्रादीनां प्रियं॥ पशूनां गोऽश्वादीनामधिपतिं॥
स्वामिनं च॥ तथा तनूनां देहावयवानां शरीराणां वा अरिष्टं […] अहिंसकं कुरु। हिंसात्र अन
भ्यासैवेदानामाचारस्य च लंघनात्। अल्पस्याद[…] दोषाच्चमतस्तु विप्रान् जिघांसति स्यादिदरिष्टता।
मित्रस्य हेति मधुपर्कं प्रतीक्षते। ततो घर्मोद्धेपि तुर्हस्तात्स्थित मुद्घाटितं मधुपर्कं मित्रस्य हेति प्रति

अरिष्टाः॥

आगमया।

भ

व

ग

६ अन्नाशने अघतर्इ सन्नं तस्याशने ६

त्र मंत्रेण प्रतीक्षते॥ प्रस्पतीत्यर्थः। देवस्यहेति प्रतिगृह्णाति। देवस्य हे प्राशित्र प्रतिगृह्णामि मंत्रेण मधु
पर्कं प्रतिगृह्य तिं सव्ये पाणौ कृत्वा दक्षिणस्या नामिकया त्रिः प्रयौति नमः श्यावास्या यान्न शने य
त्त आविद्धं तत्ते निष्कृंतामीति। मंत्रं मधुपर्कं सव्यहस्ते कृत्वा दक्षिणस्य हस्तस्यानामिकया अंगुल्या प्रद
क्षिणं त्रिरालोडति नमः श्यावास्यायेति मंत्रेण। अत्र सव्यहस्तस्थितस्यैव दक्षिणस्यानामिक
या त्रिरालोडनं यथास्यात्तेतदर्थं दक्षिणग्रहणं॥ मंत्रार्थः॥ हे अग्ने ते तुभ्यं नमः। किं भूताय श्यावा
स्याय कपिशास्याय ते तव अन्नशने अदनीयमधुपर्को न्हस्व छांदसः। यद्द्रव्यं आविद्धं संश्लिष्टं अ
नर्दं यं तं निःकृतामि निरस्यामि। अनामिकांगुष्ठेन त्रिर्निरूक्षयति। अनामिका च अंगुष्ठश्चेत्य
नामिकांगुष्ठं तेन अनामिकांगुष्ठेन वारत्रयं निरूक्षयति मधुपर्कं कुदेशे पात्राद्बहिः प्रक्षिप
ति। चशब्दात्पुनः सकृन्निरूक्षणं॥ एवं निरूक्षण व्यवधानाद्भूतिभिवनं मंत्रावृत्तिः उच्छि
ष्टस्यैव मंत्रोच्चारणं॥ एवं हि स्मरंति। तांबूले धुतफले चैव भुक्तस्नेहानुलेपने॥ मधुपर्के
च सोमे च नो छिष्टं मनुरब्रवीत्॥ मंत्रार्थः॥ हे देवाः मधुनो मकरंदस्य तन्मध्यं मधुनि
तस्यास्त्रैः प्राश्नाति। यन्मधुनो मधव्यं परमं रूपमन्नाद्यं॥ तेनाहं मधुनो म
धव्येन परमेण रूपेणान्नाद्येन परमो मधव्यो न्नादोसानीति॥ तस्यपर्ययं लक्षणाषष्ठी॥ तस्य मधुपर्कस्य
प्राश्नीयाद्येन मधुनो मधव्यमिति अनेन मंत्रेण। प्राशने त्रयेपि हविर्ग्रहण न्यायेन मंत्रावृत्तिः॥ २

अथा अस्तमिते ध्रुवं दर्शयति॥ ध्रुवमसीसनेन मंत्रेण

परिक्रमायरथाधिकं गावां शतं ददाति। अस्तमिते ध्रुवं दर्शयति ध्रुवमसीसनेन मंत्रेण ध्रु
वमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृहस्पतिः॥ मया पत्या प्रजावती संजीव
शरदः शतमिति॥ अस्तमिते सूर्ये वध्वा ध्रुवसंज्ञं नक्षत्रं दर्शयति॥ ध्रुवमसीसनेन मंत्रेण ना
ध्रुवमीक्षति अघोषणा अयमेयमंत्रं कारितार्थे अत्र कार्यकारितार्थे चाप मंत्रः॥ पश्या
मीसंतर्भूत ण्यर्थीयपदुक्तं भवति दर्शयामीति तदुक्तं भवति॥ पश्यामीति मंत्रोपि चेवं व्यवस्थितः॥
ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृहस्पतिर्मयापत्या प्रजावती संजीव शरदः शतमिति॥ कुमार्येवो
च्यते इति। वध्वा मंत्रपाठ इति भ्रांतिमानूणा धरः॥ ध्रुवमीक्षस्वेति प्रैष इति हरिहर गंगाधरौ॥
मंत्रार्थः॥ हे वध्व त्वं ध्रुवमसि। ध्रुवा शाश्वती असि। भवसि। यतः त्वां ध्रुवं तारका विशेषं
पश्यामि दर्शयामि। अत्रांते भूतो णिच ज्ञेयः॥ अतस्त्वमपि ध्रुवा शाश्वती। पोष्या। पोषणीया॥
मम प्रजोष्ट्रीवा। एधि। भव। वर्धयेति। वोत्वत दर्थमेव बृहस्पब्रह्मा त्वां मह्यं मदात्। अतो मया दत्तवान्॥

णं
श
नी
३९
स्वे
जो

ततो
मि
च ९
च २ स
३९
धरे
२

पस्मा भर्त्रा सह प्रजावती पुत्रपौत्रादियुक्ता शतं शरदो वर्षाणि जीव। प्राणि हि। सा यदि न पश्येत् पश्या
मीत्येव ब्रूयात्॥ सा कन्या यदि ध्रुव संज्ञकं सूक्ष्मं नक्षत्रं न पश्येत् तदापि पश्यामीत्येव वक्तव्यं
त यो न पश्यामीति न ब्रूयात्। त्रिरात्रमक्षारालवणाशिनौ स्यातां। तस्मान्दिनमारभ्य त्रिरात्रं
यावत् वरवध्वौ अक्षारं लवणं चाश्नीतः इत्येवं रीतौ स्यातां। अधः शायीयातां। अधोभूमौ स्व

स्वद्वा

पेतां ... व्युदासार्थोधः शब्दः॥ नास्तरणाव्युदासार्थः॥ संवत्सरं न मिथुनमुपेयातां। द्वादश
रात्रं षड्रात्रं त्रिरात्रमंततः॥ विवाह दिनमारभ्य संवत्सरं यावत् न मिथुनमुपेयातां ब्रह्मचा
रिणौ स्यातां। द्वादशरात्रं वा षड्रात्रं वा। त्रिरात्रं वा। इति श्रिरिंश्चिराग्निचितः सम्राट् स्थपति

६६

श्रीमहायाज्ञिक वामन नामसूनु दीक्षित गदाधर कृते गृह्यसूत्रभाष्ये प्रथम कांडे अष्टमी कं
डिका॥ ८॥ अथ विवाहे पदार्थक्रमः॥ तत्र तावदुपयोगितया किंचित्संक्षेपेणोच्यते। अनाश्र
मी न तिष्ठेत दिनमेकमपि द्विजः॥ आश्रमेण विना तिष्ठन् प्रायश्चित्ती भवेद्द्विज इति दक्षस्मृतेः। ६६

तदनुलोमक्रमेण दन्त्यादीनि प्रसक्ष्य गम्यानि बाध्यानि॥ तथा च मनुः॥ अव्यंगांगीं सौम्य नाम्नीं हंसवारण...

अविप्लुत ब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्॥ अनन्यपूर्विकां कांतामसपिंडां यवीयसीं॥ अरोगी
णीं भ्रातृमतीमसमानार्षगोत्रजामिति च याज्ञवल्क्योक्तेः॥ विप्लुत ब्रह्मचर्यो ब्राह्माभ्यंतर लक्ष
णयुक्तां स्त्रियमुद्वहेत्॥ तत्र कुलमग्रे परीक्षेतेति गृह्यांतर वचनात् दोषसदाचारादिगुणवत्तया दान
ता यादि दोषहीनतया च परीक्ष्य कुलं तज्ज्ञो दाह्या॥ तदनु लक्षणान्यपि परीक्ष्यं। लक्षणानि
च श्मश्रु भाश्रु भसूचकानि। तेनुलोमके शादशानां मद्गंगीमुद्वहेत् स्त्रियमिति। यान्यंतराणि तान्यु
क्तान्याश्वलायनगृह्ये। दुर्विज्ञेयानि लक्षणान्यष्टौ पिंडान् कृत्वा ऋतमग्रे प्रथमं जज्ञ ऋते
सत्यं प्रतिष्ठितं यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्सत्यं तद्दृश्यतामिति पिंडानभिमं ति ४ न
त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति क्षेत्राच्चेदुभयतः सस्यात्गृह्णीयादन्नवत्यस्याः प्रजा भवि
ष्यतीति ... स्त्रियाद्गोष्ठात्पशुमती वेदीपुरीषाद्ब्रह्मवर्चस्व्यविदासिनो ह्रदात्सर्वसंपन्ना देवि स्वि
णा वनादाकितवी चतुष्पथाद्द्विप्रव्राजिनी रिंद धन्या श्मशानात्पतिघ्नीति अस्यार्थः। उर्विज्ञेयानि

लक्षणान्येव परीक्षेत॥ क्षेत्रादिभ्यो मृदमादाय हस्त अष्टौ पिंडान्कृत्वा ऋतमग्र इत्यनेन मंत्रे
ण मृत्पिंडानभिमंत्र्य कुमारीं ब्रूयादेषां पिंडानां मध्ये एकं पिंडं गृहाणेति। यद्येकस्मिन्वत्सरे द्विः
फलति तदुभयतः सस्यक्षेत्रं॥ तस्मात्क्षेत्रादाहृतपिंडं गृह्णीयाच्चेदन्नवती अस्याः प्रजा भविष्य
तीति विंद्यात्॥ एवमुत्तरत्रापि ज्ञेयं॥ अपवर्ज्जे कर्मणि या वेदिः सा वेदी पुरीषं॥ आविदासी ह्र
दो नाम अजस्रो व्योहृदः॥ देवनं द्यूतस्थानं॥ इरिणमूषरं॥ विप्रवासिनी विविधं प्र[illegible]र्लशी
ला स्वैरिणीति यावत्॥ पतिं हंतीति पतिघ्नी॥ अत्रैवं क्रमः॥ क्षेत्रादिभ्यो मृदाहरणं॥ पिंडा
ष्टकरणं॥ अन्यस्य ऋतमग्र इति पिंडाभिमंत्रणं॥ एषामेकं गृहाणेति प्रेषः॥ क्षेत्रपिंडग्र
हणे अस्याः प्रजा अन्नवती भविष्यतीति ज्ञातव्यं॥ गोष्ठपिंडदाने पशुमती॥ वेदिपिंड
दाने ब्रह्मवर्चस्विनी॥ ह्रदपिंडदाने सर्वसंपन्ना॥ द्यूतस्थानपिंडदाने द्युतिनी॥ चतुष्
पथपिंडदाने स्वैरिणी॥ इरिणपिंडदाने धनरहिता॥ स्मशानभूमेः पिंडदाने पतिघ्नी॥

६८

नन

निंदा

अत्र प्रजास्तुतिद्वारेण सैव स्तुतिनिंदा चेति मंतव्यं॥ उत्तरैः स्तुतिभिर्वाक्यैः सैव निंद्यते॥ अन्यं ते
पार्विके सूनेन [illegible] वाग्दत्ता मनोदत्ता अग्निं परिगता सप्तपदी नीता भुक्ता गृहीतगर्भा प्रसूता चेति
सप्त पुनर्भ्वो व्यावर्त्तंते॥ कांता वोढुर्मनोनयनयोराल्हादकरी॥ असपिंडेति सापिंड्यवर्जनं॥
तच्चैकशरीरावयवान्वयेन भवति॥ एकस्य हि पितुर्मातुर्वा शरीरावयवाः पुत्रपौत्रादिषु साक्षात्प
रंपरया वा शुक्रशोणितादिरूपेणानुस्यूताः यद्यपि प[त्न्याः] पत्युः सह भ्रातृपत्नीनां च परस्परं ने
तत्संभवति तथाप्याधारत्वेनैकशरीरावयवान्वयोस्त्येव॥ एकस्य पितृशरीरस्यावयवाः पुत्रद्वारा
तं स्वाहिताइति मिताक्षराः कारमदनपारिजातादयः॥ आहुः॥ केचिदेकपिंडक्रियाप्रवेशेन
निर्वाप्य सापिंड्यं चांद्रिकापरार्कमेधातिथिमाधवादयो वदंति॥ नन्वेवि धातृवच्छरीरा
वयवान्वयेन सापिंड्यातिप्रसंगेन एकपिंडदानक्रियान्वयित्वेनैव गुरुशिष्यादेरपि
श्राद्धदेवताहात्सापिंड्यमिति विज्ञानेश्वरा सपिंडेसत्त्र आह याज्ञवल्क्यः॥ पंचमात्सप्तमा

४ अरोगिणीं अचिकित्स्यराजयक्ष्मादिरोगरहितां॥ भ्रातृमतीमिति पुत्रिकाकरणशंकानिवृ
त्त्यर्थं॥ ४ ऊर्ध्वं मातृतः पितृतस्तथेति॥ मातृपक्षे पंचमात् पितृपक्षे सप्तमादूर्ध्वं सापिंड्यं निवर्तत
इति शेषः॥ कूटस्थमारभ्य गणना कार्या। तदुक्तं वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्त
मः॥ पंचमी चेत्तयोर्माता तत्सापिंड्यं निवर्तत इति॥ कूटस्थो मूलपुरुषः यतः संतानभेदः। यवी
५ वय यसीं सापेक्षयोर्यासा च पृषा च न्यूनतां। यत्र तु पुत्रिकाकरणां व निश्चय स्तां अभ्रातृकाम भा ४
६८ प्युद्वहेत्॥ असमानार्षगोत्रजां ऋषेरिदमार्षं। गोत्रप्रवर्तकस्य मुनेर्व्यावर्तकः॥ प्रव
र इत्यर्थः॥ गोत्रं वंशावरं परंपरा प्रसिद्धं॥ स्वसमाने आर्षगोत्रे यस्य तस्माज्जातायाम् भवतितां॥
मौनप या वक्षि वाध्र्यश्वमौकानां भिन्नगोत्राणामिति भार्गवा वैतहव्यसावेतसेति प्रवरैक्य
मस्ति तत्र विवाहो माभूदिति॥ असमानार्षजामित्युक्तं आंगिरसां बरी ष यौवनाश्वेति गोत्रैक्य।
मांधातांबरीषयौवनाश्वेति। आंगिरसमांधातृप्रवरभेदे पि यौवनाश्व प्रवरैक्यं॥ ता ६८
दृशाविवाहवारणाय समानगोत्रजामित्युक्तं॥ तथा च गोत्रवरौ पदपक्रू पर्युदासेति नि

मित्तभूतौ॥ प्रवरैक्ये विशेषमाह॥ बौधायनः॥ पंचानां त्रिषु समानार्षाद विवाहस्त्रिषु
द्वयोः॥ भृगवंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेदिति॥ विवाहमिति विशेषः॥ इति संक्षिप्त
सगोत्रां तु समान प्रवरां तथा॥ गोत्रप्रवर निर्णयः॥ अथ समानार्षगोत्रजा विवाहे प्रायश्चित्तं॥
परिणीय सगोत्रां तु समानप्रवरां तथा॥ सागं कृत्वोपलब्धास्यास्तस्यां चांद्रायणं चरेत्॥ सागश्चै ६४
वोप भोगास्येव नतु तस्याः॥ समानप्रवरां कन्यामेकगोत्रामथापि वा॥ विवाहमतियो मूढस्तस्य व
क्ष्यामि निःकृतिं॥ उत्सृज्य तां ततो भार्यां मातृवत्परिपालयेदिति नाता तप स्मृतेः॥ समानप्रव
च पर स्वरूपं बौधायनेनोक्तं॥ एकएव ऋषिर्यावत्प्रवरेष्वनुवर्तते॥ तावत्समानगोत्रत्वमृते भृ
ग्वंगिरोगणादिति॥ समानगोत्रत्वं समानप्रवरमित्यर्थः॥ अथ सापत्न विषये सापिंड्यं स
३ पत्नमाता मे कुले पदे शिकात्सापिंड्याद विवाहः॥ तथा सुमंतुः॥ पितृपत्न्यः सर्वा मातरस्त त्रि२
द्भ्रातरो मातुला स्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि

६६

अन्यथा संकरकारिणः स्युरिति॥ अत्र यादृच नैवाचनिकमिति न्याये न परिगणिते षु वातिदे
शिकं सापिंड्यं न तु पंचमसप्तमपर्यंतं क्वचित्तु वचनादेव विवाहनिषेधः॥ यथा बह्वृच
गृह्यपरिशिष्टे॥ अविरुद्धसंबन्धामुपयच्छेदिति॥ स्त्वेकास्य यमेव विरुद्धसंबंधं दर्शयति॥
यथा भार्यास्वसुर्दुहिता पितृव्यपत्नि स्वसा चेति॥ तथा च नारदः॥ प्रसूता
नैक कायेन नैकस्मै दुहितृद्वयं॥ नैवैक जनन्येषोः पुंसोरेक जन्येव कन्ये के॥ नैवैक
दाचिदुद्वाहो नैकदा मुंडनद्वयं॥ अन्यत्रापि॥ एकजात्येच कन्ये द्वे पुत्रयो नैकजन्मनोः॥
न पुत्रीद्वयमेकस्मै प्रदद्याद्वै कदाचनेति॥ अथ वरगुणाः॥ तत्र बुद्धिमते कन्यां प्रयच्छ
दिति बव्हृच गृह्ये॥ यमः॥ कुलं च शीलं च वयश्च रूपं विद्यां च वित्तं च सना
थतां च॥ एतान् गुणान् सप्त परीक्ष्य देया कन्या बुधैः शेषमचिंतनीयं॥ याज्ञवल्क्यः॥
एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः॥ यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः॥

६६

एतैः कन्यागुणैः॥ अन्येन पूर्वकहृदयचीयस्त्वभ्रातृत्वव्यतिरिक्ते पुंस्त्वम्॥ कात्यायनः॥ उन्मत्तप
तितः कुष्ठी षंढश्चैव सगोत्रजः॥ चक्षुःश्रोत्रविहीनश्च तथापस्मारदूषितः॥ वरदोषाः स्मृताः
ह्येते कन्यादोषाः प्रकीर्तिताः॥ परीक्ष्य पुरुषः पुंस्त्वे निर्दिष्टैरेवांगलक्षणैः॥ पुमांश्चेदविकल्पेन
स कन्यां लब्धुमर्हति॥ सुबद्धजत्रुजान्वस्थिः सुबद्धांसशिरोधरः॥ यस्याप्लवते रेतो ह्लादि मूत्रं च
फेनिलं॥ पुमान् स्याल्लक्षणैरेभिर्विपरीतस्तु षंढकः॥ अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो
नराः॥ क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति॥ अथ कन्यावरयोर्बृहस्पत्यानुकूल्याभावे
तदानुकूल्याबृहस्पतिशांतिः॥ तत्र शौनकः॥ कन्योद्वाहस्य काले तु आनुकूल्यं न विद्य
ते॥ ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः॥ सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत्॥
ईशान्यां धवलं कुंभं धान्योपरि निधाय च॥ चंदनं मधु पुष्पं च पलाशं चैव सर्षपान्॥
मांसीगुडूच्यपामार्गविडंगीशंखिवर्चो॥ सहदेवी हरिक्रांता सर्वौषधिशतावरी बलाच
नी

सहदेवी च निशा द्वितियमेव च ॥ कलशस्य भागपर्यंतं स्वशाखोक्त विधानतः ॥ ग्रहहोममंडले
भ्यर्च्य पीतपुष्पाक्षतादिभिः ॥ देवपूजोत्तरे काले ततः कुंभानुमंत्रणं ॥ अश्वत्थसमिधश्चाज्यंपा
यसं सर्पिषाप्लुतं ॥ यवव्रीहितिलैः साज्यामंत्रेणैव बृहस्पतेः ॥ अष्टोत्तरशतं सर्वं होमशेषं समापये
नम त् ॥ पुत्रदारासमेतस्य अभिषेकं समाचरेत् ॥ कुंभाभिमंत्रणोक्तैर्मंत्रैश्च समुत्स्पृष्टमंत्रतः ॥ प्र
तिमां कुंभवस्त्रं च आचार्याय निवेदयेत् ॥ ब्राह्मणान्भोजयेत्पश्चाच्छुभं दस्यान्नसंशयः ॥ अ
थापरिहार्यकन्यावैधव्ययोगे तूच्यते ॥ तत्र मार्कंडेयपुराणे ॥ बालवैधव्ययोगे तु कुंभ
पुष्पप्रतिमादिभिः ॥ कृत्वा लग्नं ततः पश्चात्कन्योद्वाहेति चापरे ॥ तत्र पुनर्भूदोषोक्तेः विधा भा॰ पु॰ ४०
७० नखंडे ॥ स्वर्णत्रिपिप्पलानां च प्रतिमा विष्णुरूपिणी ॥ तस्या सह विवाहे तु पुनर्भूत्वं न जा
स्या यते ॥ सत्यव्रत संवादे ॥ विवाहात्सर्वकाले च चंद्रताराबलान्विते ॥ विवाहोक्तेच मन्य
न्या कुंभेन सह बोद्वहेत् ॥ सूत्रेण वेष्टयेत्पश्चाद्दशतंतुविधानतः ॥ कुंकुमालंकृतं देहं तंपो

च रेकांतमंदिरे ॥ ततः कुंभं निःसार्य प्रभूत्यसलिलाशये ॥ ततोभिषेचनं कुर्यात्पंचपल्लववारि
भिः ॥ कुंभप्रार्थनापि तत्रैवोक्ता ॥ वरुणांगस्वरूपाय जीवनानां समाश्रियं ॥ पतिं जीवय क
न्यायाश्चिरं पुत्रसुखं कुरु ॥ देहि विष्णोवरं देव कन्यां पालय दुःखतः ॥ ततोलंकारवस्त्राद्यं व
राय प्रतिपादयेत् ॥ इति कुंभविवाहः ॥ तत्रैव मूर्तिदानमप्युक्तं ॥ ब्राह्मणं साधुमामंत्र्य संपू
ज्य विधिवद्दर्हणैः ॥ तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजां ॥ शुद्धस्वर्णेन वित्तेन कृत्या पलेन पु सुवर्णे
नः ॥ निर्मितां रुचिरां शंखगदाचक्राब्जसंयुतां ॥ दधानां वाससी पीते कुमुदोत्पल मालि
नी ॥ सदक्षिणां च तां दद्यान्मंत्रमेतमुदीरयेत् ॥ यन्मया प्राचि जन्मनुषी घ्नतापरिसमागमः ॥
विषोपविषशस्त्रोद्यैर्हतो वातिविरक्तया ॥ प्राप्यमानं महाघोरं यशः सौख्यधनापहं ॥ वैध
व्याद्यतिदुःखौघनाशाय सुखलब्धये ॥ बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनुं ॥
सौवर्णीं निर्मितां शक्त्या तुभ्यं संप्रददे द्विज ॥ अनघाहमस्मीति त्रिवारं प्रजपेदिति ॥ एवमस्त्विह

त्रिंत स्योक्तं गृही ह्यास्य गृहं विरोत्तू ॥ ततो वैवाहिकं कुर्याद्धोमं सुता मगी इत्यः ॥ अस्त्वन्योर्मध्ये विवाह प्य। श्र
व दसे च नादयस्तत्रैव ज्ञेयाः ॥ ग्रंथगौरवभयान्नेहोच्यते ॥ अथ विवाहकाले कन्या ऋतुमती चेत्त
त्र यज्ञपार्श्वे ॥ विवाहविहितं तत्रे होमकालमुपस्थिते ॥ कन्यामृतुमतीं दृष्ट्वा कथं कुर्वंति याज्ञिकाः ॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि ॥ युंजानामाहुतिं हुत्वा ततः कर्माणि योजयेत् ॥ युं

६१

जानः प्रथममित्यनेन मंत्रेणाहुतिं जुहुयादित्यर्थः ॥ यद्वा विवाहहोमे प्रक्रांते यदि कन्या रजस्वला ॥
त्रिरात्रं दंपती स्यातां पृथक् शय्यासनाशनौ ॥ चतुर्थेहनि संस्नातौ तस्मिन्नग्नौ यथाविधिः ॥
जुहुयातामिति शेषः ॥ अथ विवाहे आशौचनिर्णयः ॥ विधिवत्कृते कन्यावरतो त्रिरात्रादिव
तसमाप्तिपर्यंतं तन्मध्ये आशौचप्राप्तौ तदपोहः सद्यः शौचं विधीयते इति चंद्रिकाकार आह ।
तत्र याज्ञवल्क्यः । दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ॥ आपद्यपि च कन्यायां सद्यः शौचं वि
धीयते ॥ इति ॥ दातुर्वरस्य कन्याया अप्यसद्यः शौचं षद्गुत्रिंशन्मते ॥ ७ ॥ ७ ॥ विवाहस्तव ते
विवाह इत्यर्थः ॥ बृहस्पतिः ॥ विवाहोत्सवयज्ञेषु अंतरा मृतसूतके ॥ पूर्वसंकल्पितार्थेषु
न दोषः परिकीर्तितः ॥

यज्ञेषु अंतरा मृतसूतके ॥ परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः ॥ अत यज्ञविवाहेषु श्राद्धहोमार्च
निजपे ॥ प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकं ॥ प्रारंभश्च्यते तेनैवोक्तः ॥ प्रारंभो वरणं यज्ञे संकल्पो
व्रतसत्रयोः ॥ नांदीमुखं विवाहादौ श्राद्धपाकपरिक्रिया ॥ वरणमिति मधुपर्कपरं ॥ तथा च ब्राह्मे गृही
तमधुपर्कस्य यजमानाच्चऋत्विजः ॥ पश्चादाशौचमध्ये पतितेन भवेदिति निश्चयः ॥ मधुपर्कात्पूर्वं
तु भवत्येवाशौचमिति शर्मोद्धारभाष्ये ॥ शुद्धिविवेकेप्येकमेव नांदीमुखावधिश्चावश्यकत्वे अधि
कमुक्तः ॥ एकविंशत्यहर्यज्ञे विवाहे दशवासराः ॥ त्रिषट्चौलोपनयने नांदीश्राद्धं विधीयते ॥

घ

इति ॥ तेन एकविंशत्यहरंतः पातित्यदियज्ञादिर्भवति तथा आवश्यकेयज्ञादौ पूर्वं श्राद्धं कुर्यादि
त्यर्थः ॥ प्रारंभाभावेपि कन्याया आधार्यत्वे विवाह इत्यर्थः ॥ बृहस्पतिः ॥ विवाहोत्सवयज्ञेषु अंत
रा मृतसूतके ॥ पूर्वसंकल्पितार्थेन न दोषः परिकीर्तितः ॥ ॐ संनिहितलग्नांतराभावे चहोमादि

र्थ

पदैर्विधुरनुज्ञया माह ॥ अनारब्धविशुध्यर्थं कुष्मांडैर्जुहुयाद्घृतं ॥ गां दद्यात्पंचगव्याशीत ततः

शुध्यति सूतकी ॥ उपकल्पित बहुसंभारस्यापित सन्निहितलग्नांतराभावेन संभाराभावेन संभारधार
णाभावे शक्तौ आशौचाभाव माह ॥ विष्णु ॥ नदेवप्रतिष्ठाविवाहयो व संमतयोरिति ॥ अथ वरस्त्रीदो
षे निर्णयः ॥ वध्वरान्यतरयोर्व्रतनीचेद्रजस्वला ॥ तस्याः शुद्धेःपरं कार्यं मांगल्यं मनुरब्रवीत् ॥ माध
वीये ॥ प्रारंभात्प्राग्विवाहस्य माता यदि रजस्वला ॥ निवृत्तिस्तस्य कर्तव्या सह बृहस्पति चोदनात् ॥
प्रारंभः प्राग्इति नांदीश्राद्धात्प्रागिति ज्ञेयं ॥ नांदीमुखविवाहादौ सूतादीनां तथैव प्रारंभोक्तः ॥ वृद्धमनुः ॥ वि
विवाहव्रतचूडासु माता यदि रजस्वला ॥ तदा न मंगलं कार्यं शुद्धौ कार्यं शुभेप्सुभिरिति मेधातिथिः ॥ १२
चौले च व्रतबंधे च विवाहे यज्ञकर्मणि ॥ भार्या रजस्वला प्राय स्तस्य न शोभनं ॥ गर्गः ॥ यस्य
स्योद्वाहादि मांगल्ये माता यदि रजस्वला ॥ तदा न तत्प्रकर्तव्यमायुःक्षयकरं यतः ॥ बृहस्प
तिः ॥ वैधव्यं च विवाहे स्यात् जडत्वं व्रतबंधने ॥ चूडायां च शिशोर्मृत्यु र्विघ्नं यात्राप्रवेशयोः ॥
आभ्युदयिकश्राद्धोत्तरं तु कपर्दिकाकारिकासु विशेषः ॥ सूतिकोदक्ययोः शुध्यै गोदधादोमप १२

र्वकं ॥ प्रत्येक मेणि शुद्धिःस्यादितरस्मिन्न शुध्यति ॥ अलाभे सुमुहूर्तस्य रजोदोषे च संगते ॥ श्रियं
संपूज्य तत्कुर्यात् पाणिग्रहणमंगलं ॥ हैमीं माषमितां पद्मां श्रीसूक्तविधिनार्चयेत् ॥ प्रत्यृचं पायसं हु
त्वा अभिषेकं समाचरेदिति ॥ अथ विवाहभेदाः ॥ मनु ॥ ॥ ब्राह्मो देवस्तथा चार्षः प्राजापत्य
स्तथासुरः ॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः ॥ चत्वारो ब्राह्मणस्याद्या राज्ञां गांधर्वराक्षसौ ॥
राक्षसश्चासुरो वैश्ये शूद्रे चांत्यस्तु गर्हितः ॥ अंत्यः पैशाचः ॥ गांधर्वराक्षसादिषु विवाहाभावा
यपश्चाद्धोमादि संस्कृतं कार्यं ॥ गांधर्वासुरपैशाचविवाहा राक्षसश्च यः ॥ पूर्वं परिग्रहस्तेषु पश्चा
द्धोमो विधीयते इति परिशिष्टात् ॥ होमाद्यभावे वरांतराय देया सतिवृत्तिर्वौधायनमाह ॥ बलाने
प्य हृता कन्या मंत्रैर्यदि न संस्कृता ॥ अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति ॥ बलाच्छला
दे रूपलक्षणं ॥ अथ वाग्दानोत्तरं वरमरणे विशेषः ॥ अद्भिर्वाचा च दत्ता यां म्रियेतोर्ध्वं वरो यदि ॥
न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा ॥ देशांतरगमने नैकासायनः ॥ वरपितानुयः काश्चित्सुवसेतु
तु

रुषेपि च॥ ऋतुत्रयमतीत्य कन्यान्यं वरयेत्पतिं॥ याज्ञवल्क्यः॥ दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत्॥ वसिष्ठः॥ कुलशीलविहीनस्य षंढादिपतितस्य च॥ अपस्मारविधर्मस्थरोगिणां देहधारिणां॥ तदभावे हरेत्कन्यां सगोत्रोढां तथैव च॥ अथ धर्मार्थविवाहकरणे फलं॥ तत्र महाभारते॥ ब्राह्मणस्य वित्तसामर्थ्यादिकं चोद्वाहयेद्द्विजः॥ तेनाप्नोति स्थानं शिवभक्तेन प्रभुं॥ मातृपितृविहीनं तु संस्कारोद्वाहनादिभिः॥ यः स्थापयति तस्येह पुण्यसंख्या न विद्यते॥ भविष्ये विवाहादिक्रियाकाले तत्क्रियासिद्धिकारणं॥ यः प्रयच्छति धर्मज्ञः सोऽश्वमेधफलं भवेत्॥ अथ वाग्दानविधिः॥ ज्योतिःशास्त्रोक्ते शुभे काले दोचलारोष्टौ वा प्रशस्ते वेषा वै पित्रादिना सहितः शंकु नदर्शनपूर्वकं कन्यागृहमेत्य कन्यापितुः प्रार्थना कार्या मत्पुत्रार्थं कन्यां प्रयच्छेति॥ अथ दाता भार्यानुमतेन दास्यामीति उच्चैर्ब्रूयात्॥ ततः कन्यादाता प्राङ्मुख उपविश्य चान्यदेशकालौ

श्रोति
२३
७६

५ ततो मंत्रांतरं पठेत्॥ वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया॥ कन्यावलोकनविधौ ५

स्पष्टा करिष्यमाणविवाहांगभूतं वाग्दानमहं करिष्ये॥ तदंगं गणपतिपूजनं करिष्य इति संकल्प्य गंधादिदक्षिणांते गणपतिं पूजयित्वा स्वस्थाने वरपितरं प्राङ्मुखमुपवेश्य स्वयं च तत्प्रत्यङ्मुख उपविश्य तं गंधतांबूलादिभिः पूजयित्वा हरिद्राखंड पंचहट्ट पूगीफलानि च गंधाक्षतालंकृतानि गृहीत्वा अमुकगोत्रोत्पन्नाममुकपुत्रीममुकनाम्नीमिमां कन्यां ज्योतिर्विदादिष्टे मुहूर्ते दास्ये इति वाचा संप्रददे इति चोक्त्वा अव्यंगे पतिते क्लीबे दशदोषविवर्जिते॥ इमां कन्यां प्रदास्यामि देवाग्निद्विजसंनिधौ॥ इति पठेत्॥ निश्चितस्त्वं सुखी भव। वरपिता ब्रूयात्॥ वाचा दत्ता त्वया कन्या पुत्रार्थं स्वीकृता मया॥ वरावलोकनविधौ निश्चितस्त्वं सुखी भव॥ भ्रात्रादौ स्विकर्तरि भ्रातार्थे मित्रार्थे मित्राद्यूहः कार्यः॥ ततो वरपित्रादिर्गंधाक्षतभूषणवस्त्रयुग्मभूषणतांबूलं पुष्पादिभिः कन्या [illegible] यथाचारं पूजयेत्॥ ततो ब्राह्मणआशीर्मंत्रान्पठेत्॥ इति वाग्दानं॥ अथ मृदाहरणं॥ ज्योतिर्निबंधे॥ कर्त्तव्यं मंगलेष्वादौ मंगलायांकुरार्पणं॥ नवमे सप्तमे वापि पंचमे दिवसेपि वा॥ तृतीये बीजनक्षत्रे शुभवारे शुभोदये॥ सम्यग्गृहाण्यलंकृत्य वितानध्वजतोरणैः॥ सहवादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशं॥ म्रा

क

कृ तत्र मर्त्यैस्तैर्ब्राह्मणानां गृहीत्वा पुनरागतः॥ मन्त्रयेच्च चवावेलावेष्टुपात्रेष्वथो न्यसेत्॥ अनेक बीज
संयुक्तां तोयपुष्पोपशोभितां॥ शौनकः॥ आधानं गर्भसंस्कारं जातकर्म च नाम च॥ हिरण्यं तत्र वि
धातव्यं मंगलेंकुर स्थापनं॥ बृहस्पतिः॥ आसंतिकेषु कार्येषु कार्यं साद्यांकुरार्पणं॥ ततो वैवाहिके शुभे
मुहूर्ते च वधूवरयोः स्नेहहरिद्रालापनादि यथाचारं कार्यं। अथ विवाहदिनात्पूर्वदिन कृत्यं॥ तत्र स्व
गणपतिपूजनं॥ ततः पूर्वोक्त प्रशस्तं मंडपं कृत्वा तत्प्रतिष्ठां कुर्यात्॥ तत्र पूर्वाह्णे सपत्नीकः स्न
ातः धृतमांगलिकवेषः शुभासनेषूपविश्य आचम्य प्राणानायम्येष्टदेवता गुर्वादिनम
स्कारं कृत्वा देशकालौ संकीर्त्य अस्या अमुकनाम्न्याः करिष्यमाण विवाहांगभूतं स्व
स्तिवाचनं मंडपप्रतिष्ठां मातृकापूजनं वसोर्धारापूजनं आयुष्यजपं नांदीश्राद्धं चाहं क यु
रिष्ये इति संकल्पं कुर्यात्॥ ततो ब्राह्मणानुपवेश्य स्वस्तिवाचनं कुर्यात्॥ मंडपप्रतिष्ठा
यैवं। दूर्वाशमीपल्लवबकुलवृक्षपल्लवनाम्नादि प्रशस्तवृक्षपत्रवेष्टितास्तंत्रेलपं

९४

९४

५ अस्मत्कुले श्राद्धप्रयोगे द्रष्टव्यः॥ ९५

चधावेष्टयेत्॥ आग्नेयकोणस्थ मंडपस्तंभोपरि नंदीनी नामक वेष्टितं मनोज्योतिरिति स्थाप
इत्वा तत्र नंदीनी पूजयेत्॥ तच्चेत्थं॥ आपोहिष्ठेति प्रोक्षणं गंधद्वारामिति गंधाक्षतं दधिक्राव्णो इ
ति दधि कांडात्कांडादिति दूर्वापुष्पाणि समर्पयेत्॥ ततो नैर्ऋत्यवायव्येशानस्तंभेषु मंडपमध्ये परिभा
गे काष्ठे च क्रमेण नलिनीमैत्रोमापुत्रवर्द्धनी नामक वेष्टितानि पूर्ववत्स्थापयित्वा पूजयेत्॥ ततो
मातृपूजनं वसोर्धारापूजनं आयुष्यं वर्चस्यमित्यायुष्यजपं कुर्यात्॥ एषामनुष्ठानप्रकारः क्वैवो
क्तो द्रष्टव्यः॥ ततो नांदीश्राद्धं॥ इदं चोद्वाहे पिता कुर्यात् द्वितीयादौ वर एव वा। तथा च स्मृतौ। नांदीश्राद्धं
पिता कुर्यादाद्ये पाणिपरिग्रहे। अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं॥ गृह्यनः। पित्रोऽस्तु जीवतोः
कुर्यात्पुनः पाणिग्रहणे यदौ पितुर्नांदिमुखं श्राद्धं नोक्तं तस्य मनीषिभिरिति। पितुरभावे असंस्कृतास्तु संस्कार्या भ्रा
तृभिः पूर्वसंस्कृतैः इति यः कर्त्तृक्रमस्तेन क्रमेण जेष्ठभ्रात्रादिर्दद्यादिति चंद्रिकादयो आहुः॥ हेमाद्रिस्तु॥ यस्य
पितुरभावे यः पितृव्यमातुलादिः संस्कार्याः सत्क्रमात्संस्कार्य पितृभ्यो दद्यान्न तु स्वपितृभ्य इति व्याचख्यौ॥
कारिका अत्र कुच-क्त यं विस्मरभयान्नोच्यते रेणुकार्यां। उक्ते काले विवाहांगं कुर्यान्नांदिमुखं पिता। देशांतरे विवाहश्चे

२ इष्टं च धूपि नाहरू साउद्धाहारं भगिमि गतकं॥ नांदी श्राद्धं गयं कुर्यात् स्मिन् तहानि स्वं यतः॥ न २

नत्र गत्या भवेदिदं॥ अत्र पदार्थक्रमोऽस्मत्कृते श्राद्धप्रयोगे आलोचनीयः॥ एवं वरपिता स्वगृहेऽपि सर्वं कुर्यात्॥ इदं च व
धूपित्रा स्वतंत्रे नांदीश्राद्धं कार्यं॥ तदुक्तं कारिकायां॥ मंडपादिकं कर्म वरस्य श्राद्धमंतरेति॥ आचारोऽप्येवं॥ ततो वरगृ
हे गत्या वरणं कार्यं॥ तत्र गणपतिस्मरणादेशकालौ संकीर्त्य करिष्यमाण विवाहांगवरणं करिष्ये इति संकल्प्य। लो
उपवीतादि द्रव्यैर्वरणे द्रव्याणि वरायदद्यात्॥ पादौ क्षाल्य॥ चंदनादिभिः पूजां कुर्यात्॥ वरणे देयानि द्रव्याण्या
ह॥ चंद्रेश्वरः॥ उपवीतं फलं पुष्पं वासांसि विविधानि च। देयं वराय वरणे कन्याभ्रात्रा द्विजेन चेति॥ इति व
रदिन कृत्यं॥ आगतो सर्वमेव द्विवाह दिने एवमेव कुर्यात्॥ अथ विवाहदिन कृत्यं। तत्र पूर्वं घटस्थापनं का
र्यं॥ नारदः। षडंगुलमितोत्सेधं द्वादशांगुलमायतं॥ कुर्यात्कपालमत्ना सपात्रं तद्धटाभिधं॥ तो
यपात्रे जलैः पूरणेऽस्मिन् पात्रे वाथ वा शुभे॥ मंडला धोदयं चीर्ण्युक्तेस्तत्र निक्षिपेत्॥ तत्र मंत्राः॥
मुख्यं त्वमसि यंत्राणां ब्रह्मणा निर्मितं पुरा। भावाभावाय दंपत्योः कालसंधिनकारणमिति॥ ततो व
रः कृतसायंकृत्य इष्टदेवतापित्रादिभ्यो नमस्कृत्य तैरनुमोदितो यथाविभवमश्वादियानमारुह्य वधूगृहं

ग त्वा तत्र द्वारदेशे प्राङ्मुखस्तिष्ठेत्॥ ततो नीराजनपूर्णकुंभयुक्तैः पुरंध्रीजनैः प्रत्युद्गतो नीराजितो गृहं प्रविश्य प्रा
ङ्मुखस्तिष्ठेत्॥ ततः कन्यापिता मधुपर्केण समर्चयेत्॥ अथ मधुपर्कः॥ तत्र वरस्यैवैकल्पिकावधारणं॥
यन्मधुन इति मधुपर्कप्राशनं॥ शेषस्य प्रागसंचरे निनयनं। एतौ विकल्पौ स्मरेत्॥ ततः
साधु भवानास्तामिति अर्घ्यपिताअर्घ्यप्रतिवदति। अर्घयेत्स्वर्घस्य प्रतिवचनमिति
वासुदेव भट्टादयः॥ विष्टरादीनामाहरणं॥ अर्घपितु विष्टरादीनां॥ अर्घपित्रव्यति
रिक्त अन्य अर्घ्यसंबोधयति॥ विष्टरो विष्टरो विष्टरः॥ प्रतिगृह्यतामित्यनेन॥ ततो
र्घ्योर्घ्यपितुः सकाशाद्विष्टरमादायासने निधाय वर्ष्मोऽस्मि समानानामित्युपविश
ति॥ ततः पाद्योदकादानेर्घ्यपितुः॥ ततोर्घमन्ये संबोधयति॥ पाद्यं प्रतिगृह्यतामि
ति ततोर्घपितुः सकाशात्पाद्यं प्रतिगृह्य प्रथमं दक्षिणं पादं प्रक्षालयति विराजो
दोहोसीति॥ ततो तेनैव मंत्रेण वामपादप्रक्षालनं॥ राजन्यवैश्ययोस्तु पूर्वं॥

२

वामपादं प्रक्षालनं ॥ अर्घयितुर्विष्टरादानं । अन्यः प्राह विष्टरो विष्टरो विष्टरः ॥ प्रतिगृह्यतामिति ॥ ततोर्घ्यो द्वितीयं विष्टरं प्रतिगृह्य भूमौ निधाय वर्ष्मोस्मि समानेन तस्योपरि पादौ निदधाति ॥ ततोर्घ्य आपस्थ युष्माभिः सर्वान्कामानवाप्नवानीत्युक्त्वा प्रतिगृह्णाति ॥ अर्घयितुरर्घ्यादानं ॥ अन्यः प्राह ॥ अर्घोऽर्घोऽर्घः प्रतिगृह्यतामिति ॥ ततोर्घ्य आपस्थ युष्माभिरर्घ्यं प्रतिगृह्णाति ॥ अर्घ्यस्तमर्घ्यं निनयन्नभिमंत्रयते समुद्रं वः इति ॥ ततोऽर्घयितुराचमनीयादानं ॥ पुनरन्यः प्राह ॥ आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामिति ॥ ततोऽर्घ्योऽर्घयितुराचमनीयं प्रतिगृह्य आमागंन्यसेति सकृदाचामति ॥ ततः स्मार्त्ताचमनं ॥ अर्घयितुर्मधुपर्कादानं ॥ अन्य आह ॥ मधुपर्को मधुपर्को मधुपर्कः ॥ प्रतिगृह्यतामिति ॥ ततोर्घ्योऽर्घयितुर्हस्तस्थितं मधुपर्कं मित्रस्य चक्षुषेनेईक्षते ॥ ततो मधुपर्कं देवस्य त्वेत्यादिना प्रतिगृह्णामीति प्रतिगृह्य सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया लोडयति नमः श्यावास्यायेति ॥ ततो मधुपर्कैकदेशस्यानामिकांगुष्ठेन बहिः प्रक्षेपः ॥ पुनः दक्षिणस्यानामिकया लोडयति नमः श्यावास्याये त्यालोडनं मधुपर्कैकदेशस्य बहिः प्रक्षेपः ॥ एवं च त्रिरालोडनं ॥ त्रिर्निरूक्षणं मनामिकांगुष्ठेन भवति ॥ ततोर्घ्यो मधुपर्कैकदेशं यन्मधुनो मधव्यमिति प्राश्नाति पुनरनेनैव मंत्रेण द्वितीयं तृतीयमुच्छिष्टमेव प्राश्नाति ॥ उच्छिष्टशेषाभावो मन्त्रकोऽद्रव्यः ॥ मधुमिश्रितप्रस्य च प्राशनं ॥ ततो घ्र्यो मधुपर्कशेषं पुत्राय शिष्याय वा उत्तरतः उपविष्टाय ददाति ॥ अथवास्य यमेव सर्वं प्राश्नाति ॥ प्रागसंचरे वा निनयनं ॥ ततोर्घ्यः ॥ आचमनं प्राणाहंसमपोतु तत्रैवं ॥ वाङ्म आस्येऽस्त्विति मुखमालभते ॥ नसोर्मे प्राणोऽस्त्विति ॥ नासिकाछिद्रद्वयं युगपत् ॥ अक्ष्णोर्मे चक्षुरस्त्विति द्वयं युगपत् ॥ कर्णयोर्मे श्रोत्रं० दक्षिणं कर्णमभिमृश्य ततो वाममनेनैव मंत्रेण ॥ बाह्वोर्मे बलमस्त्विति ॥ ततो वाम० ॥ ऊर्वोर्मे ओजोऽस्त्विति ऊरूद्वयं युगपदेव ॥ अरिष्टानि मेंगानि तनूस्तन्वा मे सह संत्विति शिरः ॥ प्रारभ्य सर्वांगानां युगपत् ॥ ततो गामानीयार्घयिता शासमादाय गौर्गौर्गौः ॥ अलभ्यतामिति ब्रूयात् प्रतिवदति ॥ ततोर्घ्यः प्रत्याह माता रुद्राणामित्यादि ॥ यद्यपि हे यत मुञ्चामम च पाप्मा हतः ॥ ओं मुत्सृजत तृणान्यत्त्विति ब्रूयात् ॥ विवाह यज्ञे योस्तु नियमेनालंभः ॥ स च कन्नोमे भवति ॥ स्मसंतरात् ॥ आलंभाभावेतु गौरित्युक्त्वा

२ न इहनोमीति यद्यास्तुनो नाथ यद्युस्मि स्त लोम मच्चाम्नुष्य च पाप्मा २०

पुनःममः ॥

७८

घ

७८

ग्रह ४

घं

ने २ गा३

तीप

२४

अस्यो

आ

आद्धि

अस्थिर

अ ७

अ

रणादिकमपि न भवति॥ सर्वत्रालंभाभावेपि मधुपर्क एवेति कारिकायां॥ गोरालंभनिषेधात्स्यात्सर्वत्रोत्सर्जनं कलावि
ति॥ इति मधुपर्कः॥ ततो दाता गंधमाल्यवस्त्रयुगोपवीतयुगाभरणादिभिर्वरं यथाविभवं पूजयेत्॥ अथ क
न्यास्नातां रिहितामहतवस्त्रां गृहीतः [illegible]भाग्यादिकां कन्यां गौरीहरं पूजयित्वा तत्रैव गौरीध्यानतिष्ठेत्॥
ततो वरो बहिःशालायां पंचभूसंस्कारान्कृत्वा॥ लौकिकाग्निस्थापनं करोति॥ निर्मथ्याग्नेर्वा स्थापनं॥
ततो वैकल्पिकावधारणं वरस्य॥ अग्नेः पश्चात् जानन्यानि धानं॥ अग्नेरुत्तरतः कुंभधृक्॥ उत्तरतः पा
त्रासादनं॥ द्वे पवित्रे॥ मृन्मयी आज्यस्थाली॥ पालाश्यः समिधः॥ प्रांचावाघारौ सौमिकृतमौ॥ आज्यभागौ च
सौदक्षिणा॥ राष्ट्रभृद्धोमः॥ अभ्याताहोमः॥ सुगं नु पंथां मि स्वाहुवे ते परं मृत्यो इत्याकूताहुतिं॥ बध्या आनुहुह
चर्मोपवेशनं प्राच्यां त्रिरात्रमधः शायनमुभयोः इति वैकल्पिकावधारणं॥ ततो मातुलाद्यैः कन्यानयनं करोति॥ सा च
गासप्रत्यङ्मुखी उपविशति॥ अत्र वधूवरयोर्मध्ये अंतरार्धानं॥ ततो वधूवरं गच्छेति॥ मंत्रेण वासः परिधापयति॥
वर एवोत्तरीयं या अकृंतन्नमित्यनेन परिधापयति॥ ततः कन्यापितुरध्येषणं परस्परं समंजेथामिति॥ अंतःप

टस्यापसारणं॥ वधूवरयोः समंजनं॥ ततः संमुखीकरणं॥ समंजंत्विति मंत्रेण॥ अत्र वधूवरयोर्गोत्रप्रवरपू
र्वकं प्रपितामहपितामहपितृणां त्रिर्नामग्रहणं कार्यमिति॥ वासुदेवहरिहरौ॥ सद्रुदिति गंगाधरः॥ अथ क
न्यादानं॥ तत्रायं क्रमः॥ दाता वरदक्षिणतः स्वदक्षिणदेशस्थपत्नीसहित उदङ्मुख उपविश्य बद्धशिखः शुचि
राचम्य कुशपाणिः प्राणायं [illegible] ममसमस्तपितृणां निरतिश
यानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेण अस्यां कन्यायामुत्पादयिष्यमाण
संतत्या द्वादशावरान् पुरुषान् पवित्रीकर्तुमात्मनश्च लक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानम
हं करिष्ये इति कुशाक्षतयुतजलेन संकल्प्य सपत्नीकः कन्यां कनकसंपन्नां कनकाभरणैर्युतां॥ दास्यामि वि
ष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥ विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः॥ इमां कन्यां प्रदास्यामि पितृणां
तारणाय च॥ इति मंत्रोपठित्वा स्वदक्षिणस्थभार्यादत्तपूर्वकल्पित जलधारां कन्यादक्षिणहस्तां गृहीत्वा वर
दक्षिणकरे क्षिपेत्॥ अमुकगोत्रामुकाहं ममैस्तित्यादिप्रीतये इयं तं पूर्वं चदुश्चार्यं अमुकामुकप्रवरोपेता

प्रपौत्रायामुक १
पौत्रीममुक २

ममुकगोत्रायामुकपौत्रायामुकपुत्रायामुकायाः श्रीधररूपिणे वरायामुकप्रवरोपेताममुकगोत्रां ममु
कप्रपौत्रीममुकस्य मम पुत्रीममुकनाम्नीं कन्यां श्रीरूपिणिं प्रजापतिदेवत्यां प्रजोत्पादनार्थं तुभ्यं
संप्रददे॥ इति वरहस्ते सकुशाक्षतां जलं क्षिपन् प्रजापतिः प्रीयतामिति मनसा स्मरेत्॥ न ममेति वा
च्यमिति प्रयोगरत्ने॥ नेत्यपरे॥ वरः ॐ स्वस्तीत्युक्त्वा यौ रद्वेति प्रतिग्रहं करोति॥ ततो दा॰ गौरीमिमं
विप्र यथाशक्तिविभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय॥ कन्ये ममाग्रतो भूयाः कन्ये मे
देवि पार्श्वयोः॥ कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयां॥ मम वंशकुले जाता पालिता वत्सराष्ट
कं॥ तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्धिनी॥ न्यूनवयस्कायां पालिता वर्षसप्तकमित्याद्यूहः का
र्यः॥ धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयं॥ नातिचरामीति वरः॥ दाता देशकालौ स्मृत्वा कृतस्य
कन्यादानस्य प्रतिष्ठासिद्ध्यर्थमिमां दक्षिणां तुभ्यमहं संप्रददे इति सजलं यथाशक्ति सुवर्णदानदक्षि
णां हे नवरहस्ते दद्यात् न ममेति वदेत्॥ ओं स्वस्ती ति वरः॥ ततो दाता जलभाजन मौगोमिहिष्यस्वग॥ अ

जनभाजन

(margin: या; ईशीकन्या; यं ३; ७८; ७८)

तिका

दासीदासभूवाहनालंकारादि यथाविभवं सर्वं वराय दद्यात्॥ अत्र कोदादिमं सर्वं पठति इति हरिहरगं
गाधरौ॥ ततो वरो वधूं गृहीत्वा निष्क्रामति यदैषि मनसेति॥ असौ स्यान वधूनामा देशः॥ निष्क्रमण
प्रभृति कश्चन पुरुषो दक्षिणस्कंधे वारिपूर्णकलशं गृहीत्वाग्नेरुत्तरतो दक्षिणतो वा वाग्यतस्तिष्ठेत्॥
ततः परस्परं समीक्षेथामित्याह॥ अन्योन्यं समीक्षणं॥ अघोरचक्षुरिति वरकर्तृकं समीक्षणे मंत्रपा
ठः॥ दंपत्योरग्नेः प्रदक्षिणं॥ अत्र वासःपरिधानादि कर्म ततः पश्चादग्नेस्तेजनीकटे वा दक्षिणपादेन
प्रवर्त्य सोपविशतीति वरः॥ वरदक्षिणतो वधूरुपवेशनं॥ ततो ब्रह्मो[illegible]पवेशनादि चरुवर्ज्यमाज्यभागां
ते विशेषः॥ पवित्रच्छेदनकुशादिवस्तूनामासादनं॥ उपकल्पनीयानि॥ शूर्पं शमीपलाशमिश्रा
न्लाजाः॥ दृषत्॥ शेहितमानुहं चर्मकुमार्या भ्राता॥ आचार्याय वरद्वयं॥ आज्यभागांते॥ ओ
उपैनेवनरं॥ उदत्तमं॥ एतत्सर्वं अपाश्रित्य तु सारासूक्तहोमः॥ तत्र नान्वारंभः॥ अतावा[illegible]त्तधामा
१ हि त्रिवा पर्वस्तस्यैव प्रपोऽरसोमुर्नोतास्यः स्वाहा॥ ॐ इदमोषधीभ्यो क्षसोयौ न मम॥ याक्षसाइ तो म २
२ स्वाहा १ भूर्भुवः स्वाहा २ स्व स्वाहा ३ त्वन्नो ४ सत्वन्नो ५ प्रयाश्चाग्ने ६ यतेशतं ७ २ मुक्ते १
अतावास्कृतधामामि[illegible] यजः सन्नरं त्वं[illegible]पातस्मै स्वाहा बार॥ १६ अतावाहेस्कृत तथाग्नये गंधर्वाय न मम १२

(margin: ति १; न्यप्रर्वकं १; या; ३)

संहितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा॥ ॐ इदं मरीचिभ्योऽप्स-
रोभ्य आयुभ्यो न मम॥५॥ संहितो विश्वसमा सूर्यो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ ॐ
इदं संहिताय विश्वसाम्ने सूर्याय गंधर्वाय न मम॥ ॐ सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः स न इ न इदं ब्र-
ह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ ॐ इदं सुषुम्णाय सूर्यरश्मये चंद्रमसे गंधर्वाय न मम॥५॥ सुषुम्णः सू-
र्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा॥ इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकु-
रीभ्यो मा॥६॥ इषिरो विश्वव्यचा वातो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ ॐ इदम-
षिराय विश्वव्यचसे वाताय गंधर्वाय न मम॥७॥ इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापो अप्स-
रस ऊर्जो नाम ताभ्यः स्वाहा॥ ॐ इदमद्भ्योऽप्सरोभ्य ऊर्ग्भ्यो न मम॥८॥ भुज्युः सुपर्णो यज्ञो गं-
धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ ॐ इदं भुज्यवे सुपर्णाय यज्ञाय गंधर्वाय न मम॥९॥
भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणा अप्सरस स्तावा नाम ताभ्यः स्वाहा॥ ॐ इदं दक्षिणाभ्यो

ऽप्सरोभ्य स्तावाभ्यो न मम॥१०॥ प्रजापतिर्विश्वकर्मा मनो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वा-
ट्॥ ॐ इदं प्रजापतये विश्वकर्मणे मनसे गंधर्वाय न मम॥११॥ प्रजापतिर्विश्वकर्मा मनो गंधर्वस्तस्य
ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा॥ ॐ इदमृक्सामभ्योऽप्सरोभ्य एष्टिभ्यो न मम॥१२॥
इति राष्ट्रभृद्धोमः॥ अथ जयाहोमः॥ चित्तं च स्वाहा॥ ॐ इदं चित्ताय न मम एतिसर्वत्र वाच्यं॥ चित्तिश्च स्वाहा॥ इदं चि-
त्यै न मम॥ आकूतं च स्वाहा॥ इदं आकूताय॥ आकूतिश्च स्वाहा॥ इदमाकूत्यै०॥ विज्ञातं च स्वाहा॥ इदं विज्ञाताय० विज्ञा-
तिश्च स्वाहा॥ इदं विज्ञात्यै०॥ मनश्च स्वाहा॥ इदं मनसे०॥ शक्वरीश्च स्वाहा॥ इदं शक्वरीभ्य०॥ दर्शश्च स्वाहा॥ इदं दर्शाय०॥
पौर्णमासं च स्वाहा॥ इदं पौर्णमासाय०॥ बृहच्च स्वाहा॥ इदं बृहते०॥ रथंतरं च स्वाहा॥ इदं रथंतराय०॥ प्रजापतिर्जयानिंद्रा-
य वृष्णे प्रायच्छदुग्रः पृतनाजयेषु॥ तस्मै विशः समनमंत सर्वाः स उग्रः स इहव्यो बभूव स्वाहा॥ इदं प्रजापतये०॥
इति जयाहोमः॥ अथाऽभ्यातानहोमः॥ अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशि-
ष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां स्वाहा॥ इदमग्नये भूतानामधिपतये॥ इंद्रो ज्येष्ठाना-
मधिपतिः स मावत्व० स्वाहा॥ इदमिंद्राय ज्येष्ठानामधिपतये॥ वस्यमाणेषु सर्वमंत्रेषु समावत्वि त्यादिनं

त्रे

त्रेशेषस्यानुषंगः॥ यमः पृथिव्या अ[illegible]धिपतिः॰ देवहूत्साधं स्वाहा॰ इदं यमाय पृथिव्या अ
धिपतये॥ ॐ [illegible]दकालंभ इति वासुदेवः॥ वायुरंतरिक्षस्याधिपतिः॰ इदं वायवें[illegible]तरिक्षस्या
धिपतये॥ सूर्योदिवोधिपतिः स मा॰ इदं सूर्याय दिवोधिपतये॥ चंद्रमा नक्षत्राणामधिपतिः स
मा॰ इदं चंद्रमसे नक्षत्राणामधिपतये॥ बृहस्पतिर्ब्रह्मणोधिपतिः स मा॰ इदं बृहस्पतये
ब्रह्मणोधिपतये॥ मित्रः सत्यासत्यानामधिपतिः स मा॰ इदं मित्राय सत्यानामधिपतये ॥
वरुणोपामधिपतिः स मा॰ इदं वरुणाय अपामधिपतये॥ समुद्रः स्रोत्यानामधिपतिः स मा॰
इदं समुद्राय स्रोत्यानामधिपतये॥ अन्नं साम्राज्यानामधिपति तन्मावतु अस्मिन्ब्रह्मण्यस्मि
न्क्षत्रे॰ इदमन्नाय साम्राज्यानामधिपतये॥ सोम ओषधीनामधिपति स मा॰ इदं सोमाय
ओ॰ षधीनामधिपतये॥ सविता प्रसवानामधिपति स मा॰ इदं सवित्रे प्रसवानामधिपत
ये॥ रुद्रः पशूनामधिपतिः स मा॰ इदं रुद्राय पशूनामधिपतये॥ उदकस्पर्शनं॥ त्वष्टा

८० ष३ ८०

रूपाणामधिपतिः स मा॰ इदं त्वष्ट्रे रूपाणामधिपतये॥ विष्णुः पर्वतानामधिपतिः स मा॰॥ इदं
विष्णवे पर्वतानामधिपतये॥ मरुतो गणानामधिपतयस्ते मावं॰ इदं मरुद्भ्यो गणानामधि
पतिभ्यः॥ पितरः पितामहाः परे वरे ततास्ततामहाः इह मावंत्वस्मिन्नित्यादि॰ इदं पि
तृभ्यः पितामहेभ्यः परेभ्यो वरेभ्यस्ततस्तामहेभ्यः॥ उदकोपस्पर्शः॥ इत्यभ्यातानहोमः॥ अग्नि
रेतु प्रथमो देवतानां॰ रोदात्स्वाहा॥ इदमग्नये॥ इमामग्निस्त्रायतां॰ इदमग्नये॥ स्वस्ति
नो अग्ने॰ त्रेधं स्वाहा॥ इदमग्नये॰ सुगन्नुपथां॰ क्षवोतु स्वाहा॰ इदं देवस्वताय॰ परमृत्यो अ
नु॰ वीरान्स्वाहा॰ इदं परमृत्यवे॥ उदकोपस्पर्शः॥ सेत्रव प्राशनांते वा अयं होमः॥ ततः
कुमार्या भ्राता शमीपलाशमिश्रांल्लाजानंजलिनांजलावावपति तान्कुमारी त्रिः स्रुवा
जुहोति॥ अर्यमणमिति प्रथमां॥ ॐ इदमग्नये न मम इति॥ वरस्य यागः इयं नार्युपब्रूते
इति द्वितीयां॥ इदमग्नये॥ इमांल्लाजानावपामीति तृतीयां॥ इदमग्नये॥ कन्यैव मंत्रत्रयं प
ठति॥ ततो वरो गृभ्णामि ते सौभगत्वाय इत्यादि गाथाभ्य शरद इति मंत्रेण कन्याया
अंगुष्ठसहितं दक्षिणहस्तं गृह्णाति॥ अथेनामश्मानमारोहेति दक्षिणपादेनोत्तरत

स्तनम्य ये१ ट३ न य

स्थापितं ॥ आरोहेममश्मानमिति मंत्रेण वरस्य मंत्रपाठः ॥ ततो वरः सरस्वती प्रेदमव इति
मां गाथां पठति ॥ अथ वधूवरौ अग्नेः प्रदक्षिणं परिक्रामतः स्कम्भ्य मग्रे पर्यवहन्निति व
रः पठति मंत्रेण ॥ ततो जलं लाजावपनादि परिक्रमणान्तं पुनर्वारद्वयं कुर्यात् ॥ ततस्तृ
तीयपरिक्रमणान्ते शूर्पकोणेन सर्वांल्लाजानग्नौ जलौ प्रक्षेपः ॥ ततः कुमारी तानू जुहोति
भगाय स्वाहेति इदं भगाय न ममेति वरः ॥ अत्राराते छीचतुर्थे परिक्रमणं ॥ कुरुतइ
ति रेणुदीक्षितादयस्ततो वर आज्येन प्रजापतये स्वाहेति जुहोति ॥ तत्र वरः ॥ सप्तप
दीनि प्रक्रामस्वेति ब्रूयात् ॥ एकमिषे विष्णुस्त्वां नयत्विति मंत्रं पठित्वा ॥ प्रथमं द्वे ऊ
र्जे विष्णुस्त्वा० द्वितीयं ॥ त्रीणि रायस्पोषाय विष्णुस्त्विति तृतीयं ॥ चत्वारि मायोभ
वाय विष्णु० चतुर्थं० पंच पशुभ्यो विष्णु० पंचमं ॥ षड् ऋतुभ्यो विष्णु० षष्ठं ॥ सखे सप्त
पदा भव सा मामनुव्रता सप्तमं ॥ ततो वरः पूर्वधृतादुदकुंभादुदकमादाय आपः शिवा इति
मंत्रेण वधूमूर्द्धन्यभिषिंचति ॥ ततो वरः सूर्यमुदीक्षस्वेति वधूं प्रेष्यति ॥ सा च तच्च
क्षुरित्यादिभिः पश्येम शरदः शतमित्यंतेन मंत्रेण सूर्यमुदीक्षते ॥ ततो वरो वध्वा

र९॥ ना ४ ॥र९॥ भवेति ३

३ यर्मव्युपवेशाय नीहगावह ३

दक्षिणस्कंधोपरि हस्तं नीत्वा मम व्रते इति मंत्रेण तस्याः हृदयमालभते ॥ ततो वरो वधूमभिमंत्रयते
सुमंगलीरिति ॥ अत्राचारात्स्त्रियः सिंदुरदानं कुर्वंति ॥ ततो वरस्तामुत्थाप्य प्राच्यामुदीच्यां परि
वृते रोहितानडुहे ॥ ततो वर आगत्य पश्चादग्नेरुपविश्य आग्नेय स्विष्टकृते स्वाहेति जुहोति ॥ इदमग्न
ये स्विष्टकृते ॥ संस्रवप्राशनं ॥ मार्जनं ॥ पवित्रप्रतिपत्तिः ॥ प्रणीताविमोकः ब्रह्मणे दक्षिणादानं ॥ ततः
स्वकीयाय गां ददाति ॥ ब्राह्मणभोजनं ॥ ततोऽस्तमिते ध्रुवं दर्शयति ध्रुवमसीति मंत्रेण ॥ सा च तं ध्रु
वं पश्यति ॥ सा यदि ध्रुवं न पश्येत् तथापि पश्यामीत्येव ब्रूयात् ॥ ततो दंपत्योः क्षाराद्धिनियमः ॥ तत्रका
लः ॥ समे च दिवसे कुर्याद्देवकोत्थापनं बुधः ॥ षष्ठं च विषमं नेष्टं मुक्त्वा पंचमसप्तमौ ॥ समेषुष
ष्ठ विषमेषु पंचमसप्तमातिरिक्तं दिनं मात्रेष्टमित्यर्थः ॥ संकल्पपूर्वकं सर्वा देवताः प्रत्येकं प्र
णम्य लाउत्तिष्ठ ब्रह्मणस्पत इति विसर्जयेत् ॥ मंडपोद्वासनं यथाकुलाचारं रंभाद्विजाशिषो
मंगल्यतः स्यात् ॥ ॥ अथ वध्वाः प्रथमगृहप्रवेशः ॥ वधूप्रवेशः प्रथमे तृतीये भु मप्रदः

दि२ वार मा चार्य न६

॥ इति विवाहे पदार्थक्रमः ॥ अथ देवकोत्थापनमंडपोद्वासनविधिः ॥ ५

पंचमभ्रमे यावन्निः द्वितीयके वायचतुर्थके वाब्दे वियोगामयदुःखदस्यात्॥ ततःश्वभवनपुर प्रवेशोदेशानां विपूर्वेतथोक्ताहे॥ नववध्वागृहागमने प्रतिशुक्र विचारणा नास्ति॥ नित्य यावे गृहे जीर्णे प्राशनां तेषु सत्सु॥ वधूप्रवेशमांगल्येन मौढ्यं गुरुशुक्रयोः॥ इयोतिः प्रकाशे॥ वामे शुक्रेन वोढायाः सुख हानिश्च दक्षिणे॥ धनं धान्यं च पश्च स्यो सर्वनाशः पुरस्थिते॥ नवोढायास्त्र वैधव्यं पदुत्कं संमुखे भृगौ॥ तदेव विबुधैर्लेयके वलं। तद्दिशामकं॥ पूर्वतो भ्यदपि तेभ्र के प्रयायादक्षिणापरे॥ पश्चाद्भ्यदपिते चैव यायात्पूर्वापरे दिशे॥ तथा भाद्रपद मासमारभ्य पूर्वादिमुख्यदिक्षु प्रति दिशं मासत्रयं कपाटं ज्ञेयं॥ चैत्रमारभ्य पूर्वाद्यष्टदिक्षु मुख्यदिशि मासाद्वयं विदिक्षु कं मासं क्रमेण कंटकं ज्ञानीयात्॥ इदं द्वयं ग्रामांतरेन व वधूगमने वर्ज्यं॥ नियत काले पि कदाचिन्निषेधमाह गर्गः॥ व्यतिपाते च संक्रान्तौ ग्रहणे वैधृतावपि॥ श्राद्धं वि नाशुभं नैव प्राप्तकालेपि मानवः॥ तथा॥ अमासंक्रान्ति विष्ट्यादौ प्राप्तेकाले पि नाचरेत्॥

इति॥ विवाहात्प्रथमे पौषे आषाढे चाधिमासके॥ भर्तृगृहे वसेन्न स्त्री चैत्रे तात गृहे तथा॥ इति वधूगृहागमन विधिः॥ अथ मार्गमतेन पदार्थक्रमेविशेषः॥ अग्निस्थापनादि ब्राह्मणतर्पणां तं विवाहकर्म॥ प्रथमं आचार्यकृतकमग्निस्थापनं॥ ततो मधुपर्कादि॥ अर्चयेति वरः॥ विष्टरो विष्टरो विष्टर इत्यन्यः॥ प्रतिगृह्णतामिति दाता॥ प्रतिगृह्णामीति वरः॥ एवमग्रे सर्वत्र पाद्यादौ ह्येयं॥ एकस्मिन्विष्टरे आसनं॥ तदेव तेनैव मंत्रेण पादयोरधस्तान्निधानं द्वितीय विष्टरस्य। प्राणसंमर्शनं॥ नाश्लिय यथा हारः सर्वत्र॥ गोशाले भांते लाङ्गलांतिया चनं पुण्याहस्थाने॥ ततो मधुपर्कार्चनसमानं॥ ततः सदक्षिणं कन्यादानं॥ ततः कौतुकागारं प्रविशति॥ युवतीनां मंगलाचारयुक्तानाम प्रतिकूल भावैः प्रविशति॥ अन्य त्राक्षेपातकेभ्यः॥ ततआचार्यो वासः परिधापयति जरां गच्छ इति॥ उत्तरीयं च॥ ततः समंजनं॥ अध्येषणा माचार्यस्य॥ कंकणबंधनं परस्परं॥ दक्षिणहस्तेन पाणिं गृहीत्वा निष्क्रामयति यदैषीति॥ कन्यानामग्रहणे ओं पर परस्परं समीक्षणं॥ उदकुंभं पूर्णं स्कंधे धृत्वा यच्छेयं॥ ततः प्रदक्षिणमग्निं परीत्य पश्चादग्नेस्तेजन्यां कटे दक्षिणपादं दत्वा उपवेशनं॥ ब्रह्मोपवेशनादि सर्वं प्रायश्चित्तांते विशेषः॥ आसादने चंरोरभावः॥ शूर्पेण शमिपलाशमिश्रां

वा च न ६
ग ५ न
चा २

२ अनंतोदा प्रायण यत्तिस्वाहा पूरः सर्वत्र शाकाक्षस्वादिति सूत्रेपीति

लाजाः॥ हृषादुपलैश्च॥ जौदुहं॥ भ्राता॥ वरश्च॥ पर्युक्षणां तेषा घोदि सर्वप्रायश्चित्तांतं॥ राष्ट्रभृदादीनां सिंचयाहोमः॥ राष्ट्रभृद्धोमः॥ ऋताषाट् ऋतधामा इदं॥ इति प्रथमः॥ तस्याधयोः इति द्वितीयः॥ एवमग्रेपि॥ ततो जयाहोमः॥ तत्र चित्तं च स्वाहेति चतुर्थ्यंतेन प्रयोग इति श्रीगर्गः॥ ततोभ्यातानहोमः॥ ततोग्निरैतु स्वाहेति चतुष्टयं॥ परमस्यां विति पात्र॥ ततः कुमार्या हस्तयोरुपस्तरणं भ्रातुः॥ माता कुमारी हस्तलेपनं ददाति॥ लाजानमावपनं संकृत्प्रत्यभिघारणं सव्यहस्तेन दक्षिणेन होमः॥ इदमर्यम्णे इति प्रथमस्य त्यागः॥ द्वितीयतृतीययोरग्नये॥ अर्यमण मिति त्रयाणां पाठो वरस्य पाठः॥ पाणिग्रहणं॥ अश्मानमारोहयेति प्रैषपूर्वं कुमारोहणं॥ परिक्रमणं॥ एवं वारद्वयं लाजादि परिक्रमणांतं॥ प्राजापत्ये होमः॥ सप्तपदानि॥ अभिषेकः॥ ततस्ति सूर्यमीक्ष्य प्रैषपूर्वकं सूर्यवीक्षणं॥ हृदयालंभः॥ अभिमंत्रणं॥ ग्राकटे चर्मास्तीर्णे वरः कन्यामुपवेशयति॥ स्विष्टकृद्धोमः॥ संस्रव भक्षः॥ परंमृत्यु त्र्यां होमः॥ मार्जनं पवित्र प्रतिपत्तिः॥ ब्रह्मणे दक्षिणादानं॥ अस्तमिते ध्रुवदर्शनं॥ प्रैषपूर्वकं ध्रुवमसि तिवध्वाः पाठः॥ बर्हिर्होमः॥ प्रणीता विमोकः॥ कर्मापवर्ग समिदाधानं उद्वर्जनं ब्राह्मणाः॥ उपयमन भग्गायस्वाहेत्येनेन विग्राहं वारत्रयं होमः॥ तस्रीपरिक्रमणं॥ ४ २ आचार्यायगोदानं॥ २

८३ २विसर्ग

८३

कुक्षा नाम अग्नौ प्रक्षेपः॥ ब्राह्मण भोजनं॥ इति गर्गमते विशेषः॥ अथ पुनर्विवाहः॥ वृत्ते विवाहे पंचांगशुद्धिशरीरस्यादिदोषश्चेज्ज्ञातः॥ तदा तत्प्रीतिः स्यात् स्त्री काल विशेषे पुनर्विवाहः कार्यः॥ तदाह नसीहश्रीधरीये॥ पुनर्विवाहं वक्ष्यामि दंपत्योः शुभवृद्धिदं॥ लग्नेंदुलग्न यो दोषे ग्रहतारादिसंभवे॥ अन्येषु शुभकाले षु दुष्टयोगादिसंभवे॥ विवाहे चापि दंपत्योराशौ चादिसमुद्भवे॥ तस्य दोषस्य शांत्यर्थं पुनर्वैवाहमिष्यते॥ व्ययं तचोत्तरं श्रेष्ठं वदंपेतु विशेषतः॥ आषाढ मार्गशीर्षौ दौ वज्यौ शोभावुभावहाः॥ विवाहोक्त दर्शतिथ्यतारा शिवारापि वर्गज्ञाः॥ करणा योग संज्ञा विग्रह गोचर योगकाः॥ तस्मिन्विवाह समये शुभदाश्च तथैव हि॥ पूर्वास्ते पूर्वजां रात्रेच विवाह शुभदो भवेत्॥ अधिवेदीयादि विवाहविधिः॥ तत्राधिवेदनीया आह याज्ञवल्क्यः॥ सुरापी व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा॥ स्त्रीप्रसूतांश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा॥ अधिवे

शुभावहाः

त्रीनुभर्तृयाम्महदेनोम्यचा न वेत्।।अधिविन्नया तदुपरि स्वांतरं कर्त्तौभस्य र्थः।।आपस्तंबः।।ध
र्मप्रजासंपन्ने दारे नान्यां कुर्वीतेति।।अधिवेदने प्रतिप्रसवमाह मनुः। वंध्याष्टमेधिवेद्याब्दे दशमे
तु मृतप्रजाः।।एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी।।१।।इत्थं तु विवाहांतरे विशे
षः।एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति।।समर्थस्तोषयित्वार्थैः पूर्वोढामपरां चरेत्।।याज्ञ
वल्क्यस्तु।।आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं।।त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं
स्त्रियः।।सधनो धनत्यजी यां राम धनो वा नाच्छादनम्रकं भरणं दाप्य इत्यर्थः।।यावेतावता प
रितुष्टा गृहान्निर्गच्छेत्तां प्रत्याह मनुः।।
मनुः।।अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृ
हात्।।सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसन्निधाविति।।बहुभार्यापुंसः प्रथम एव सह ध
र्मं सपत्नीकस्याप्यं कुर्यादिति होमाद्रौ कात्यायनः।।अग्निशिष्टादिशुश्रूषां बहुभार्यः

सवर्णया।।कारयेत्बहुत्वे चेज्ज्येष्ठया गर्हिता न चेत्।।इति।।शिष्टशुश्रूषा आतिथ्यादिपूजा।।स
च पत्नीसंपाद्यः धर्ममात्रोपलक्षणार्थो।।गर्हिता धर्मयोग्यत्वापादकपातित्यादिदोषवति
न चेदित्यर्थः।।तादृशी चेन्नतया।।किं त्वनेन विनयाकनिष्ठयापि सवर्णासु विद्यमानासु ज्येष्ठया रूपि कारयेत्
नाव्यवहिता।। अन्यामसवर्णां।।इदं चाधाने सहाधिकृतानेकभार्याविषयं।।
अनधिकृतायास्तु प्रसंगस्यैवाभावात्।।तत्रापि केवलं क्रत्वर्थमाज्यवेक्षणादिपदार्थमानोदुम्बरीसमा
नवदेकैव सवर्णा ज्येष्ठया रियत्।।पत्नीसंपन्नग्रहणादि कर्तृसंस्कारो।।सहाधिकृताभिः स
वर्णाभिः स्यादिमीमांसा मासत्वमनसो सुज्ञाख्यं।।द्वितीयादिविवाहेग्निनियममाह होमाय
कात्यायनः।।सदारोन्यान्पुनर्दारानुद्वोढुं कारणांतरात्।।यदि छेदग्निमान्कुर्वन्क्व होमोस्य विधि
यते।।अत्र द्वितीयादिविवाहे जीवत्पितृकोपि स्वयमेव नांदीश्राद्धं कुर्यात्।।नांदीश्राद्धं कुर्या
द्घ्रिणापि गृहे पुनः।।अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदीकमिति स्मृतेः।।तत्र पितृवर्गेवि
यमातृमातामहयोः कुर्यात्।मातरि जीवंत्यां मातामहवर्गस्यैव तस्मिन्नपि जीवति द्वारलोप
त्वगना वैव भवेद्धोमो लौकिकेन कदाचनेति।।अयं च नियमः।।संभवे।।यामांतरा
दावसंभवे तु लौकिकाग्नौ।।३

५

उद्दिश्याद्धलोप एव॥ सोपि साग्निकश्चेद्येभ्यः पिता दद्यात्तेभ्यः स्वयमपि दद्यात्॥ येभ्य एव पि
ता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति वचनात्॥ अन्ये तु असाग्निकोपि पितृदेवताभ्यो दद्यान्न तु
लोपः। वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति
मैत्रायणीयपरिशिष्टादिस्मृतेः॥ द्वितीयादिविवाहे कालविशेषसंग्रहे॥ प्रमदामृतिवासरा
दितः पुनरुद्वाहविधिर्वरस्य च॥ विषमे परिवत्सरे शुभो युग्मके [illegible]पि प्रतिप्रदो भवेत्॥
जीवत्स्वां पूर्वपत्न्यां द्वितीयादिविवाहे नायं कालनियमः॥ अथ तृतीयमानुषीविवाहस्य
निषिद्धत्वात्तस्मिन्कर्तव्येऽर्कविवाहविधिः॥ तृतीयानिषेधमाह कश्यपः॥ तृतीयां मानु
षीं नैव चतुर्थीं यः समुद्वहेत्॥ पुत्रपौत्रादिसंपन्नकुटुंबी साग्निको वरः॥ उद्वहेदिति
सिद्ध्यर्थं तृतीयां न कदाचन॥ मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीं॥ नश्यत्ये

५

पथा०

व न संदेहो गर्गस्य वचनं यथा॥ तृतीयां यदि चोद्वाहेत्तर्हि सा वि[illegible]धवा भवेत्॥ संग्र
हे॥ तृतीयां यदि वोद्वाहेत्तर्हि सा विधवा भवेत्॥ चतुर्थ्यादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत्॥ मु०२
आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे॥ शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकं॥ दे
वादिब्रह्मपुराणदर्शिति॥ ग्रामात्प्राच्यामुदीच्यां वा सपुष्पफलसंयुतां॥ परीक्ष्यार्कं [illegible]य
त्वोधस्तात्स्थंडिलादि यथाविधि॥ व्यासः॥ स्नात्वालंकृतवासाः स्रक्चंदनगंधादि
भूषितं॥ सपुष्पफलमार्के क्रमर्कगुल्मं समाश्रयेत्॥ सलक्षणेन संयुक्तमर
र्कं संस्थापयेत्ततः॥ अर्कमभ्यर्प्य दत्तार्घ्यमाचार्यं [illegible]येत्॥ अर्कस्य
त त्रिविभागसंस्थस्य स्थादिवाचयेत्॥ नांदीश्राद्धं हिरण्येन अष्टवर्गास्तु पूज
येत्॥ सूजये मधुपर्केण वरं विप्रस्य हस्ततः॥ यज्ञोपवीतं वस्त्रं च हस्ते म
णीन्दि भूषणं॥ उष्णीषगंधमाल्यादि वरायास्मै प्रदापयेत्॥ स्व[illegible] चोत्तरीकं
प्रकारेण मधुपर्कं समाचरेत्॥ ब्रह्मपुराणे॥ यथाविधि धौतस्यानंतरं॥ ध्रु

ह्यार्कपुरतस्तिष्ठन् प्रार्थयेत्तद्विजोत्तमाः॥ त्रिलोकवासिन्सप्ताश्व छायया सहितो रवेः
ततीयोद्वाहजं दोषं निवार्य सुखं कुरु॥ तत्रात्या रोप्य देवेशं छायया सहितं सवि ॥ वस्त्रै
र्माल्यैस्तथा गंधैस्तन्मंत्रेणैव पूजयेत्॥ तन्मंत्रः॥ आकृष्णेनेत्यादि॥ अन्यत्रापि श्रुतावस्त्रेण
संवेष्ट्य तथा कार्पासितंतुभिः॥ गंधपुष्पैः समभ्यर्च्य ... दनं तु नैवेद्यतांबु त २
च सर्पयेत् अर्कं प्रदक्षिणां कुर्वन् जपेन्मंत्रमिमं बुधः॥ मम प्रीतिकरा येन मया सृष्टा पुरा
तनी॥ अर्कजा ब्रह्मणा सृष्टा अस्माकं परिरक्षतु॥ पुनः प्रदक्षिणी कुर्यान्मंत्रेणानेन
मंत्रवित्॥ नमस्ते मंगले देवी नमः सवितुरात्मजे॥ त्राहि मां कृपया देवि पत्नीत्वं मे इ
हागता॥ अर्कत्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च॥ वृक्षाणामादिभूतस्त्वं देवानां
प्रीतिवर्द्धनः॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय॥ ततश्च कन्या वरैस्त्रिपुरुषं
कुलमुच्चरेत्॥ आदित्यः सविता सूर्यः पुत्री पौत्री च नप्त्रिका॥ गोत्रकाश्यप इत्युक्तं

गायत्र्या ह्यथ वाजपेयम्॥ पंचीकृत्य पुनः सूत्रं स्कंधे बध्नाति मे ततः॥ बृहत्सामेति मंत्रेण
लोके लौकिकमाचरेत्॥ सुमुहूर्तेऽर्कनिरीक्षेते स्वस्ति सुमुहूर्तमुदीरयेत्॥ आशीर्भिः सहितः कु
र्यादाचार्यप्रमुखैर्द्विजैः॥ अथाचार्यं समाहूय विधिनात्तनुखाच्छतं॥ प्रतिगृह्य ततो नूयं गृह्या
क्तविधिनाचरेत्॥ आचार्यस्य दानमंत्रमाह व्यासः॥ अर्ककन्यामिमां विप्र यथाशक्ति विभूषितां॥
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय॥ अंगुल्यक्षतकर्मणि वृह्यार्ककणपूर्वकं॥ यावत्सं
चावृतं सूत्रं तावदर्कं प्रवेष्टयेत्॥ स्वशाखोक्तेन मंत्रेण तस्मात्र रक्षां प्रकल्पयेत्॥ अर्कस्य पू
र्वतः पश्चाद्दक्षिणोत्तरतस्तथा॥ कुंभांश्च निक्षिपेत्पश्चादाग्नेयादि चतुष्टये॥ वस्त्रं च प्रति
कुंभं च त्रिः सूत्रेणैव वेष्टयेत्॥ हरिद्रां गंधपुष्पं वै परस्पेत्सितलं तलं॥ प्रतिकुंभं महाविष्णुं सं
पूज्य परमेश्वरं॥ पाद्यार्घ्यादि निवेद्यांतं कुर्यान्नाम्नैव मंत्रवित्॥ अत्र होमप्रकारः शौनकेन प्रदर्शि
तः॥ ततीस्त्री विवाहे तु संप्राप्ते पुरुषस्य च॥ अर्कविवाहं वक्ष्यामि शौनकोहं विधानतः॥
अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत्॥ नांदीश्राद्धं प्रकुर्वीत स्थंडिलं च प्रकल्पयेत्॥

उल्लेखनादिकं कुर्यादाघारांतमतः परं ॥ आज्याहुतिं च जुहुयात्सगोभिरनयैकया ॥ २०
अर्कमभ्यर्च्य सौर्याच गंधपुष्पाक्षतादिभिः ॥ सौर्यास्तु सूर्यदेवत्या ॥ आकृष्णेनेत्यादिऋचा ॥ स्व
येचालंकृत तंतदहस्त्रमाल्यादिभिः शुभैः ॥ अर्कं कन्यांस्योत्तरदेशे तु समन्वारब्ध एतया ॥ एतं ते अन्यया ॥ या २
य ३ यस्मै त्वा कामकामाये त्येतेनाज्याहुतीः परं ॥ व्यस्ताभिः समस्ताभिस्तताभ्यस्य [illegible] ष्टकृद्भवेत् ॥ परिसेचन थे ३
पर्यंतमथाश्वेत्यादिकं क्रमात् ॥ प्रार्थनामंत्रादि विशेष महाव्यासः ॥ पुनः प्रदक्षिणं कृत्वा मंत्र
मितन्मुदीरयेत् ॥ मया कृतमिदं कर्म स्थावरेषूत्तमायुम ॥ अ [illegible] र्कापत्यानि नो देहि तत्सर्वं क्ष
तुमर्हसि ॥ इत्युक्त्वा शांतिसूक्तानि जप्त्वा तं विसर्जयेत्पुनः ॥ गोयुग्मं दक्षिणां दद्यादाचार्याय च भ
क्तितः ॥ इतरेभ्योपि विप्रेभ्यो दक्षिणां चापि शक्तितः ॥ तत्सर्वं गुरवे दद्यात्तत्पुण्याहवाचयेत् ॥
अत्र पंचमदिने कर्तव्यमुक्तं ॥ ब्रह्मपुराणे ॥ चतुर्थे दिवसे तीते पूर्ववत्तां प्रपूज्य च ॥ विसृज्य ८६
८६ होममग्निं च विधिना मानुषीं परां ॥ उद्वहेदन्यथा नैव पुत्रपौत्रादिवर्द्धिमान् ॥ नपश्यन

च मित्राणि मंगलं नैव गच्छति ॥ एवमेव द्विजश्रेष्ठ विधिना सम्यगुद्वहेत् ॥ धनधान्यसमृद्धि
श्च इच्छाशक्तिः परत्र चेति ॥ अत्रैवं संक्षेपतः प्रयोगः ॥ उक्ते आदित्यवारादौ शुक्रे देशे यथोक्तार्कस
मीपं गत्वाचम्य प्राणानायम्य देशकालौ संकीर्त्य मम तृतीय मानुषी विवाहदोषभावार्थ्यकमर्कविवा
हं करिष्य इति संकल्प्य आचार्यवरणं स्वस्तिवाचनं नांद्युक्तकर्म च कुर्यात् ॥ अत्र होमे विशेषः ॥
अर्क ५ ईशान्यादिसंकीर्त्य [illegible] ग्निं होमं करिष्ये ॥ ततोग्निस्थापना आघारांतं कृत्वा आज्येन षडाहुतीर्जुहुयात् ॥ सं
गोभिरंगिरसो [illegible] माणो भग इवेद्दर्यमणं निनाय ॥ जने मित्रो न दंपती अनक्ति बृहस्पते वाजयाशूंरिवाजौ
त्वा स्वाहा ॥ इदं बृहस्पतये नमम ॥ यस्मै त्वा कामकामाय वयं सम्राड्यजामहे ॥ तमस्मभ्यं कामं दत्वाथेदं त्वं घृतं पि यं
व स्वाहा ॥ इदमग्नये नमम ॥ भूः स्वाहा ॥ भुवः स्वाहा ॥ स्वः स्वाहा ॥ भूर्भुवः स्वः स्वाहा ॥ त्यागउक्तः ॥ ततो स्वि
ष्टकृन्नवाहुत्यादि शेषं समापयेत् ॥ ततः प्रदक्षिणप्रार्थनादिकर्मशेषसमापनं ॥ इत्यर्कविवाहः ॥ ॥ छ
अथैकस्त्रियां निर्णयः ॥ तत्र वृद्धमनुः ॥ एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः ॥ न समानक्रि
यां कुर्यान्मातृभेदे विधीयते ॥ अत एकस्य पुंसो विवाहद्वयमेकवत्सरे निषिद्धं मातृभेदाभावात् ॥ नारदः ॥

पुत्रोद्वाहात्परं पुत्रीविवाहो नऋतुत्रये॥ न तयोर्व्रतमुद्वाहात् मंडनादपि मुंडनं॥ ॥वराहः॥ विवाहश्चैक जाता
नां षण्मासाभ्यंतरे यदि॥ असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत्॥ वसिष्ठः॥ ॥न पुंविवाहोर्ध्वमृ
तुत्रये विवाहकार्यं दुहितुः प्रकुर्यात्॥ न मंडनाच्चापि हि मुंडनं च गोत्रैकतायां यदि नास्ति भेदः॥ एकोदरभ्रा
तृविवाहस्त्वेकस्यैव सुतैर्न पाणिग्रहणं विधेयं॥ षण्मासमध्ये मुनयः सुमुचुर्न मुंडनं मंडनतोपि कार्यं॥ एतद
पवादोप्यत्रैव॥ ऋतुत्रयस्य मध्ये चेदन्याब्दस्य प्रवेशनं॥ तदा ह्येकोदरस्यापि विवाहस्तु प्रशस्यते॥ सा
रावल्यां॥ फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने॥ भेदो ब्दस्य प्रकुर्वीत नर्तुत्रय विलंबनं॥ संहिताप्र
दीपे॥ ऊर्ध्वं विवाहात्तनयस्य नैव कार्यो विवाहो दुहितुः समार्धं॥ अप्राप्यकन्या श्वसुरालयं च वधूप्रवेशाद्व
रवह्नं न वादो॥ वसिष्ठः॥ द्विशोभनत्वेकगृहेपि नेष्टं शुभं तु पश्चान्नवभिर्दिनैश्च॥ आवश्यकं शोभनमु
त्सवो वा द्वारे च वा चार्य विभेदतो वा॥ एकोदरप्रसूतानां नाग्निकार्यत्रयं भवेत्॥ भिन्नोदरप्रसूतानां
नेति शातातपोऽब्रवीत्॥ ज्योतिर्निबंधे कात्यायनः॥ कुले ऋतुत्रयादर्वाक् मंडनान्न तु मुंडनं॥ प्र

वेशान्निर्गमो नेष्टो न कुर्यान्मंगलत्रयं॥ कुर्वंति मुनयः केचिदन्यस्मिन्वत्सरे लघु॥ लघु वा गुरु वा का
र्यं प्राप्तं नैमित्तिकं तु यत्॥ पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः॥ मुंडनं चौलमित्युक्तं
व्रतोद्वाहौ तु मंगलं॥ चौलं मुंडनमेवोक्तं वर्जयेन्मंडनात्परं॥ मौंजी चोभयतः कार्या यतो मौंजी
नमुंडनं॥ अभिन्ने वत्सरे विस्याः न दहस्तं न भेदयेत्॥ अभेदे तु विनाशः स्यान्न कुर्यादेकमंड
पे॥ संकटे तु रूपर्द्दिकास्युः॥ उद्वाह्य पुत्रीं न पिता विदध्यात् सुतेतरस्योद्वहनं कदापि॥ यावच्चतुर्थं
दिनमत्र पूर्वं समाप्य चान्योद्वहनं विदध्यात्॥ काश्यपः॥ भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा॥ स्त्री
किं न कुर्यान्मंगलं चेदेकस्मिन्मंडपेहनि॥ ज्योतिर्निबंधे॥ एकोदरयोर्द्वयोरेकदिनोद्वहने भवेन्ना
शः॥ न घंतरे स्येकदिनं के प्याहुः संकटे शुभं॥ उर्ध्वं विवाहात् षण्मदोन रस्य नारी विवाहो
न चर्तुत्रये स्यात्॥ नारी विवाहोत्तरदहे विरात्तनरस्य पाणिग्रह माहुरार्याः॥ भिन्नमातृज
योस्तु एकवासरे विवाहमिच्छन्ति विदः॥ पृथक्मातृजयोः कार्यो विवाहस्त्वेकवासरे॥ एकस्मिन् माहा
मौंजीबंधस्त्वथोद्वाहः षण्मासाभ्यंतरे पिवा॥ पुत्र्युद्वाहं न कुर्वीत विभक्तानां न दोषकृत्॥ गार्ग्यः॥

रस्थ मुभाभ्यां९

न्वत्सरे कार्यः पृथग्वैदिकयोस्तथा॥ पुष्पैर्हैकयोः कार्यं दर्शनं वर्षयोः॥ भगिनी भ्रातृयोश्चैव यावत्संसप
दी भवेत्॥ यमयोरपि विरोधः॥ गार्ग्यः एकस्मिन्वत्सरे प्रासे कुर्याद्यमलजातयोः॥ क्षौरं चैव विवा
हं च मौंजीबंधनमेव च॥ तथा च कारिकायां॥ एकस्मिन्वत्सरे चैव वासरे मंडपे तथा॥ कर्तव्यं मंगलं
स्वस्रोर्भ्रात्रोर्यमलजातयोः॥ इति॥ अथ कन्यागृहे भोजननिषेधः॥ मदनरत्ने भविष्ये॥ अप्रजायां
तु कन्यायां न भुंजीत कदाचन॥ दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचति॥ अपरार्के आदित्यपुरा
णे॥ विद्धि तां मातरं मन्ये तस्य कोपनकारयेत्॥ अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृहे॥ यदि
भुंजीत मौढ्यात् पूयाशी नरकं व्रजेत्॥ नांदीश्राद्धानंतरं धर्माः॥ निर्णयदीपे गार्ग्यः॥ नांदीश्राद्धे कृते प
श्चाद्यावन्मातृविसर्जनं॥ दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च॥ अपसव्यं स्वधाकारं
नित्यश्राद्धं तथैव च॥ ब्रह्मयज्ञं चाध्ययनं नदीसीमातिलंघनं॥ उपवासव्रतं चैव श्राद्धभोजन
मेव च॥ नैव कुर्युः सपिंडाश्च मंडपोद्वासनावधि॥ ज्योतिषे॥ स्नानं सचैलं तिलमिश्रकर्म प्रेता
नुयानं कलशप्रदानं॥ अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मंगलतोब्दमेकं॥ पितृणा मुदे शेन

कलशदानमित्यर्थः॥ मासषट्कं विवाहादौ व्रतप्रारंभणेन च॥ जीर्णभांडादिनत्याज्यं गृहसम्मार्जनं तथा॥
ऊर्ध्वं विवाहात्पुत्रस्य तथा च व्रतबंधनात्॥ आत्मनो मुंडनं नैव वर्षं वर्षार्धमेव च॥ अभ्यंगे सूतके चैव वि
वाहे पुत्रजन्मनि॥ मंगल्येषु च सर्वेषु न धार्यं गोपिचंदनं॥ बृहस्पतिः॥ तीर्थे विवाहे यात्रायां संग्रामे दे
शविप्लवे॥ नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति॥ योगयाज्ञवल्क्यः॥ न स्नायादुत्सवे तीते मंगलं वि
निवर्त्य च॥ अनुव्रज्य सुहृद्बंधूनर्चयेदिष्टदेवतां॥ ज्योतिर्निबंधे॥ उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तु
र्गृहे कन्यका हन्यात्तज्जननीं क्षये निजतनुं ज्येष्ठे पतिं ज्येष्ठकं॥ पौषे च श्वशुरं पतिं च मलि
ने चैत्रे स्वपित्रालये तिष्ठंती पितरं निहंति न भयं तेषामभावे भवेत्॥ निबंधे॥ विवाहात्प्रथमे पौषे आ
षाढे चाधिमासके॥ न सा भर्तृगृहे तिष्ठेच्चैत्रे पितृगृहे तथा॥ हेमाद्रौ स्मृत्यंतरे॥ विवाहव्रतचू
डासु वर्षमर्धं तदर्धकं॥ पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं॥ स्मृतौ॥ महालये गयाश्रा
द्धे मातापित्रोः क्षयेहनि॥ कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सुतः॥ इति श्रुतिरग्निश्च॥ स

उपयमनकुशादानादि औपासनस्य आवसथ्याग्नेः परिचरणं व्याख्यातम् इति सूत्रशेषः॥ अथ श्रीमत्

माद्रूपतिश्रीमलयालिकवामनात्मजदीक्षितगदाधरचितविवाहप्रयोगः॥ आवसथ्ये ग्नौ होम

माह॥ उपयमनप्रभृत्यौपासनस्य परिचरणं॥ उपयमनान् कुशानादाय समिधोभ्याधाय पर्युक्ष्य

जुहुयादिति लभ्यते॥ होमस्त्वत्रोपदिष्टः॥ होमेपि चस्तति परिचरणग्रहणादिति कर्तव्यता [illegible] नभाव

ति॥ हस्तेनैवात्र होमः॥ इतिकर्तव्यताव्युदासात्॥ कथमितिकर्तव्यताव्युदासः इति चेत्॥ उपय

मनप्रभृतीत्युक्तत्वात्॥ पर्युक्षणं च मणिकोदके न होमकाल नियममाह॥ अस्तमितानुदितयोः।

अस्तमितश्च अनुदितश्च अस्तमितानुदितयोः॥ तत्कर्मकर्तव्यमिति शेषः॥ आवसथ्या

धानानंतरं अस्तमिते च सूर्ये अनुदिते च सूर्ये दाहोकार्यः॥ [illegible] नैवं सूत्रेऽप्याह॥

ततो स्तमिते ग्निं परिचर्य दिव्योपघातेऽस्तु स्वर्पेऽथो बलिं हरेदिति बलिहरणविधिपरत्वा

त्कोहोम [illegible] स्य नियतं ज्ञापयति॥ अस्तमितलक्षणं कोसावुच्यते॥ यावान् सम्यग् भा व्यंतेन प्रसृ

तानि सर्वतः॥ नोहि तत्वं च नोपेति तावत्साय तु हूयते॥ अनुदितस्य तदृष्टिपः॥ अनुदितश्च॥

समयाध्युषितश्च॥ तथा च मनुः। उदिते नुदिते चैव समयाध्युषिते तथेति॥ तत्रानुदितस्य

प्रतारतोपलक्षितः॥ ततः पुरः उदयात्प्राक् समयाध्युषितः॥ संपूर्णादित्यमंडलदर्शनोप

लक्षित उदितः॥ तत्रास्माकं सूत्रे अनुदित एव परं परमुक्तं॥ मनुवचने उदितग्रहणं शाखांतरीय

नरागामि प्रायेण॥ मुख्यकाले यदा होमो न भवति तदा गौणकालेपि कार्यः॥ तथा च मंड

नः॥ मुख्यकाले यदावश्यं कर्म कर्तुमशक्यते॥ गौणकालेपि कर्तव्यं गौणे प्यत्रेदृशो

भवेत्॥ गौणकालपरिमाणमपि तेनैवोक्तं॥ आसायमाहुतेः कालः कालोस्ति प्रातराहु

तेः॥ प्रातराहुतिकालः स्यात्सायमाहुतिरिति॥ मुख्यकालातिक्रमे प्रायश्चित्तपू

र्वकं गौणकाले नुष्ठानं॥ गौणकालातिक्रमे तु लोप एव॥ प्रायश्चित्तद्वयमात्रेरकम विज्ञा

तं॥ संध्योपासनहानौ च निस्स्नानं विलोप्य च॥ होमं चैनेस कं भुञ्जे सावित्र्यष्टसहस्र

कं दिति प्राज्ञापत्युक्तं द्वितीयं॥ होमे कर्ता स्वयं स्वस्यासं भवे पत्न्यादयः॥ प्रयोगरत्ने

स्मृतौ। पत्नी कुमारीपुत्रो शिष्यो वापि यथाक्रमं॥ पर्व [illegible] पर्वस्य [illegible] चाभावे विदध्या

दुत्तरोत्तरः॥ सर्वसर्वसारेपि॥ जैयेमानः प्रधानं स्यात्पत्नीपुत्रश्च कन्यका॥ ऋत्विक्
शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः॥ एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु॥ पत्नीकन्या
च जुहुयाद्विनापर्युक्षणक्रियामिति॥ अत्र च नासत्यादीनां मंत्रपाठे धिकारः॥ केव
लं पर्युक्षणे नाधिकारः॥ अग्निहोत्रे तु॥ न वा कन्या न युवती नाल्पविद्यो न बालिशः॥ हो
ता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथेति वचनात्सत्यादीनाम नाधिकारः॥ त्यागो विशे
षः॥ सन्निधौ यजमानस्यादुद्देश्यत्यागकारकः॥ असं[...]न्निधौ तु पत्नी स्यादुद्देश्य
त्यागकारिका॥ असंनिधौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया॥ उन्मादे प्रसवे च त्रौ कुर्वी
तानुज्ञया विना॥ मंडनः॥ त्यागं तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः॥ उभावप्यसमर्थौ
चेन्निस्पृक्तः कथ्यनस्यजेत्॥ दध्ना तंदुलैरक्षतैर्वा॥ गव्येन दध्ना वा व्रीहितंदुलै[...]र्वाक्ष

तैर्यवैर्वा जुहुयादित्यर्थः॥ तेषामभावे शाखांतरगृह्यपरिशिष्टोक्तानि द्रव्याणि ग्राह्याणि॥
तत्र प्रयोगरत्ने॥ पयो दधि सर्पिर्यवागूरोदनं तंदुलाः॥ सोमस्तैलमापो व्रीहयो यवास्तिलाइ
ति होम्यानि॥ तंदुल निवारश्यामाकयावनलानां॥ व्रीहिशालियवगोधूमप्रियंगवः स्वरूपेण वि
होम्याः॥ तिलाः स्वरूपेणैव॥ शतं चतुःषष्टिर्वाहुतिर्व्रीहितुल्यानां॥ तदर्द्धं तिलानां॥ तदर्द्धं सर्पिस्तै
लयोः तैलं च तिलजातिलातसीकुसुंभानां॥ येन प्रथमो देवतो जुहुयात्तेनैव द्वितीयां जुहुया
द्येन च सायं जुहुयात्तेनैव प्रातरिति॥ अत्र तेनैव प्रातरिति प्रतिनिर्वर्ण्यं॥ बृहस्पतिस्त्वाहुतिप
रिमाणमाह॥ प्रसृत्यां धान्यं चतुःषष्टिराहुतेः परिकीर्तितं॥ तिलांश्च तदर्द्धं तु तंदुलाव्रीहिभिः समाः॥
प्रसृपत्र्य॥ प्रसृतिद्वितीयमानं प्रसृत्यमानं चतुष्टयमिति॥ बौधायनस्तु॥ व्रीहीनां यवानां
वा शतमाहुतिरिष्यते॥ आपस्त[...] द्रव्यमानं स्याद्वारा गोकर्णदीर्घिका॥ सिद्धांत
सेखरे॥ अन्नं ग्राससमं प्रोक्तं लाजामुष्टिमिता मता इति॥ दधिपक्षे तंदुलपक्षे च रो

२ प्रातःकाले सूर्याय स्वाहेत्यनेन मंत्रेण सूर्यामाहुतिं हुत्वा प्रजापतये स्वाहेत्युत्तरां च जुहुयात्॥ ३

शेषप्राशनं॥ अक्षतपक्षे तु भावप्राधान्यदनीयत्वादिति भर्तृयज्ञः॥ अग्नये स्वाहा प्रजाप
तये स्वाहेति सायं २ सूर्याय प्रजापतये स्वाहेति प्रातः॥ तत्र सायं काले ग्नये स्वाहेति पू
र्वामाहुतिं हुत्वा प्रजापतये स्वाहेत्युत्तरां जुहुयात्॥ पुमांसौ मित्रावरुणौ पुमांसा
वश्विनावुभौ॥ पुमानिंद्रश्चाग्निश्च पुमां२ [illegible] वर्धतां पुमांसं सांवश्विनावुभौ॥
संवर्त्तां मयि पुनः स्वाहेति पुत्रकामा॥५॥ पत्नी पुत्रकामा सती जपति॥ तदा
सायं प्रातः पूर्वामाहुतिं पत्नी पुमांसौ मित्रावरुणावित्यनेन मंत्रेण॥ जुहोति॥
उत्तरामाहुतिं यजमान एव जुहोति॥ सर्वत्र होमे प्रतिमंत्रं नोंकारः॥ नोंकुर्याद्धि
ममंत्राणां पृथ्व्यादिषु कुत्रचित्॥ अन्येषां चाविहस्तानां काले नाचमनादिना॥ इति
वचनात्॥ विहस्तानां त्रेतानां तरितानां कालेन आचमनादि वि[illegible]हरः॥ मंत्रार्थः॥ ए

६२ वातेषां देनामेतौ पुमांसौ मम आहुः समंत्रया परितुष्टौ संतौ मयि विषये पुमांसं पुत्रं लक्षणं ६२
गर्भे चित्तां तां उत्पादयेतां॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति महायाज्ञिकवाम

नात्मजदीक्षितात्मजारचितेऽग्निहोत्रप्रयोगे प्रथमकांडे नवमकंडिका॥९॥ अथ पदार्थक्रमः॥ ना
त्रावसथ्यानि नोत्तरकाले तस्मिन्नेवाहनि भोजनात्प्राक् यजमानो होमार्थं निमित्तमा
त्रे प्रजापूर्वकं नांदीश्राद्धं कुर्यात्॥ ततः स्नातः सभ्यावसथ्ये अग्नेरुत्तरतः उपविश्य प्राणानायम्य

नि स्व देशकालौ संकीर्त्य मम [illegible] परमेश्वरप्रीत्यर्थं औपासनमहं करिष्ये इति संकल्प्य सुकल्पितं
व५ द्रव्यमेधाप्रोक्षणपयसा नानकुशानादाय सव्यहस्तात्प्रदक्षिणेन हस्तेन तिस्रः समिधो भस्मा आ
यमणिकोदकेन पर्युक्ष्य प्रदीप्ते नोद्धृत स्रं सुवर्णं [illegible] चतुःषष्ठीतमभागमितान्वातेन त्रो
ना नाद्यायां तु उत्तरपार्श्वे निसहितां [illegible] प्रदेशे अग्नये स्वाहेति जुहोति॥ इदमग्नये
न ममेति त्यागं विधाय प्रक्षिपेत्॥ स्रुक्स्रुवप्रक्षणं॥ पुनः स्रुवेण [illegible] प्रक्षिपेत्॥ संस्रवस
क्षणं॥ पत्नी पुमांसौ मित्रावरुणावित्यनेन मंत्रेण पुत्रकामा चेत्पूर्वामाहुतिं जुहोति॥ इदं मित्रावरु
णाभ्यामश्विभ्यामग्निं द्राय सुपर्णाय न ममेति त्यागो यजमानस्य संस्रवप्राशनं॥ पत्नीकर्तृ
के होमे शेषस्य पत्न्येव प्राशनं करोति॥ अग्ने [illegible] जपरामप्राशनं॥ इति सायंहो
इति प्रातर्होमविशेषः॥ उदयास्तवं सायं [illegible] सूर्याय स्वाहेति पूर्वाहुतिः॥ प्रजापत

होम४ का मः

हुत्वा तथैव सूर्याय स्वाहेति हुत्वा आहुतिद्वयपर्याप्तहोमद्रव्यमादाय प्रजापतये स्वाहेति

पिस्वाहेत्युत्तराहुतिः॥ यथादैवतं सायं॥ ॥ नैकामा चेदत्रापि पुमान् स्वाहेति होमः॥ अत्राग्नि
डिस्यनुकेनोपस्थानमिति जयरामेनोक्तं॥ इति तत्र होमविशेषः॥ अन्यत्सर्वं सायंहोमवत्॥ प
र्युक्षणमन्त्रकुशादानादि॥ अस्य होमोपासनस्य परिचरणं॥ अथापत्कालिकं तत्र्याहोमद्वयस
मासप्रयोगः॥ तत्र पूर्वेद्युः सायंकाले नोद्धृताग्नौ यद्युत्तरे कश्चित्कालं निर्माल्य पुनः कुशादानादि प
र्युक्षणांते कृत्वाग्नेः कर्त्रे पश्चात्तनाहुतिद्वयमात्रद्रव्यं जुहुयादिति प्रयोगरत्ने॥ हरिहरमिश्रैस्तु॥
तत्रोक्तो होमो लिखितः॥ सचैवं॥ पर्युक्षणांतं कृत्वाग्नये स्वाहेति सिद्धं जुहुयात्॥ ॥ अथ पञ्चवी
वादिपक्षहोमः॥ तत्र प्रतिपदि सायंकाले उपयमानादानादिपर्युक्षणांतं कृत्वा आहुतिप्रमाणे
न तंडुलान् पात्रद्वये प्रतिपात्रं चतुर्दशवारं गृहीत्वा होमकाले प्रथमपात्रस्थानग्नये स्वाहेति जुहु
यात्॥ ततो द्वितीयपात्रस्थान् प्रजापतये स्वाहेति॥ जुहुयात्॥ एवं द्वितीयादिषु ततः प्रातः पर्युक्षणांतं कृ
त्वा पूर्ववत्पात्रद्वये तंडुलान् गृहीत्वा सूर्याय स्वाहेति प्रथमपात्रस्थान् प्रजापतये स्वाहेति द्वितीयपात्र
स्थान् तंडुलान् जुहुयात्॥ पक्षेप्येवं आपत्काले चतुर्दशी सायंकालीयहोमांतान् शेषहो
मान्सायं समापयेत्॥ प्रतिपदादिहोमांस्तु प्रातः शेषहोमान् समापयेत्॥ सर्वथापर्वसायंहोमः॥

द्युतिपत्नी प्रवासे होमस्य पत्नीवत् होतव्यो॥ तत्र पूर्वं यदग्निमभिन्नक्षेत्॥ अत्र रात्रिंश्चेत्तोमुत्तरदारस्य
पूर्वविस्मायं प्रातर्होमानुष्ठानकालं कुर्यात्॥ इति प्रयोगरत्ने॥ अनाहिताग्निपक्षहोमा यस्मिन्नत्र पुत्रेन्द्रदेवपा
प्रकपद्धतौ॥ अनातुरो गृहस्थो सीचानिस्त्रिमेरानिरूपद्रवः॥ न पश्चेन्निमंतुयः कुर्यात्सि चोरेसौ निन्न इति हुतं॥
इति सम्राट्-वामनात्मजदीक्षितगदाधरविरचिते होमविधिः॥ राज्ञा सभेदेन द्विविमोक्षे यानवि
पर्यासे त्वस्यां वा व्यापन्नौ॥ स्त्रियाश्चो द्वहनेनतमेवाग्निमुपसमाधायाज्यं संस्कृत्येह रतिरिति द्वे
होतिनाना [illegible] मंत्राभ्यां॥ राज्ञः प्रतापात्तु नकस्तु देशांतरे प्रस्थितस्य मुद्दे वा अक्षस्य रथावयव
स्य भेदे भंगे नद्धस्य रथस्य विमोक्षे आकस्मिकबंधविच्छेदे वा यानविपर्यासे हयरथा [illegible] के द्वि
वाजधोभावापत्तौ॥ अन्यस्यां वा कस्यां विद्यापत्तौ अमुमभश्च को सात स्त्रियाश्चो द्वहने स्त्रि
याः [illegible] पितृगृहोपसमाधयेतिरा राज्ञश्चेन्निमित्तंतद्दे सेनाग्निं स्त्रियाश्चेत्तदा वैवाहिक
मग्निमुप समाधायस्यापपिहा आज्यं संस्कृत्य आज्यसंस्कारं॥ निरुप्याज्यमित्या
दिना कृत्वा इह रतिरिति नाना मंत्राभ्यां जुहोति॥ एष एव विधिरिस ने वाज्यसंस्कार
रूमेर्दे ग्रहे प्रतिप्रथमागमनो चकाराद्यथाक्रमे दारादिनिमित्तमिति कन्ये दस्युच्यते॥
तमेवाग्निमु॥ ३॥

९८

स्य प्रावृतत्वादन्तस्य संस्कृतस्येति ग्रहणं इहरतिरित्याद्युत्तरा घारादिभ्योपि पर्ववकालज्ञा
पनार्थं ॥ नानाग्रहणाच्चद्वे आहुती ॥ इहरतिरेकामुपस्तृतमिति द्वितीया ॥ ततआघारादि ॥
अन्ययानमुपकल्पतत्रोपवेशयेद्राजानं शस्त्रियेवा प्रतिक्षत्र इति यच्छंतेना आहाहाऽर्थमि
तिचैतया ॥ ततस्त्यानंसत्का न्ययाने वाहनं रथादिकमुपकल्पतत्रतस्मिन्यानेवाहनेराज्ञा
ने स्त्रियं वा वधूं उपवेशयेत् ॥ प्रतिक्षत्रई मंत्रेण पक्षिपसेतेन ॥ आहाहाऽर्थमिति चैतया ऋ
चाउपवेशयेत् ॥ एवंच मंत्राभ्यामुपवेशनं ॥ उपत्रोपवेशये दिति ॥ ण्यंतत्वाद्ध्येषणाया
नेउपविशस्वेति ॥ तच्च राज्ञो ब्रह्मकर्तृकं ॥ वध्वा रकर्तृकं ॥ अत्र परादीना पर्वांतइतिन्या
याभावात्तेषां वाक्यमित्यनेन च प्रतिष्ठामित्येतदंतमंत्र प्राप्तौ यज्ञांतग्रहणं वाक्यसमुच्च
यविधानार्थं आहार्ष्वमितित्रु कृत्वा संपूर्णयाः पाठः ॥ तेषां वाक्यमित्यत्र तच्छब्देनय
जुषां परामर्शात् ॥ ततश्च यत्र ऋकप्रतिग्रहणं तत्र पर्संपूर्णयाः पाठस्त्व न्तोअनइत्यादे ॥

ति

व

९८

पुयैदक्षिणा प्रायश्चित्तिः ॥ अत्र धुर्यावनड्वाहोदक्षिणा भवतीति शेषः ॥ दक्षिणांतरस्य नि
वृत्तिः दृष्टार्थत्वात् ॥ प्रायश्चित्तिरिति चास्य कर्मणः संज्ञा ॥ ततो ब्राह्मणभोजनं ॥ ततः कर्मांते ब्राह्म
णस्य एकस्य भोजनं ॥ इति श्रीसेचाज्ञमनात्मजदीक्षित गदाधरकृते गृह्य भाष्ये प्रथम कांडे
दशमि कंडिका ॥ १० ॥ अथात्र पदार्थक्रमः ॥ तत्र निमित्ते जाते पंचसंस्कार पूर्वकमग्नेस्थापनं ॥
राजासेनाग्नेः स्थापनं कुर्यात् ॥ वरश्चवैवाहिकाग्नेः स्थापनं कुर्यात् ॥ ततो ब्रह्मोपवेशना
दिपर्युक्षणांतं कृत्वा इहरतिरिति प्रथमामाहुतिं जुहोति ॥ उपसृजंधरुणमित्सोदीधरत्स्वा
हेत्येतेन मंत्रेण द्वितीयामाहुतिं जुहोति इदमग्नये न ममेति द्वितीयोत्सर्गो ॥ ततः आघा
रादि प्रणीताविमोकांतं कृत्वा धुर्यावनड्वाहोदत्वा अन्यं नमानायतत्र राजानं प्रतिक्षत्रे
प्रतितिष्ठामि ॥ आहाहार्ष्वमिति मंत्राभ्यामुपविशस्वेत्यध्येषण पूर्वकमुपवेशयेत् ॥ ततो
नो ब्राह्मणभोजनं ॥ इति पदार्थक्रमः ॥ चतुर्थ्यामपररात्रेऽभ्यंतरतोग्निमुपसमाधाय दक्षिण
वधूमेताभ्यां मंत्राभ्यामुपवेशयेत् ॥

दि

धा

तो ब्राह्मणमु[...]पवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपइत्वाज्यभागौ इष्ट्वाज्याहुतीर्जु वि १
हो[...]ग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी पा २
तनूस्तामस्यै नाशय स्वाहा॥ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उ
पधावामि यास्यै प्रजा[...]घ्नी तनूस्तामस्यै नाशय स्वाहा॥ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चि
त्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा॥ चंद्रप्रा
त्रि यश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्ता
मस्यै नाशय स्वाहा॥ गंधर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उ
पधावामि यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहेति। विवाहाच्चतुर्थी तिथिस्तस्या
९५ मपररात्रेऽन्तिमे प्रहरे॥ अभ्यंतरतः गृहस्य मध्येऽग्निमुपसमाधाय वैवाहिकमुपस ९५
माधाय वैवाहिकमग्निं स्थापयित्वा दक्षिणतो ब्राह्मणमुपवेश्य अग्नेर्दक्षिणतो ब्राह्मणमु

पवेशनार्थं कुशानास्तीर्य तत्र ब्राह्मणमुपवेश्य उत्तरत उदपात्रं प्रतिष्ठाप्य अग्नेरुत्तरतः
प्रणीतास्थाने सप्रकाउदकयुक्तं पात्रं स्थापयित्वा॥ स्थालीपाकं श्रपइत्वा स्थालीपाकचरुं
श्रपयित्वा॥ आज्यभागौ विष्ट्वाज्याहुतीर्जुहोति आज्येन अग्ने प्रायश्चित्त इत्येतैः पंचभिर्मं
त्रैः पंचाहुतीर्जुहोति॥ अत्रापररात्रग्रहण पूर्वाह्णमुदासार्थं॥ चतुर्थीकर्मणो विवाहांग
त्वाद्दहिः॥ शालायां माभूदित्यभ्यंत[...]रग्रहणं॥ अग्निमुपसमाधायेति ग्रहणमभ्यंतरगुणविधा मा ये
वे५ नार्थं। ब्राह्मणमुपवेश्येति उदपात्रस्थापनावसरविधानायोक्तं॥ चरोर्भक्तोपादानं माभूदि
धूभागा ति श्रपइहेतुरुच्यते। आज्यभागौ विष्ट्वेति ग्रहणं॥ आहुतिकालविधानार्थं॥ मंत्रार्थः॥ हे अग्ने प्रा हे ३
यश्चित्ते सर्वदोषापाकर॥ य[...]त्त्वं देवानामिंद्रादीनां मध्ये प्रायश्चित्तिः दोषापाकर्तासि।
बी अहं च ब्राह्मब्राह्मण्यः। वैदिकोऽहं त्वा उपधावामि। आधारयामि॥ किंभूतोहं। नाथउप
चायं। आशाकामः॥ ऐश्वर्यकामो वा॥ उपधावनप्रयोजनमाह। जस्यैष ष्यघ्ने चतुर्थी॥ या

२॥ स्थालीपाकस्य जुहोति॥ प्रजापतये स्वाहेति॥ आज्याहुत्यनंतरं ५

प स्यात्व ध्वाः पतिघ्नी तन्कृत्वा अवयत्तां॥ अस्यैइमामुपकर्त्तुंनाशय॥ अपनयंतु भयं स्वा
हा॥ स्नुहु नमस्कः॥ समुदायवाचकोपि तन्त्राद्दो वावयववाचकोऽत्र यः॥ तेन यदस्याः पतिनाशं
के अंगालक्षणं हस्तरेखादिसामुद्रिकोक्तं तदपाकात्स्व ज्ञेभनमं गाविधेहीति वाक्यार्थः॥ एवमुपय
पिव्याख्येयं। तनु विशेषणं देवताचाभिधते। तद्यथा॥ हे वायो। पवन। प्रजाघ्नीमपत्यनाशनीमेव
मुत्तरत्रापि योज्यों स्थालीपाकस्य चरोः प्रजापतये स्वाहेति मंत्रेणोपांमुपठितेन काम्माहुतिं
जुहोति॥ स्थालीपाकस्येत्यवयवलक्षणा षष्ठी॥ हुत्वा हुत्वेतासामाहुतीनामुदपात्रे संस्र
स्रवान्समवनीयतत एनां मूर्द्धन्यभिषिंच्य तिया ते पतिघ्नी प्रजाघ्नीपशुघ्नी गृहघ्नी यशोघ्नी
घ्नी निंदिता तन्वं जारघ्नी तत एनां करोमि सा जीर्यत्वं मया सह सावि निति॥ एतासां प माहुतीनां
नां एकैकामाहुतिं हुत्वा उत्तरतः प्रतिष्ठापितेत स्मात्संस्रवमित्युदकं गृहीत्वा एनां वधू
मूर्द्धनी मस्तके अभिषिंचेति यातेपतिघ्नीति मंत्रेण पञ्चाहुतीनां मंत्रसंस्रव भक्षणे ले
पः॥ इतरासां तु भवस्रेवा॥ हुत्वा हुत्वेति॥ ग्रहणात्सर्वाहुसंतेसंस्रवनिनयनं माभूदित्येतदर्थः॥
तेत उदपात्रे संस्रवान् समवनीय स्रुवलग्नाज्यं च वैयवान्नं प्रक्षिप्य ३

णा

णामृ २

२६ २६ -यर ३

अनोद्‌घ्यनाशनं कार्यं। तदुक्तं कारिकायां॥ वधूसंस्कार एवायं प्रतिपाद्यनयं स्तु
मंत्रैः ज्ञो॥ हे अग्ने सो कस्ये॥ याते। तव। पसादिघ्ना तिनीयं च धातु अस्तनः॥ अत एव निंदिता॥ त
तो नेनाभिषेचनेन एतां तनुं जारघ्नीं उपपत्यादिदोषाघातनीं करोति। सा त्वं मया पत्या भर्त्रा
सह जीर्य। निर्दुष्टत्व वृद्धत्वं गच्छ॥ तथोक्तं येनापुं स्थालीपाके प्राशयति। यो अभिषेकानंतरं एनां
वधूं स्थालीपाके चरुं वरः प्राशयेत् प्राणैस्ते प्राणान्संदधाम्यस्थिभिरस्थीनीति मंत्रेणाव
ध्वसंस्कारोयं॥ न तु द्रव्यप्रतिपत्तिः॥ अतो द्रव्यविनाशादौ द्रव्येणान्येन तद्भवेत्॥ शेष
द्रव्यविनाशादौ लुप्यंते प्रतिपत्तयः॥ अत्र स्त्रियासह वरोपि समाचाराद्भोजनं करोति।
स्त्रिया सह भोजनेनापि न दोषइत्याह॥ हेमाद्रौ प्रायश्चित्तकांडे गालवः॥ एकयानसमा
रोह एकपात्रे च भोजनं॥ विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभाक्॥ अन्यथा दोषमा
प्नोति पश्चाच्चांद्रायणं चरेत्॥ मिताक्षरायामप्येवं॥ मंत्रार्थः॥ हे कन्ये मम प्राणादि
भिस्तेतव प्राणादींत्संदधामि संयोजयामि॥ तस्मादेवं विछेत्रियस्य द्वारेणोपहास मि

५त

९६

छदुतह्येवं विसरो भवति॥ हियस्मादस्या एतेन प्राशनाख्यसंस्कारेण भर्त्ता सहैक्यं वृत्तं तस्मा
च्छ्रोत्रियस्य दारेणोपहासं अभिगमनं नेच्छेत्॥ स चैवं वित् एवं कुर्वन् परो भवति॥ पराभवं
गच्छति॥ यद्वा एवं वित् श्रोत्रियः परः शत्रुर्भवति। उत अप्यर्थे॥ निंदार्थवादोयं॥ परदाराभिग
मनं अतो न कार्यं। समाप्तं चतुर्थीकर्म॥ ॥ ॥ स्वभार्याभिगमनमाह। तामुद्वह्य यथर्तु
प्रवेशनं॥ तांवध्वं पूर्वोक्तविधिनोद्वह्य विवाह पित्रा यथर्त्तु ऋतौ ऋतौ प्रवेशनं अभिगमनं
कुर्यादिसूत्रार्थः॥ याज्ञवल्क्यः षोडशर्त्तुर्निशाः स्त्रीणां तस्मिन्युग्मासु संविशेत्॥ ब्रह्मचर्ये
व पर्वाण्याद्याश्चतस्रश्च वर्जयेत्॥ स्त्रीणां षोडशनिशा ऋतुः॥ गर्भाधानयोग्यः काल
तत्रोक्तविधिना गच्छन्॥ ब्रह्मचर्यैव॥ चतुर्दश्यष्टमी चैव अमावास्या च पौर्णिमा॥ चत्वा
र्येतानि पर्वाणि रविसंक्रांतिरेव च॥ मनुः॥ अमावास्याष्टमी चैव पौर्णिमासी चतुर्दशी
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः॥ यथा॥ तासामाद्याश्चतस्रस्तु निंदितैका

दशी तथा॥ त्रयोदशी च शेषासु प्रशस्ता दशरात्रयः॥ ऋतोरेकादशी त्रयोदश्यौ न पक्ष
स्य॥ हारितस्तु॥ शुद्धा भर्त्तुश्चतुर्थेह्नि स्नानेन स्त्री रजस्वला॥ दैवे कर्मणि पित्र्ये च पंचमेह
नि शुध्यति॥ ततश्चतुर्थ्यां स्त्रीगमनस्य विहितप्रतिषिद्धत्वाद्विकल्पः॥ स च व्यवस्थितः।
रजोनिवृत्तौ चतुर्थ्यां विधिः॥ तदनिवृत्तौ प्रतिषेधः॥ मनुः॥ रजस्युपरते साध्वी स्नानेन
स्त्री रजस्वला॥ साध्वी गर्भाधानादिविहितकर्मयोग्येत्यर्थः॥ ज्योतिःशास्त्रे॥ पित्र्ये पौष्णं नै
ऋतं चापि धिष्ण्यं स्पृष्ट्वेति। पित्र्यं मघा। पौष्णं रेवति। नैरृतं मूलं। अत्र समासु पुत्रो विष
मासु कन्येति ज्ञेयं। हेमाद्रौ शंखः॥ युग्मासु पुत्रा जायंते स्त्रियोऽयुग्मासु रात्रिषु॥ तत्रा
प्युत्तरः प्रशस्ताः। तदाहापस्तंबः॥ तत्राप्युत्तरोत्तरा प्रशस्तेति। व्यासः॥ रात्रौ चतुर्थ्यां
पुत्रः स्यादल्पायुर्धनवर्जितः॥ पंचम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः॥ सप्तम्यामप्रजा यो
षिदष्टम्यामीश्वरः पुमान्॥ नवम्यां शुभगा नारी दशम्यां प्रवरः सुतः॥ एकादश्यामधर्मा स्त्री

२ दत्था

द्वादश्यां मध्यमा स्त्री द्वादश्यां पुरुषोत्तमः॥ त्रयोदश्यां सुता पापा वर्णसंकरकारिणी॥ धर्मज्ञ
श्च कृतज्ञश्च आत्मवेदी दृढव्रतः॥ प्रजायते चतुर्दश्यां पंचदश्यां पतिव्रता॥ आश्रयः सर्वभूता
नां षोडश्यां जायते पुमान्॥ तच्चैकस्यां रात्रौ सकलदेवकार्यं सुस्थं इंदौ सकृत्पुत्रं लक्षण्यं
जनयेत्पुमान् इति याज्ञवल्क्योक्तेः॥ इदं चान्तेगामनमन्यकाले प्रतिबंधादिसंभवे अष्टम्येकाद
श्यादावपि कार्यः ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेदिति याज्ञवल्क्योक्तेः॥ व्याख्या
तं चैमिताक्षरायां॥ यच्च श्राद्धादौ ब्रह्मचर्यं विहितं तत्राप्यृतौ गच्छतो न ब्रह्मचर्यस्खलनदो
ष इति॥ स्त्रीणां बहुत्वे ऋतौ योगपद्ये त्रगमनक्रममाह॥ देवलः॥ योगपद्ये तु तीर्थानां वि
प्रादिक्रमतो व्रजेत्॥ रक्षणार्थमपुत्राणां ग्रहणक्रमशोपि वेति। तीर्थं ऋतुः॥ विप्रादिक्र
मे वर्णक्रमः॥ ग्रहणक्रमो विवाहक्रमः॥ अगमने दोषमाह पराशरः॥ ऋतुस्ना
तां तु यो भार्यां सन्निधौ नोपगच्छति॥ घोरायां ब्रह्महत्यायां युज्यते नात्र संशय इति॥ अस्या

प वादमाह मदनरत्ने॥ व्याधितो बंधनस्थो वा प्रवासेष्वथ पर्वसु॥ ऋतुकालेपि नारीणां
भ्रूणहत्या प्रमुच्यते॥ वृद्धां वंध्यामसद्वृत्तां मृतापत्यामपुष्पिणीं॥ कन्यां च बहुपुत्रां च वर्ज
यन्मुच्यते भयात्॥ ऋतौ स्नानमाह आपस्तंबः॥ ऋतौ तु गर्भशंकी त्वात्स्नानं मैथुनि
नः स्मृतं॥ अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत्॥ स्त्रीणां तु न स्नानं॥ उभावप्यशुची स्या
तां दंपती शयनं गतौ॥ शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमानिति शातातपवचनात्॥
अत्र प्रसंगाद्रजस्वलोपयोगि किंचिन्निरूप्यते॥ तत्र स्मृत्यर्थसारे॥ दिवा रजःस्रावे तद्दि[illegible]न
मशुचित्वं स्यात्। रात्रौ रजःस्रावे सति अर्द्ध[illegible] रात्रादर्वाक् चेत्पूर्वदिनमित्येकपक्षः। उद
यात्पूर्वं चेत्पूर्वदिनमित्यपरः पक्षः। एषां पक्षाणां देशाचारतो व्यवस्था॥ अ[illegible] तेरज
स्रावे तु दिवाशुद्ध्यर्थं रजःस्रावादिकमशुचित्वं स्यात्॥ स्नाना त्पूर्वं तु रजस्वलास्पर्शं तु ष्टेमेवा। च
[margin:] ।स्पृष्टे आते॥
रजस्वला त्रिरात्रमशुचिः स्यात्॥ चतुर्थेहनि स्नाता शुद्धा भवति। भर्तुः स्पर्शे दैवे पित्र्ये

॥ रात्रिं त्रिधा विभज्य पूर्वभागद्वयं चेत्पूर्वदिनमित्यन्यः पक्षः॥

चकोर्ये रजो निवृत्तोऽशुचिः॥ रजस्वला चतुर्थेऽहनि मृत्तिकाभिः शौचं कृत्वा दन्तादि स्त्रीचया
दपादन्य नमृत्तिकाभिर्विधिवाद्द्विगुणमृत्तिकाभिः शौचं कृत्वा दंतधावनपूर्वकं सगोवस
स्नातायाः चैवं स्नायात्॥ रजस्वलायां पुनरपि रजो दृष्टे अष्टादशाहानि दिनादर्वागशुचित्वं नास्ति॥
अष्टदशादिने रजो दृष्टे चेदेकरात्रमशुचित्वं। नवदशादिने द्विरात्रं। विंशतिदिने त्रिरा
त्रमेव। त्रयोविंशतिदिनादूर्ध्वं रजस्राविणीनो एवं भवति। विंशतिदिनादर्वाक् द्विरात्रमेव। प्र
योपायत्रेण रजोदर्शनवतीनामष्टादशादिनेपि त्रिरात्रमशुचित्वं। किंच। त्रयोदशादिना र्ध्वं दू
प्रायो रजस्राविणीनामेकादशादिनादर्वागशुचित्वं नास्ति। एकादशदिने रजोदृष्टे एक
दि नमशुचित्वं। द्वादशादिने द्विरात्रं। त्रयोदशादिने त्रिरात्रमेव। प्रयोगपारिजातेप्येवं। रो
गजे तु तत्रैवोक्तं। रोगेण यद्रजः स्त्रीणामन्वहं हि प्रवर्तते॥ नाशुचिस्तेन भवेत्तेन यस्माद्वैहं ई ई
९९ कं मतमिति। तत्रापि स्वकाले शुचिरेव। तदुक्तं। रोगजे वर्तमानेपि काले निर्यातिकोऽस्ति। का १

प्र२ ॥ तस्मादेवं प्रमत्ता स्यादन्यथा संकरो भवेत्॥ ॥ रजस्वलायां रजस्पर्शे अ
कामतः स्नानं कामत उपवासः पंचगव्याशनं च। असवर्णासु तु ब्राह्मण्याः क्षत्रियादिस्पर्शे
क्रमेणार्द्धकृच्छ्रार्धपादोनकृच्छ्रकृच्छ्राः॥ क्षत्रियादीनां तु कृच्छ्रपाद एव। क्षत्रियादीनां हीनवर्ण
स्पर्शे त्रिरात्रमुपवासः॥ एतच्च कामतः॥ अकामतस्तु प्राक् शुद्धेरनशनं। अकामतश्चांडाला
न५ दिस्पर्शेप्यनशनमेव प्राक् शुद्धेः॥ कामतस्तु प्रथमेऽह्नि त्र्यहः द्वितीये द्व्यहः तृतीये एकाहः श्वःस
र्शे तु द्व्यहएकाहो वा। भुंजानायाश्चांडालादिस्पर्शे षड्रात्रं। उच्छिष्टयोः स्पर्शे तु कृच्छ्रः इत्यादि मि
ताक्षरायां ज्ञेयं॥ स्मृत्यर्थसारे तु सर्वत्र बालापत्यास्पर्शे स्नाने कृते भुक्तिः पश्चादनशन
प्रसाम्नायइति। स्नानविधिं चाह पराशरः॥ स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला॥
पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेत्॥ सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन॥
नवस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत्॥ व्रतान्याह मदनपारिजाते वसिष्ठः॥ सामा

५२

स्यान्नाभ्यं न्नानसुः स्यायादधः शयीत । न दिवा सुप्याद्रजं सज्जेत् ॥ न मांसमश्नीयान्न
गृहाभिरीक्षतेन हस्तेन किंचिदुच्चरेद खर्वेण पात्रेण पिबेदंजलिना वा पात्रेण लोहितायस
सेन वेति । खर्वो वामहस्तः ॥ यथा कामी वा काममा विजनितोः संभवामेति वचनात् । तौ द्वि
यः कामममनति क्रमय यथाकामं तदस्यास्तीति यथाकामी वा भवेत् ॥ न नियमश्चर्तव्य इति कृत
एतत् ॥ कामं वै विजनितोः संभवामेति वचनात् ॥ कामं स्वेच्छया आविजनितोः आप्रसवा
त् संभवाम भर्त्रा सह संगं भवामेत्यर्थः ॥ तथा च तैत्तिरीयश्रुतौ ॥ स इंद्रः स्त्रीषु संसादमुपासीद
त् । अस्यै ब्रह्महत्यायै तृतीयं प्रतिगृहीतेति ता अब्रुवन्वरं वृणीमहे । ऋत्वियात्प्रजां विंदामहै का
ममा विजनितोः संभवामेति तस्मादार्त्वियात् ॥ स्त्रियः प्रजां विंदंत इति ॥ अस्यार्थः ॥ स इंद्रः स्त्रीणां
षंसंसादं सम्यक्‌हं उपासीदत् उपससादं सर्वं छांदसं ॥ अस्यै अस्याः ब्रह्महत्यायाः तृती
यांशं प्रतिगृह्णीतेति ता अब्रुवन् ॥ वरं वृणीमहे ऋतु संबंधि … गमनं ॥ ऋत्वियं । तस्मा

त् आविजननमाविजनितु तस्मात् ॥ आविजनितोः आगर्भकालात् ॥ संभवाम पुरुषेण संसे
युक्ता भवाम ॥ एवं सति विकल्पोऽयं । तथा च स्मृतिः ॥ ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जमि
ति ॥ अथास्यै दक्षिणांसं समधि हृदयमालभते ॥ यत्ते सुशीमे हृदयं दिवि चंद्रमसि श्रितं ॥ वे
दाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमिति । अथ प्रे
पुनोत्तरं अस्या भार्यायाः दक्षिणांसं दक्षिणस्कंधं अधि उपरि स्वहस्तं नीत्वा तेनैव हस्तेन
हृदयमालभते स्पृशति यत्ते सुशीमे इति मंत्रेण । अत्र कर्कभाष्यं । हृदयालंभनस्याभिगमनो
त्तरकालिनः ॥ प्राक्कालीन इत्यपरे ॥ अप्रयतत्वादिनेत दिति जयरामः ॥ यतो गर्भ … सं
भव नायं तदुपपद्यते ॥ प्रयतत्वं च सोच्यादिनापि स्यादेव ॥ यथाह याज्ञवल्क्यः ॥ ऋतौ
तु गर्भशंकि … लात्स्नानं मैथुनिनः स्मृतं ॥ अनृतौ तु सदा गच्छेच्छौचं मूत्रपुरीषवत् ॥
इति । अभिगमनो … त्तरमनालंभांतरेव दक्षिणांसं समधि हृदयमालभत इति भर्तृयज्ञः ॥

४ कृत एव मनेन प्रकारेण मन्त्रानंतरं तुर्ध्वं कृत्वा रंतो हृदयालंभः कार्यः॥ ४

मेत्रार्थः॥ शोभनासी मामकर्क्लिकेशमध्ये पद्म तिर्यस्या सातस्याः संबोधनं हे सुश्री मे शोभनसि मेतिनी॥ यत्तेतव हृदयं मनः दिवि स्वर्गे वर्त्तमाने चंद्रमसि श्रितं। तदधीतया श्रितं॥ तदहं वेद जानीयां। तच्चमां विद्याज्जानातु॥ एवं परस्पराननुगुणित हृदयाबपत्यादिसहितावपंशरदमित्याद्य कार्यं। एवमत तुर्ध्वं॥ प्रथम त्रीयिष्या हृदयमालंभः॥ हरिहरव्याख्याचेवं॥ एवमनेन प्रकारेण ... र्ध्वं त्रो प्रवेशनं यथाकामं वेति। इति श्री त्रिराति चितूस त्याद्वाम ना ... दाक्षित गदाधरकृते गृह्यसूत्रे भाष्ये प्रथमकांडे एकादशी कंडिका॥ ११॥ अथ पदार्थक्रमः॥ तत्र चतुर्थ्यापररात्रे स्नानपूर्वकं गृहाभ्यंतरतः कर्म कार्यं। देशकालौ स्मृत्वा विवाहांगचतुर्थीकर्म करिष्य इति संकल्पः॥ ततो वैवाहिकमग्निं स्थापयेत्। ब्रह्मोपवेशनं। आनेकत्तरतः उदपात्रनिधानं। ततः प्रणीता प्रणयनादि आज्यभागांतं माधानवत्। आज्यभागांते नस्थाल्याज्येन पंचाहुतयो होतव्या॥ अग्ने प्रायश्चित्ते इति प्रथमा॥ इदमग्न

१०२

९

द्वितीया १

ये न मम॥ वायो प्रायश्चित्त इति इदं वायवे न मम॥ सूर्य प्रायश्चित्ते इति तृतीया॥ इदं सूर्याय न मम॥ चंद्र इति चतुर्थी॥ इदं चंद्राय० गांधर्व इति पंचमी॥ इदं गांधर्वाय० तत्राज्यं स्रुवेणादाय प्रजापतये स्वाहेति होमः॥ इदं प्रजापतये न मम॥ अग्नये इत्यादि पंचाहुतीनां संस्रवाणमुदपात्रे प्रक्षेपो हुत्वा हुत्वैव। अन्यासामन्यत्र। ततः स्विष्टकृदादि दक्षिणादानांतं॥ ततः उदपात्रेण वधूमूर्ध्नि या ते पतिघ्नी इत्यभिषेकः॥ असौ स्थाने नामग्रहणं॥ हे प्रिये इति॥ ततो वरः प्राणैस्ते इति चरुशेषं प्राशयति सकृत्॥ अत्र समाचाराद्दरोपिकन्याहस्तेन भोजनं करोति॥ इति पदार्थक्रमः॥ अथ गार्ग्यमते विशेषः॥ ब्रह्मोपवेशनाद्याज्यभागांतं पूर्ववत्॥ प्रस्तरब्रह्मउपवेशनं॥ ग्रहणे॥ प्रजापतये चरुं गृह्णामि॥ आज्यभागांते पंचाहुतयः॥ ततः स्थालीपाकेन प्रजापतये स्वाहेति। मूर्ध्न्यभिषेकः॥ ततः स्थालीपाकं प्राशयति॥ प्राणैस्ते इति चतुर्भिः प्रतिमंत्रं॥ महाव्याहृत्यादि स्विष्टकृदंतं॥ आज्येन स्विष्टकृदिति गार्ग्यमतमिति पदार्थो प्राश

९८

प्रथमप्रयोगे मातृपूजा पूर्वं नांदीश्राद्धं संकल्पः॥ १

नांदि पूर्णपात्र दानांतं ॥ इति गर्गमते क्रमः ॥ गर्भाधाने पदार्थक्रमः ॥ देशकालौ स्मृत्वा अस्या
मम भार्यायाः प्रतिगर्भसंस्कारातिशयद्वारा अस्यां जनिष्यमाणानां सर्वगर्भाणां बीजगर्भसमु
द्भवैनोनिबर्हणद्वारा च श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्माहं करिष्ये इति ॥ ततो रात्रा
वभिगमनं ॥ ब्रह्मसूत्रे मूत्रपुरीषवत्त्वार्थं ॥ स्नानं ॥ ततो दक्षिणं समधि हृदयमालभते य
त्ते सुशीमे इति न कश्चिदत्र विशेषो गर्गमते ॥ इति गर्भाधाने क्रमः ॥ अथ प्रथमे रजोदर्शने
विशेषः ॥ तत्र प्रथमे रजोदर्शने मासादौ दुष्टे सति गर्भाधानस्य शांतिपूर्वकं ॥ कर्तव्यत्वाच्छां
तिकं वक्तुं दुष्टमासाद्युच्यते ॥ प्रथमे रजसि चैत्र ज्येष्ठ आषाढ भाद्रपद कार्तिक पौषाः अशुभाः ॥
आश्विन मध्यमः ॥ शेषाः शुभाः ॥ क्वचिद्वैशाख फाल्गुण पूर्वार्द्धयोर्धैर्यं मन्वयुक्तं ॥ तिथि
षु प्रतिपच्चतुर्थी षष्ठ्यष्टमी द्वादशी चतुर्दशी पौर्णमास्यामावास्या अशुभाः ॥ क्वचित्सप
म्येकादश्यावशुभे अष्टमी द्वादश्यौ शुभे ॥ इत्युक्तं ॥ वारेषु रवि भौम मंद वारा अशुभाः ॥
केश्चित्सोमोप्यशुभः उक्तः ॥ नक्षत्रेषु भरण्यार्द्रा पुष्याश्लेषा पूर्वा ज्येष्ठा मूल पूर्वाषाढा पू

शेषाः शुभाः अन्ये तु शुभाः

०२

र्वाभाद्रपदा रेवती अशुभाः ॥ चित्रा विशाखा श्रवणाश्विनी मघा स्वातयो मध्यमाः ॥ अन्यानि
शुभानि ॥ केश्चिदुत्तरा कृत्तिका पुनर्वस्वनुराधा रेवत्योप्यशुभा उक्ताः ॥ एवं तासां मध्यमत्वं ॥ एवम
न्यत्रापि ॥ योगेषु व्याघातस्याद्या नव नाड्यो गंडातिगंडयोः षट् षट् शूलस्य पंचदश परिघे पूर्वा
र्द्धं धृति व्यतिपात वैधृतेस्समस्ता अशुभाः ॥ वज्रं मध्यमं ॥ अन्ये शुभाः ॥ करणानि विष्टिं विना सर्वाणि
शुभानि ॥ अन्ति त्रेधा विभक्ते प्रथमो भागः शुभः ॥ द्वितीयो मध्यमः ॥ तृतीयो दुष्टः ॥ एवं रा
त्रौ सूर्योदयास्तमयावप्यशुभौ रविसंक्रमादधो नाडीचतुष्टयमूर्ध्वं चाप्यशुभं ॥ संक्रांत्यादि
दग्धदिनेष्वशुभं ॥ रविचंद्रपरागयोरप्यशुभं ॥ संध्योपप्लवशावाशौच शु भर्तृगालन
श्चतुर्थ्याष्टमद्वादशस्थे चंद्रे जीर्णरक्तनीलम लिनरक्तवस्त्रेषु परिहितेषु चाशुभं ॥ संमा
र्जनी काष्ठ मृत्तृण तिलमर्तुष शुष्क क्लिष्ट लोहपाषाण शस्त्रादि धारिण्या रजस्वले दृष्टे देशाच्चाशु
भं ॥ देहली द्वार रथ्यादि स्थितमातृगृहेष्वशुभं ॥ तु उर्ध्वं स्थि ताया निंदिता याम्या शुभं ॥ शय्या

ता२

२

दो शुभं ॥ पित्रादि सखि स्व भर्तृभिः दृष्टमशुभं ॥ शय्यादौ शुभमिसादि ज्ञेयं ॥ दुष्टमासादौ प्र
थमरजोदर्शने तांबूल भक्षणादि मंगलाचारं न कुर्यात् ॥ द्वितीये तु शुभे तत्र कुर्यादिति प्रथ
मे ऽ मे दुष्ट रजोदर्शने द्वितीये प्रतीक्ष्य तास्मिन्नप्यशुभे वक्ष्यमाण शांतिः कार्या ॥ त्राय शुभ सन्निपा
ते तु तत्सूचित बहुशुभनिरासार्थं वक्ष्यमाण कृती संख्यादि विवर्ध्या कार्य पाशा क्ति मादि ज्ञेयं ॥
इति शुभाशुभ विचारः ॥ अथ शांतिरुच्यते ॥ प्रयोग पारिजाते शौनकः ॥ पंचमे ऽह्नि च तुर्ये
वा गृह्यात्रिष्या पुरः सरं ॥ द्रोण प्रमाण धान्येन विहिराशि त्रयं भवेत् ॥ कुंभत्रयं न्यसेत्प्राज्ञो
तं तु वस्त्रादि वेष्टितं ॥ स्कंदेनाप्यनवचैन प्रसुव आपइ सर्थ ॥ आचार्यं प्रवरस्ता रूपमाचततः क्र
मात् ॥ मध्यमे कुंभे क्षिपेद्धान्यमोषधानि च हे मन्त्र ॥ उदुंबर कुशादुर्वी राजीव चंपा बिल्व कौ ॥ विष्णुक्रां
ताथ तुलसी बहिषः श्वेत पुष्पिका ॥ रातावर्या ग्याचनिर्गुंडी सर्षप द्वयं ॥ अपामार्गपलाशाश्च प
चमो जीवकस्तथा ॥ प्रियंगव श्योशुमाश्रीह यो श्व सप्त वक्ष्य ॥ क्षीरं दधि सर्पि स्वच्छ पञ्चपत्र वेयाखलौ ॥
श्व

द्वि ३
यी
१०२

२० कुंभे तत्त्रयं गुडाव चान्नद कमुसकाः ॥ हस्त्रिं ऽद्वोषधीनाह यथालवे हिरत् ॥ मरतिकाश्चौषधादीनि तन्मंत्रेण मा
क्षिपेत्क्रमात् ॥ कुंभोपरि न्यसेत्सा त्रिकांस्य मद्धे गुतामाडं ॥ भुवने श्वरीं न्यसे तत्र इंद्राणी च पुरंदरं ॥ जा
पेद्गायत्रीमध्यमे श्री सूक्तं च जपेत्ततः ॥ स्पचाक्त्वा दक्षिणं कुंभमहालिशोको जपेत्तथा ॥ चत्वारि रुद्र सूक्ता
नि चतुर्मंत्रा त्रराणि च ॥ संस्पृश्य तु त्तरं कुंभं श्रीरुद्रं रुद्र संख्यया ॥ चान्यइ ज्ञिप्र स्तं तं चैत्रे वसंस्पृश्यं
जपेत् ॥ कुंभस्य पश्चिमे देशे शांति होमं समाचरेत् ॥ दूर्वाभिस्तिलगोधूमैः पायसेन घृतेन च ॥ तिस्
भिश्चैव दूर्वाभिरेकाचाप्याहुतिर्भवेत् ॥ अष्टोत्तर सहस्रं वा शतमष्टोत्तरं तु वा ॥ गायत्र्या वैश्रानतव्यां तु
हविरत्र चतुष्टयं ॥ ततः स्विष्टकृतं हुत्वा समुद्रादूर्मि सूक्ततः ॥ संततामाज्य धारां पूर्णाहुतिमतां
थाचरेत् ॥ अथाभिषेकं कुर्वीत प्रति कुंभस्थितोदकैः ॥ आपोहिष्ठेति नवभिः सूक्तेनैव ततः परं ॥ च
इंद्राग्न्यंग त्वचे नैव पावमानैः क्रमेण तु ॥ उभयं स्पृश्य वच्चन स्वस्ति दा विशारकया ॥ त्र्यंबकेन मंत्रेण जातवेद सएकया ॥ समुद्र ज्येष्ठा इत्यादि यं तां च त्रिभिः क्रमात् ॥ इमा आपः
स्तु चैवैनेव दे व स्यहे ति मंत्रतः ॥ मंत्रेणाघृत मीशानेह मग्ने रुद्र इस घः ॥ तमु ष्टुही ति मंत्रे

णं भुवनस्य पितरं यथा॥ यातेरुद्रेतिमंत्रेण शिवसंकल्प मंत्रतः॥ इदंत्वावृषभंच मंत्रेश्चैवाभि
षेचयेत्॥ धेनुंपयस्विनींदद्यादाचार्याय चभूषणैः॥ सदक्षिणमनड्वाहं प्रदद्यात्कुंद्र ज्ञापिने॥
महाशांतिंप्रज्ञाप्याथ ब्राह्मणान्भोजयेत्ततः॥ नारदः॥ तत्रशांतिं प्रकुर्वीत घृतं दूर्वा तिलाक्षतैः॥
प्रत्येकं अष्टशतंचैव गायत्र्याजुहुयात्ततः॥ स्वर्णशृंगयुतिलान्दद्यात्सर्व दोषापनुत्तये॥ अथ प्र
योगः॥ तत्र एकंविनायकंपूज्य गृह्याग्नेर्विधानतः॥ क्रमेणोपफलमाप्नोतीति याज्ञवल्क्येनकर्म
फलसिद्ध्यर्थं विघ्नार्थत्विन महागणपत्यादीनां वस्या कौ... चैव शौनकेनैवा ... नंगुना ... ता
तिवक्ष्यामि शौनकः॥ इस्कंपक्रम्य महा ... पुनः सरीमितिप्रकारेणोक्तेराव रूपकत्वादेकेदृष्टाका
लकर्तृकाणांचवि... षवेचनाभावतंत्रेण कर्तव्यत्वाग्रहमखपूर्वकं तंत्रेण शांतिप्रयोग उच्य
ते॥ रजोदर्शनानंतरं पंचमादिदिने चंद्रताराद्यनुकूले शुचिदेशे सुस्नातया पत्न्या सह प
तिः प्राङ्मुख उपविश्य प्राणानायम्य देशकालौ संकीर्त्य मम पत्न्याः प्रथमरजोदर्शनेनैकं दुष्टमा
सादिसूचितसकलारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखां शौनकोक्तां शांतिंकरिष्ये
इति संकल्प्य गणेशपूजनपुण्याहवाचननांदीश्राद्धानि कृत्वा शांतिदानांकुर्विति मंत्रतंत्रतः समाचार्यं

१०४ ... ०४

(च)ब्रह्माणं ऋत्विजंपहोमार्थं महत्सौषट्चतुरोवा ऋत्विजोपिव स्त्रांगंधादिनापूजयेत्॥ ततः आचार्योग्नेरैशान
देशे चतुश्चौम ही द्यौरितिभूमिंस्पृष्ट्वा तद्दक्षिणोत्तरश्च तथैव मंत्रावृत्या भूमिंस्पृष्ट्वा ओषधयः संवदंत
इति द्रोणप्रमाणव्रीहिभिर्मध्येतद्दक्षिणोत्तरतश्च तत्रैव मंत्रावृत्त्या राशित्रयं कृत्वा तैनैवक्रमेण ग
णित्रये पौर्णमकालकममर्... कुंभत्रयं श्रीं अघ्रकलशमिति मंत्रावृत्त्या स्थापयेत्॥ एवं सर्वत्र मंत्रावृ
त्त्या॥ ततः प्रसुवंदितिनवचेन्निक लशेषु दक्रं पूरयं॥ गंधद्वारामिति त्रिषुपिण्डं जुक्षिप्यया ओषधी
तिसर्वौषधीः॥ अंबष्ठाय॥ स्तामितियवान्निक्षिपेत्॥ ततोमध्यकुंभे यववीहितिलमाषकंगुश्यामा
कमुद्गान्॥ क्षिप्त्वाग्राय त्र्योदुंबरकुशदूर्वारक्तोत्पलचंपकबिल्वविष्णुक्रांतातुलसीबर्हिषशंखपुष्पी
शतावरीश्वगंधनिर्गुंडीरक्तपीतकुरंटकगुंजावचाभद्रकाख्यानि द्वात्रिंशदोषधानि सर्वाणि य
थासंभवंवाक्षिपेत्॥ ततस्त्रिषु कलशेषु कांडात्कांडादिति दूर्वा। अश्वत्थेवेति पंच पल्लवान्। गजा
श्वस्थान रथ्यावल्मीकसंगमन्हदगोष्ठस्थान मृदः स्योनापृथिवीति क्षिप्त्वा याः फलिनीरिति
पुगीफलानि सहिरण्यरत्नानीति कनककुलीशनीलपद्मरागमौक्तिकानि पंचरत्नानि। हिर

[margin] पीठीसर्षपामार्गपलाशफलसर्जीववृक्षप्रियंगुतोयधरसवीहिरजश्वत्थस्पिद्धद्रप्यचतपत्रनीलोत्पलानि॥ त ८

१०५

ण्यगर्भ इति हिरण्यं चाक्षिपेत्॥ युवा सुवासा इति स्रक्चेला वाससा च कलशं वेष्टयित्वा गंधाक्षतपुष्पमालादिभिः कलशानलंकृत्य स्थापयेत्॥ ततः कलशत्रयोपरि तेनैव क्रमेण सौवर्णं राजतं कांस्यमयं ताम्रमयं वैणवं मृन्मयं वा यथादि पूरितं पात्रत्रयं पूर्णा दर्वीति निधाय तदुपरि श्वेतं वस्त्रत्रयं न्यस्य तत्र चंदनादिनाष्टदलानि कुर्यात्॥ तत्र मध्यगायत्र्या भुवनेश्वरीमावाहयामीति यथाशक्ति सुवर्णनिर्मितां भुवनेश्वरीप्रतिमामग्न्युत्तारणपूर्वकं स्थापयेत्॥ दक्षिणकुंभोपरि वस्त्रे इंद्राणीमासु इति मंत्रैः इंद्राणीमावाहयामीति तथैव सौवर्णीमिंद्रप्रतिमां स्थाप्यानंतरं कलशोपरि इंद्र त्वा इति इंद्रमावाहयामीति सौवर्णमिंद्रप्रतिमां स्थापयेत्॥ उक्तमंत्रैरुक्तमंत्रेण देवतात्रयस्य कांडानुसमयेन षोडशोपचारपूजां कुर्यात्॥ ततो मध्यकुंभे आचार्योऽष्टसहस्रमष्टशतं वा॥ यजेत् स्वाम्श्री सूक्तं जपेत्॥ हिरण्यवर्णामिति पंचदशर्चं श्रीसूक्तम्॥ ततः एककृत्विक् दक्षिणकुंभे रुद्रसूक्तानि जपेत्॥ कद्रुद्रायेति नवर्चं इमा रुद्राय तवसे कपर्दिने इत्येकादशर्चं आ ते पितरिति पंचदशर्चं इमा रुद्राय स्थिरधन्वने इति चतस्रः आ वो राजानमिति

१०५

भुवनस्य पितरं त्र्यंबकं॥ अथान्यो ऋत्विगुत्तरकुंभे एकादशावृत्तिभिः सूक्तं जपेत्॥ शान्न इंद्राग्नी इति सूक्तं दशर्चं जपेत्॥ ततः कुंभपश्चिमदेशे स्थंडिलेऽग्निं प्रणीय तदीशान्यां वेद्यां नवग्रहादीस्तत्तन्मंत्रैरावाह्य षोडशोपचारैः संपूज्य तदीशान्यां प्राग्वत्कुंभे संस्थाप्य तत्र वरुणमावाहयेत्॥ अग्निसमीपमेव ब्रह्मोपवेशनाद्याज्यभागांते विशेषः॥ प्रणीताप्रणयने पयसः प्रणयनं। वा पात्रासादने। आज्यानंतरं ग्रहसमिधः॥ तिलाः दूर्वाः तिलमिश्रा गोधूमाः॥ तंडुलाश्चरोः पयसि श्रपणं। आज्यभागांते यजमानो दक्षिणत उपविश्य होमार्थं चरुपार्श्ववरयेद्दृत्विजो बहून्॥ आचार्यादिभिः सहेति चोक्तेऽशाचार्यस्त्विग्भिर्होमावगमात्तेषां॥ चास्वं वेन स्थाप्यो गा नैनं श्च। क्रियमाणे होमे यजमानेन प्रत्याहुति स्याग्नस्य शतार्धविंशतिसंख्याकात्तदादि मामेवागस्य प्रधानदेवताउद्दिश्य एताभ्य इदं न ममेति त्यजेत्॥ तत आचार्यः सऋत्विक् नवग्रहेभ्योऽष्टाविंशत्यष्टान्यतमसंख्याकाद्यताक्तार्कादि समिद्ब्रीहितिलाज्याहुतीः अधिप्रत्यधिदेवता विनायकादिपंचलोकपालेभ्यस्तन्मुख्यसंख्यया जुहुयात्॥ एवमिंद्राणींद्रयोः

एवमेतस्य पाः॥ समिधः॥ ... दृष्टे तदामेभ्य ... इति संप्रदायः॥ ... १

मखकृहमष भृतावर्ते ठि लौधि त्त्वक्षिति ... पाः ... इत्यादि ...

३ ततः स्विष्टकृतं हुत्वेति शेषेण नवैद्यं [illegible] णी द्रयो होमान्मानभिधानानन्नवो होमो नास्तीत्याहुः ॥ ३

प्रागुक्तमंत्राभ्यां क्रमेण हविश्चतुष्टयं प्रत्येकमष्टशतसंख्यं भुवनेश्वर्या अष्टसहस्रपक्षे तु कुर्यात् ॥ तस्याष्टशतपक्षे तु तयोरष्टाविंशतिरिति संप्रदायः ॥ अन्ये तु गायत्रैव तु होतव्यं हविश्चतुष्टयं ॥ ततः स्विष्टकृदादि प्रणीताविमोकांतं कृत्वा इंद्रादिदिक्पालेभ्यो नवग्रहेभ्यो भुवनेश्वर्यै ॥ द्राणी द्रेभ्यः ॥ क्षेत्रपालाय च सदीपान्नमाषभक्तबलीन् स्वतन्मंत्रैर्दत्वा पूर्णाहुतिं समुद्रादित्य मिरितिति चेन जुहुयात् ॥ ततो भुवनेश्वर्यादिकलशोदकं ग्रहकलशोदकं च पात्रांतरे गृहीत्वा तेन तस्य पंचपल्लवैः सकुशदूर्वैर्धृतनववस्त्रे यजमानं धृतनववस्त्रं कंचुकीं च तत्पत्नीं स्वं तु मतिं सकृद्विप्रदक्षिणमुख [illegible] प्राच्या यो भि षिंचेदेतैर्मंत्रैः ॥ ते च ॥ आपो हिष्ठेति नवभिः । एकद्विदयतइत्येकया ॥ त्रिभिः सूदेतति सप्तर्चेन ॥ उभयं भक्तवचनेत्येकया ॥ स्वस्तिदा विशाइति च ॥ त्र्यंबकमिति ॥ जातवेदसइत्येकया ॥ समुद्रज्येष्ठा इति च तसृभिः ॥ त्रायतामिति त्रिभिः ॥ देवस्य हेतिभिः ॥ तमीशानं जगतस्येकया ॥ इममग्ने रुद्र

१ इमा आप इति तिसृभिः ॥ १

स्याद्यस्तं वेशारवागतेनैकेन ॥ तं हुहीति मंत्रेण ॥ भुवनस्य पितरमिति च ॥ यातेरुद्रेति ॥ यज्ञाग्र तइति षण्मंत्रैः इंद्रावृषभ इति पंचमंत्रैः ॥ ततः सुरास्तामभिषिंचं हितिनवभिः पौराणैर्मंत्रैरभिषिंचेत् ॥ ततः कलशोदकेनान्येन चोदकेन सुस्नातो दंपती शुक्लवासो गंधमाल्यादिधृतो पविशेतां तत्र पत्नी दक्षिणतः ॥ ततो यजमानोऽग्निं संपूज्य विंतिं धृत्वाचार्यादीन् गंधपुष्पवस्त्रालंकारादिभिः यथाशक्ति पूजयित्वाचार्याय धेनुं दक्षिणां दद्यात् ॥ दक्षिणात्वेन चास्यान दक्षिणांतरं अनवस्थाप्रसंगात् ॥ ततो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वा रुद्रजापिने सदक्षिणमन्नाहं दक्षिणां दद्यात् ॥ अत्र धेनुन्यायेन नादक्षिणात्वे प्राप्ते सदक्षिणमन्नाहं प्रदद्याद्रुद्रजापिने इति प्रतिप्रसवकरणात् सदक्षिणात्वं ततो न्येभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां दद्यात् ॥ ततो ग्रहपीठदेवतानां भुवनेश्वर्यादीनां चोत्तरपूजां पंचोपचारैः कृत्वा क्षमाप्य । यांतु देवगणाः सर्वे इति विसृज्याचार्यहस्ते प्रतिपाद्याग्निं संप्र

ग्यच्छ गच्छ सुरश्रेष्ठेति विसर्जयेत्॥ ततो ब्राह्मण महाशांतिं पठेयुः॥ तद्यथा॥ आनो भद्रा
इति दश॥ स्वस्ति नो मिमीतामिति पंच शन्न इंद्राग्नी इति पंचदश॥ समस्तिष्ठिति त्रिसूक्तः॥ तच्छंयो
रित्येका॥ ततो यजमानो नवग्रहप्रीत्यर्थं त्रीन् भुवनेश्वरी द्रोणीं द प्रीतये च प्रत्येकं त्रीन्त्री
न् ब्राह्मणान्भोजनं इहासंकल्प विप्राशिषो गृहीत्वा सुहृद्युतो भुंजीतेति॥ एवं कृते सर्वा
रिष्टशांतिर्भवति॥ ततः शुभकाले गर्भाधानं कुर्यात्॥ ॥इति दुष्टरजोदर्शने शांति
र्भवति॥ ॥अथ चंद्रसूर्योपरागकाले प्रथमरजोदर्शने शांतिविशेषः उच्यते॥ शौ
नकः॥ ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते॥ व्याधिपीडा तदा स्त्रीणां माहोतक्रतु
दर्शनात्॥ इयं संजायते यस्य तस्य मृत्युर्न संशयः॥ शांतिस्तत्र प्रवक्ष्यामि पतेः रूपं स्व धिर
वर्णेन प्रकल्पयेत्॥ सूर्यग्रहे सूर्यरूपं हैमं चंद्रं तु राजतं॥ राहुरूपं प्रकुर्वीत नागेनै
वा विचक्षणः॥ नागसीसं त्रपाणां चैव रूपाणां स्थापनं तत्र कारयेत्॥ आकृष्णेना

१०८

य

प्यौस्य स्वर्भानो रिति पठन्मंत्रानुक्तः॥ नक्षत्रदेवता स्तन्मंत्रेण वा॥ संपूज्यात्र यत्र
सूर्ये समिद्भिश्चार्कसंभवैः॥ चंद्रग्रहे तु पालाशैर्दूर्वाभिराहुमेव च॥ समिद्भिर्ब्रह्मवृक्षस्य
होमयेत्जुहुयाद्बुधः॥ आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः॥ पंचगव्यैः पंचरत्नैः
पंचत्वक् पंचपल्लवैः॥ जलैः सर्वौषधिकल्कैश्च अभिषेकं समाचरेत्॥ मंत्रैर्वारुणसं
भूतैः शापो हिष्ठादिभिस्त्रिभिः॥ इमं मे गंगेपरस्त्वा हायामीति मंत्रकैः॥ यजमानस्त
तो दद्यात् तथा प्रतिकृतित्रयं॥ अथ प्रयोगः॥ उपरागस्य पौर्णमास्यामावास्यान्या
मविनाभावात्तदरितिकुरवाराद्यो दुष्टे प्रागुक्तशांत्या समुच्चीयेते निमित्तभेदा
त् अदृष्टार्थत्वाच्च प्रत्यक्षविध्यभावात्कार्यकारित्वान्नवग्रहमेनाम्नहोमे नारि
ष्टहोमानामिव नयातं निवर्हयोगात्॥ ग्रहणमात्रे हि यमेव॥ अत्र च पुनः श्र
वणाभावात् नवग्रहमखः कु तारकृत इति विवेकः॥ तत्र केवलापाः प्रयोगाप्र

वेधकाले सस्त्रीकः शुचिः प्राङ्मुख उपविश्य प्राणानायम्य देशकालौ स्मृत्वा मम सपत्न्यश्चन्द्रोपरागे प्रथमरजोदर्शने सूचितारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं शांतिं करिष्य इति संकल्प्य प्राग्वद्वेदिं कृत्वा कुर्यात्॥ नवग्रहपक्षे सनवग्रहामिति। सूर्योपरागे प्रथमे स्यादि पूर्ववत्॥ ततः आचार्यः शुचिदेशे गोमयेनोपलिप्य तत्र पंचवर्णरजोभिरष्टदलं पद्मं कृत्वा तदुपरि नवं श्वेतं वस्त्रं उदगग्रं संस्थाप्य यथाशक्ति रजतनिर्मितां चंद्रप्रतिमां आप्यायस्वेति मंत्रेण चंद्रमावाहयामीति स्थापयेत्॥ सूर्यग्रहणे तु यथाशक्ति सुवर्णनिर्मितां आकृष्णेनेति सूर्यमावाहयामीति स्थापयेत्। ततो यथाशक्ति सीसनिर्मितां राहुप्रतिमां स्वर्भानोरिति राहुमावाह्य तदुत्तरतः स्थापयेत्॥ ततो यस्मिन्नक्षत्रे ग्रहणं तन्नक्षत्रदेवताप्रतिमां यथाशक्ति सुवर्णनिर्मितां तत्तन्नाममंत्रेण ॐ अश्विनौ आवाहयामि॥ नम इति प्रणवादिनमों

१०८

१०८

तैः स्थापयेत्॥ मंत्राः स्थापस्तंबानामश्वो वाक्यानीति प्रसिद्धाः॥ नामानि तु॥ अश्विनौ॥ यमः। अग्निः प्रजापतिः। सोमः। रुद्रः। अदितिः। बृहस्पतिः सर्पाः। पितरः। भगः। अर्यमा। सविता। त्वष्टा। वायुः इन्द्राग्नी। मित्रः। निर्ऋतिः अपः। विश्वेदेवाः। विष्णुः वसवः वरुणः अजैकपात्। अहिर्बुध्न्यः। पूषेति। एवं देवता मावाह्य भिरेव मंत्रैः। कोऽनुसमयेन षोडशोपचारैः पूजयेत्॥ तत्र चंद्रग्रहे चंद्राय श्वेतवस्त्रं श्वेतमाल्यानि देयानि॥ सूर्यग्रहे तु सूर्याय रक्तवस्त्र रक्तचंदन रक्ताक्षत करवीरपुष्पाणि देयानि। राहवे धूम्राणि। नक्षत्रदेवताभ्यः श्वेतानि। ततः पश्चिमतोऽग्निं प्रतिष्ठाप्य पक्षे नवग्रहानप्यावाह्य नपूर्वं संकल्प्य ब्रह्मोपवेशनादि चरुं श्रपयित्वाज्यभागांतं। ततः पक्षे नवग्रहहोमः ततः चंद्रमुद्दिश्य पालाशसमिदाज्यचरुतिलैर्होमः। ततः राहुमुद्दिश्य संख्यया दूर्वाज्यचरुतिलैर्होमः। सूर्यग्रहे तु चंद्रस्थाने सूर्यमुद्दिश्योक्तसंख्यया

गंधा ५

नवग्रपक्षे

र्कसमिदाज्यचरुतिलैर्होमः॥ तिसृणां दूर्वाणामेकैकाहुतिः॥ समिधश्च त्रिमध्वाक्ताः का
र्याः॥ ततः स्विष्टकृतादि पूर्णाहुत्यंतं प्राग्वत्॥ ततः आचार्य एकस्मिन्कलशे जलपूर्णे पं
चगव्यानि पंचरत्नानि वटाश्वत्थोदुंबराम्रबिल्वानां त्वचः पंचपल्लवान्सर्वौषधिं कल्कं दूर्वाः
कुशांश्च निक्षिप्य सरुत्विक् दंपती पूर्ववदभिषिंचेदेतैर्मंत्रैः आपोहिष्ठेति॥ इमंमे गंगे इति तत्
त्वायामीति॥ अन्येपि समुद्रज्येष्ठा इत्यादयः॥ सुरास्त्वामित्यादयः पौराणाश्च॥ ततस्तान्
दक्षिणादानगतिमाप्रतिपादनादि पूर्ववत्॥ यदा पुर्वं शांतिसमुच्चयस्तदा कालैक्यात्के
वैक्यदागतयादिव त्रयोगाः॥ तत्र यजमानो देशकालौ संकीर्त्य मम अस्याः पत्न्याः प्रथम
म रजोदर्शनमुककुष्ट मौतिथ्यादि अमुकग्रहणसूचितेत्यादि संकल्प्यैवं कृपूर्ववद्विदध्यात्॥

१०९ ततः आचार्य्यो भुवनेश्वर्यादिपुजांतः प्रकृतव्याहृत्तराउदीच्यां चेंद्रादीन्संपुज्य यथोपत्र १०९
मं होमाभिषेकौ कुर्यादिति विशेषः॥ अन्यत्समानं॥ इति ग्रहणे रजोदर्शने शांतिः॥ रातिः

१ प्रसूतिकाले च॥

सम्राट्नामनाम्ना जो दीक्षितागराधरः तोगरस्य नाभ्य प्रयोगानुक्रमे एकादशीकांडं॥॥॥
पक्षादिषु स्थालीपाकात् २ अपरस्य चारुपूर्णमासदेवताभ्यो हुत्वा जुहोति॥ ब्रह्मणे प्रजापतये
विश्वेभ्यो द्यावापृथिवीभ्यामिति॥ पक्षादिमादयः पक्षादयस्तासु पक्षादिषु अनिपसु बाहुव
चनोपदेशात्सर्वपक्षादिषु तत्कर्म भवति॥ उक्तेन विधिना स्थालीपाकं श्रपयित्वाऽतिनैव स्था
लीपाकेन दर्शपूर्णमासपक्षादौ पौर्णमासदेवताभ्यो हुत्वा दर्शकालपक्षादौ दर्शदेवताभ्यो
उ हुत्वा ब्रह्मणे इत्येवमादिभ्यश्चतुर्भ्यो जुहोति स्थालीपाकेनैव॥ दर्शपौर्णमासयोर्विधिः॥ समा
नईति दत्ताग्ने योगरवभाष्यादाचार्येण स्फुटमस्मिन्परे गंभूतः॥ अग्नेयादेराम्नायो होमो
[illegible] विभागेन निरूप्य स्तादयो एवं हविषीति॥ एवं च समुद्रंतरेः महनुगतार्थो भवति॥
तुर कैश्चित्समस्तोपदेशात् सर्वासां होमायतीति॥ सिद्ध चरोरूपादानमाभ्युतिश्रपदत्वेस्स्यते॥
यद्यप्यत्र पक्षादिष्विति सामान्येनोक्तं तथापि सस्य संतरोक्त यागकालो ग्राह्यः॥ चतुर्दशा द्वि३
तपः॥ पर्वणोयश्च तुर्यांशो आद्याः प्रतिपदस्त्रयः॥ यागकालः स विज्ञेयः प्रातरुक्तो

तथैव प्रतिपद्यस्य नाडिकाः षट् धावि मे ज्या घ पर्वाणि निया अस्मिं ऋः कल्पनीयाः
मनीषिभिः॥ कारिकायां॥ आवर्तने यवा प्राग्यदि पर्वं समाप्यते॥ तत्र पूर्वाह्ण एव स्यात्स
द्यः कूर्ध्वं दिनात्मनं॥ आहिताग्नेर्न नियम इष्टे कूर्ध्वं विधानतः॥ ऊर्ध्वमावर्तनाच्चेत्स्याद्य
न्ते प्रातरेव हि॥ प्रतिपदि यदि गामि न्यां क्षीण यां वा संधिज्ञानोपाय माह लौगाक्षीः॥ तिथेः
परस्या घटिकाश्चया स्युर्न्यूना स्तथैवाभ्यधिका श्चतासां॥ वृद्धि क्षयोऽर्धं चतथा प्रयो
ज्यं ह्रासे च वृद्धौ प्रथमे दिने स्यादिति॥ प्रतिपद्युह्ना डिकौद्धावि नज्यां हि पर्वणि वियोज्य संधिः श्च
कल्पनियः॥ आधानानंतरं शुक्ल कृष्णा वा प्रतिपद्भवति तस्यामारंभः कार्यः तदुक्तं कारिकायां॥ आधाना
नंतरं शुक्ला कृष्णा वा प्रतिपद्भवेत्॥ तस्यां पक्षादिकं मंतव्यं॥ पूर्वाह्ण एव तादृतोः॥ हरिहर भाष्ये तु स्याय

मादिशा तरंतमेककर्म प्रचक्षते॥ पौर्णमासादिदर्शांति मेकं कर्म विदुर्बुधा इति वचनात्कृष्णपक्षे
यद्याधानं तदादर्शमिनिष्ट्वैव पौर्णमास्यां पश्चात्कर्मारंभः॥ यत्तु दर्शे दोषपरिहारार्थं॥ ऊर्ध्वं पूर्णाहुते दर्शंश्च
पौर्णमासोपि चाग्रिम॥ य आयाति स होतव्य स एवादिरिति स्मृतेरेतत्तु नवाधानविषयं तत्कारिवा
षयमिस्कंदं॥ तत्रैकेन दोषे॥ आधानस्य शुक्लपक्षे विहितत्वात्तदुत्तरं पौर्णमासस्या लीपाकका लस्य

तरं कार्यमेव॥ तता या प्रातिपद्यादितस्यामारंभ इति॥ अत्र वक्तव्यमस्ति गं ध्यागौरन भयान्तोच्यते॥
विद्यमानत्वात्पौर्णमासस्याली पाकारंभोयुक्तः॥ तच्चिंत्यं॥ अस्माकं सूत्रेदारकोत्ते शाधाधका
लिवस्या वसस्याधानस्य कालत्वुक्तः॥ तत्र यदा यदाधानकाले आधानं ततदुत्तरं प्रतिपद्यतिन स्या
मारंभो युक्तः॥ ननु उदगयनी आपूर्यमाणपक्षे पुण्याहे इत्युक्तत्वात्किं नामापि शुक्लपक्षे स्यात्तर
कृष्णायां प्रतिपद्यारंभः॥ सिद्धदवा॥ सत्यं यदि स्याव दगातः प्रासस्तत्र कालापेक्षा नावादा
पुर्यमाणादि नियमो न स्याद्तो यदेव विनागास्ते देवाधानं ततः प्रतिपदी आरंभ इति युक्तं॥ नन्व
क्ते कृष्णपक्षे वा विनागआधानं तु शुक्लपक्षे एव कार्यं॥ नेन कालेविलं बेडमाणानावादृश्यागौ
[illegible]॥ तथारंभकाले सुतकमलमासपौष मासगुरु शुक्रास्तबाल्य वार्द्धक्य ग्रहणा
दिसत्वतिन दापि प्रारंभः कार्यः॥ यानि तु नत्वारंभ निषेधकानि परागांधि मासश्च प्रथपर्वणि ते
थामलिम्लुचे पौषे नान्वारंभणमिष्यते॥ गुरुगाद्विवियो मोद्वे चेंदु सूर्यग्रहे तथेत्यादीनि संग्र
हकारादि वचनानि आलस्यादिनास्य कालो नु क्रांतस्यालीपाकादि प्रारंभविषयाणीति प्रयोग
पारिजातकारः॥ प्रयोगरत्नकारश्च॥ तथा परार्क स्यागर्भवचनेउदाज हार॥ नामकर्म

२सूत्रव्र शुक्लास्तादिनिमित्तवशाद्दर्शपौर्णमासारंभोत्कर्षस्तिति आग्रयणकाले आगते तदन्ते क्रमशः काम्यं प्रथमं
२२ इसुक्तं। अतो याज्ञिक्रमामनन्तीषः

दर्शे ष्टिं पयाकालं समाचरेत्॥ अतिपातेसतितयोः प्रशस्तेमासि पुण्य मइति॥ देवयाज्ञि
केस्तु दर्शपौर्णमासानीज्ञानइ तिसत्रव्याने शुक्लास्तादावारंभइत्याभा ति॥
तथाच त्रिकांडमंडनः॥ आधानानंतरं पौर्णमासीचेन्मलमासगा॥ तस्यामारंभणीयादीन्न
कुर्वीत कदाचनेति॥ आचारोप्येवं॥ विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय
च॥ द्रव्यांतरानुपदेशात् स्थालीपाकादेव विश्वेदेवादिभ्यो॥ बलित्रयमग्ने रुदकु
प्राक्संस्थं कुर्यात्॥ बलिहरणवाक्येच नमः॥ शब्दोंतेकार्यः॥ उक्तं चैतत्॥ कर्कोपाध्या
येर्बलिहरणेच नमस्कार इति॥ पितृभ्यः स्वधा नम इति दक्षिणेइति सूत्रव्याख्यानावसरे
च नमस्कारश्चात्र प्रदर्शित आचार्यैः सर्वे बलिहरणेषु प्रसेतव्य इत्युक्तं॥ वैश्वदेवस्यैव
वैशु यैहुस्तणा वक्ष्यी॥ विश्वेदेवा देव तादेवपितृमनुष्यादयः अस्येति वैश्वदेवः॥ सर्वार्थः प्र
१११ सहं क्रियमाणः पाकः तस्य वैश्वदेवस्य अग्नये स्वाहेत्यादिभिर्मंत्रैर्जुहोति॥ वैश्वदेव
स्येति सिद्धवदुपदेशाद्द्वितीयः स्थाली पाको वैश्वदेवः समानतंत्रः पक्षादिषु भवती १११
४ वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाग्नये स्विष्टकृते स्वाहेति॥४

ति मर्त्ययत्र भाष्ये॥ कर्कोपाध्यायेस्तु वैश्वदेवं केचित्पृथक्चरुं कुर्वंतियथा पौष्णस्य जु
होतीति पौष्णं॥ तत्सुनरयुक्तं॥ वैश्वदेवशब्देन विश्वेदेवा देवता अस्येति सर्वार्थो पाकोभि
धीयते ततो जुहोतीत्युक्तं भवति॥ यत्तु पौष्णवदिति न हि पौष्णशब्दवाच्योन्यः कश्चिच्चरुर्भ
वति॥ तेनास्य पृथक्क्रिया॥ वैश्वदेवस्तु पुनः कौ पो विद्यतएवेति॥ तथाच वक्ष्यति। वैश्वदे
स्थ५ वादन्नस्ययुं स्वाहाकारे जुहुयादित्युक्तेः अग्नौ होमः। प्राप्त एव पुनरग्नौ जुहोतीति॥ अग्निग्र
हणं बलिकर्माग्नौ माभूदिति अग्नये स्विष्टकृते स्वाहेति॥ अयोगी पदर्शनार्थं प्राजापत्यं स्वि
ष्टकृच्चेति। प्रदर्शनांतरेऽक्तोऽह प्रयोगमुपदर्शनं। अपिचस्थालीपाके नदर्शपौर्णमासदेवतादीनां
होमविधानस्यावसरविधित्सयेतत्। तत्कथं। प्राप्तहा याहूतिभ्यः स्विष्टकृदन्यत्रेदाश्याद्भव
तीतिप्रदर्शनांतरे उक्तेः तेन प्राप्तु स्वमाहा याहूतिहोमादाज्यभागांतरे काले चावसरोगम्यत इति।
श्य२ स्विष्टकृद्धोमस्त्वाप्यादेव भवति। स्विष्टकृद्ग्रहणं वक्ष्यमनास्य बलिहरणस्यैव प्राप्त्यर्थं तेनाग्नौ प्रा२
तितत्पक्षः। परिभाषतः प्राप्तत्वात् स्वाहाकारग्रहणं बलिनः सर्वप्रदानार्थोपिस्वाहाकारो

नबलिहरणेषु भवति। वासतश्च बलिं परिहरति। नमः पुरुषवयसे नमः शुक्लाय कृष्णदंता नमस्त्रियै १
य पापीनांपतये नमो ये मे प्रजोमुपलोभयंति ग्रामेवसंत उत वारण्ये तेभ्यो नमस्कृ बलिमेभ्यो ह
रामि स्वस्ति मेस्तु प्रजां मे ददत्विति। ततो वसतः शालायाः बहिःप्रदेशे नमः स्त्रियै इत्यादिमंत्रेण
इति मंत्रस्य स्थालीपाकात् स्त्रीबलिं ख्या दिग्भ्यो बलीः स्त्रीबलीः तंहंति स्त्रः वेला मे ज्ञाते नमो प्रक्षि २४
पति। एते आगंतुकत्वात् सर्वं तिष्ठवति। गार्ग्यः। स्त्रियै संतानसुखविघ्नार्तिभ्यो नमः नम
स्कारोस्तु। अतः संतानसुखेच्छवीत्रवासत्र बल्यपि कारितं इति जयरामः। तथापु
सउक्तस्वरूपायैवा। किरूताय वयसे अर्वसिच वृद्धेपि श्रायब लायच। शुक्लाय बहिःकृष्णं य ५
दंताय अलितोतरांगवयवाय। अतिमलिनमनसे स्पर्धः। अत एव पापीनां पतये मोक्षा
या दिग्भ्यः शुद्धरसः। अत्र बलित्रये पुमानिवृत्ति ते। एवं मे ममं प्रजा जासे तानमुपलोभयंति मो। शिष्य २
रूपंति। ग्रामेवसंतः। उते अपि वासमुत्ये। अरण्यवावने वापि तेभ्यो नमः। नमस्कारो ११२
११२ स्तु। एभ्यो बलिं पूजां हरामि समर्पयामि। ममनमस्कारबलिभ्यां प्रसंसे तुष्टा भवत।

तो ततो भवत्प्रसादान्मम स्वस्तिकल्याणमस्तु। भवंतश्च मे मह्यं प्रजां पुत्रादिसुखजातं प्रयच्छतु।।
शेषमद्भिः प्रप्लाव्य ततो ब्राह्मणभोजनं। बलिहरणानंतरं शेषं स्थालीस्थितमेवाद्भिः पंचसंख्य
द्भि लौकिकोदकेन प्रप्लाव्य मद्भ्यापि ला ब्राह्मणभोजने कुर्यात्।। प्रणीतोदकेन प्रप्लावनमि
ति वासुदेवादयः नेति कारिकायां।। इति श्रीमहायाज्ञिकसम्राट् वामनसूनुदीक्षित
गदाधरकृते गृह्यसूत्रभाष्ये प्रथमकांडे द्वादशी कंडिका।।१२।। छ।। अथ प्रदाय
क्रमः।। आधानानंतरं प्रथमप्रतिपदि प्रातः स्नात्वा कृतनित्यक्रियो निर्णेजनांतं वैश्वदेवं ह
त्वा मातृपूजापूर्वकमाभ्युदयिकं कुर्यात्। ततः संकल्पः। देशकालौ स्मृत्वा मम मोपात्तदुरि
तक्षय द्वारा श्री परमेश्वरप्रीत्यर्थं स्थालीपाककर्माहं करिष्ये इति।। अत्रात्मनो
ब्रह्मणः प्रणीतानां चासनचतुष्टयं कुशैः कुर्यादिति हरिहरः। तत्र प्रणीतापर्यंतं वैश ततो ब्रह्मोप
नादि आज्यभागांतं चरुसहितं कुर्यात्। तत्र विशेषतंडुलानंतरं वैश्वदेवा

पुनः अग्नीषोमाभ्यां स्वाहा इदं २

न्नस्यां सादनं प्रोक्षणं। ततः आज्यभागांते स्थालीपाकमभिधार्य॥ सकृदवदाय चरोर्होमः॥ अग्न
ये स्वाहा॥ ॐ इदमग्नये न मम॥ अग्नीषोमाभ्यां स्वाहा॥ ॐ इदमग्नीषोमाभ्यां न मम॥ ब्रह्मणे स्वा
हा॥ इदं ब्रह्मणे न मम॥ प्रजापतये स्वाहा॥ इदं प्रजापतये न मम॥ विश्वेभ्यो देवेभ्यः स्वाहा॥
इदं विश्वेभ्यो देवेभ्यः॥ द्यावापृथिवीभ्यां स्वाहा॥ इदं द्यावापृथिवीभ्यां॥ ततस्तेनैव चरुणा उत्तरतः प्रा
क्संस्थं बलीत्रयं कुर्यात्॥ विश्वेभ्यो देवेभ्यो नमः॥ ॐ इदं विश्वेभ्यो देवेभ्यो न मम॥ ऋतुग्रहेभ्यो नमः॥ इ भ्यो ५
दं ऋतुग्रहेभ्यो न मम॥ आकाशाय नमः॥ इदं आकाशाय न मम॥ आत्रयाणां बलिकर्मणां संस्थं वक्ष
सतां न कार्यमिति॥ गार्ग्यः परः॥ ततो वैश्वदेवान्नमभिधार्य तेनैव होमः॥ अग्नये स्वाहा॥ ॐ इदमग्न
ये न मम॥ ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये न मम॥ विश्वेभ्यो देवेभ्यः स्वाहा॥ इदं विश्वेभ्यो दे
वेभ्यो न मम॥ चरोर्वैश्वदेवान्नस्य होमः॥ ॐ अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्विष्टकृते न मम॥ ११३
११३ तत आज्येनानुसापान वाहुतयः॥ संस्रवप्राशनं॥ मार्जनं॥ ॥ पवित्रप्रतिपत्तिः॥ प्रणीताविमोकः॥ द
क्षिणादानं॥ ततः स्थालीपाकेन सुद्रापां भुवि स्त्वे ताबलिहरणं॥ नमः स्वे ॐ इदं स्वियेन मम॥
मो

२
नमः पुरुषेवयसे॥ ॐ इदं पुरुषेवयसे न मम॥ नमः शुक्लाय कृष्णदंताय पापीनां पतये॥ ॐ इदं
शु० ये न मम० नमो ये मे प्रजामुपलोभयंति। ग्रामे वसंत उत वारण्ये तेभ्यः॥ ॐ इदं नमो ये मे ० न मम॥ नमो रु
बलिमेभ्यो हरामि स्वस्ति मेस्तु प्रजां मे ददतु॥ इदमेभ्य इति सागरः इति ह रि हरः॥ इदं स्वियेपुरुषेवय
से वयसे शुक्लाय कृष्णदंताय पापीनां पतये ये मे प्रजामुपलोभयंति ग्रामे वसंत उत वारण्ये तेभ्यो न
ममेति गार्ग्यः परः मारिकारौ॥ शेषमद्भिः प्रप्लाव्य एक ब्राह्मणं भोजनं कुर्यात्॥ २ निर्णीतो मासः
स्थालीपाकः॥ अथ दर्शविशेषः॥ तत्र भानोर्मंतरं यामा वास्या आयाति तस्यां दर्शविज्ञः॥ दिने ह
ति यास्कः परमक्षये पिंडपितृयज्ञः कार्यः॥ तस्मिन् क्षिप्रोदयादिति नीतीक्रते॥ चंद्रक्षयाश्रयस्य
पितृव्याप्तेः प्रसक्तेः भवति तन्न पिण्परमक्षयोत्र विवक्षितः॥ सचा तेवास्त्रोक्तः इति दिन
स५ द्वयेप्यपराह्णे करणायासौ सांप्र दिने घटिकामात्र परिमाण लाभे पितरे वा पिंडपितृय भि
ज्ञानुष्ठानमुचितं॥ कस्मिन्नेव दिने पराह्णयासौ तु पूर्वस्मिन्नेव दिने पराह्णे या सिद्ध स्तत्रैवतोनुष्ठानं ६३
एवंच पिंडपितृयज्ञ कालस्य वाजसने पिच्छरवायामुपदेशाद्याग कालस्यानुपदेशात्तन्नि
प१ श्रीयप्रातर्देवेभ्यः प्रतनुत इति कर्का दाहृत शास्त्रांतरीक्रते॥ दर्शे वा गाधा पिंडपितृयज्ञ इति सूत्रो
२ पिंडपितृयज्ञदिनात्परदिने यागः कार्यः॥ पूर्वेद्युः पितृ
भ्यो २

श्री॥ यद्यपि चंद्रदर्शने यातो निषेधः स्मर्यते॥ द्वितीया विमलार्न्नी चेत्तिथिद्यापराह्णिकी॥ अन्वा
धानं च तुर्दश्यां परतः सोमदर्शनादि सा दिना तथाप्युक्तन्यायेन वाजसनेयिनां पिंडपितृयज्ञपर
दिन एव॥ चंद्रदर्शनवत्स्यपि प्रागानुष्ठानस्योक्तत्वाद्वाजसनेयिव्यतिरिक्तविषयत्वेन पूर्वाह्णम
ध्यान्ह संधिविषयत्वे वा निषेधो नेतव्यः॥ न चास्य दर्शांतत्वादनाहिताग्नेरेव न भवतीति वाच्यं॥
अनाहिताग्नेरप्येष इत्युक्तत्वात्॥ अयं च मतपितृकस्यैव भवतीति॥ अत्र मातृपार्वकमाभ्युद
यिकं कार्यमित्युक्तं गंगाधरेण॥ अत्र सर्वकर्माप सव्येन दक्षिणामुखेन कार्यं॥ अत्रैवं पदार्थ
क्रमः॥ प्राचीनावीतिकरणं॥ निविबंधनं॥ तच्च कुशतिलसंयुक्तानां वस्त्राणां सव्यभागोपरिहि
तवस्त्रेणावेष्ट्याबंधनमिति देवयाज्ञिकाः॥ नीवि परिहितमध्ये वस्त्रं हन वस्त्रप्रांतं विस्रंसेयेति वस्त्र
विर निवीं स्रंस्येति सूत्रव्याख्याने श्चा अनंत याज्ञिकाः॥ न नीवीकुरुत इति सैद्धाख्याने निविः परित ११४
११४ न धानं दाहतया च प्रदेशांतरेण व [illegible] गृहनामित्युक्तं श्री अनंतैः॥ नीवीकुरुते सोमस्य निवीरि स्वत्र च

रेप्रदेशांत

तत्कासापनवचनेन वृद्धिश्राद्धे॥ पितृणां दक्षिणापार्श्वे विपरीतांतु देवे वृद्धिति ८

निविरूपवर्त्तिकेपि कर्कादयः॥ सर्वसूत्रव्याख्यानावलोकने प्रदेशो नेरेप्रदेशांतरागृह नमेबाया
ति नीवी वासोदशांतेन स्वरक्षार्थं॥ प्रबंधयेदिसाश्चलायनः॥ वेदिश्रोणिसंनहनाव च्छादनवाक्य
शेषैर्दक्षिणतएव हीयं नीवीरिति दक्षिणे कचिदेशे तु तिले सह कुशत्रयमिति वृद्धयाज्ञवल्क्यः॥ नीवी
कार्यदशांगुष्ठिर्वाम कुशोकुशैः सहेतिस्मृत्यंतरात्॥ मैवोदक्षिणोत्तोवे सा चास्याश्च वस्थितिमदनपारि
जाते॥ ततोऽग्नेर्दक्षिणसंस्थमपसव्यपरिस्तरणं॥ अग्नेः पश्चादुत्तरतो वा दक्षिणसंस्थदक्षिणाग्राणां॥
पात्राणामेकैकेनसादनं॥ नद्विशः॥ स्रुक्॥ उलूखलं॥ मुसलं॥ शूर्पं॥ चरुस्थाली॥ उदकं॥ आज्यं॥
मेक्षणं॥ वज्रः॥ उदकपात्रसहस्ररा॥ नानिद्रिहणः॥ सूत्राणि चऊर्णा वा व स्वदशा वा। स्थालीग्र
हणपक्षे पर्वतस्थाल्यासादनं॥ न स्रुच॥ अपरेणाग्निं चरुमपूर्णस्रुचं वा गृहाति॥ ततोऽग्ने
रुत्तरत उलूखले व्रीहीनोप्यतिष्ठतोवहनं॥ शूर्पेणान्यपात्रे निष्पवनं॥ सकृत्फलीकरणं॥ अ
पूर्णस्य चरोः सारतंतुस्य श्रपणं॥ अभिघारणं॥ दक्षिणेनोद्वासनं॥ अपसव्येनाहरणं॥ ऽ॥२
ततो दक्षिणामुखएवाहुतिद्वयं जुहोति॥ अग्नये कव्यवाहनाय स्वाहा इदमग्नये कव्य

२ अमुक अवनेनिक्ष्व इति रेखामूले। पितामह अवनेनिक्ष्वेति रेखामध्ये। प्रपितामह ३०

वाह नीयन मम॥ सोमाय पितृमते स्वाहा० इदं सोमाय० अग्नौ मेक्षण प्राशनं॥ अग्निं परेत्य द

क्षिणेन [illegible] अपहता इति सूनदा [illegible]॥ स स्थाले सां कुर्यात्॥ ये रूपाणीति परस्तादुल्मुककरणं॥

मूल

तिस्रायां पितृ [illegible] ति त्रिः सोयेन जनं॥ पितः अमुक अवनेनिक्ष्वेति रेखा ते॥ मध्ये [illegible] मितिहेत्युत्स्वायां

हृत्स्वा यथावनिक्तं पिंडदानं। पितः अमुक एतत्ते अन्नमिति मेत्रेतार रेखा मूले [illegible] दानं। पितामह अमुक

प्र

इति [illegible] अन्नमिति रेखाते॥ अत्र पितरो जप॥ अपसव्येनोदङ् मुख वर्तनं॥ आतमनाति [illegible]॥ पुनः सव्येन वा

मी मदंते ति जपः॥ पूर्ववद वनेजनं पिंडानामुपरि॥ नीवीविस्रंसनं॥ नमो वः इत्यंजलिकरणं षड्भिः प्रतिम

त्रं॥ गृहान्नः इति जपः॥ सूत्रादानमन्यतमस्य प्रदानमेतद्व इति प्रति पिंडं। ऊर्जमिति पिंडानामुपरि

उदकनिषेकः॥ उत्स्वायां पिंडावधानं॥ अवघ्राणं॥ सकृदाच्छिन्नावधावमग्नौ॥ उल्मुकस्य च॥ पुत्र

कामाया त्वस्तुमसा पत्न्याः मध्यम पिंडस्य प्राशनं तस्मिन्नपक्षे अनेर्घ्राणं यजमानस्य। उदकोपस्पर्श

व११५

नं॥ ततः पार्वणश्राद्धं॥ इति क्रमः॥ ततः श्वः प्रतिपदि ब्रह्मोपवेशनादि आज्यभागांते स्था

११५

लीपाकेनाग्नये स्वाहा॥ विष्णवे स्वाहा॥ इंद्राग्नीभ्यां स्वाहेति दर्शदेवताभ्यो हुत्वा ब्रह्मणे स्वाहेत्या

८ पितामह अमुक एतत्ते अन्नमिति रेखामध्ये ८

दि ब्राह्मणतर्पणं पूर्ववत् कुर्यात्॥ सर्वत्र पूर्वे स्थालीपाकः पश्चाद्वैश्वदेवः॥ तदुक्तं कारिकायां॥

अकृते वैश्वदेवे तु स्थालीपाकाः प्रकीर्तिताः॥ अन्यत्र पितृयज्ञात्तु सोपराह्णे विधीयते॥ प्रथमायां प्र

तिपदि तु व्याप्त्यपि कालत्वे कार्य इति तत्रैवोक्तं। गार्ग्यमते तु पिंड पितृयज्ञ चरो ह्रासनां तिसृणां स

मिधामग्नौ प्रक्षेपः॥ यज्ञोपवीतिनः स्वाग्नौ होमः॥ एतत्ते अन्नमिति नाध्याहारः॥ इति विशेषः॥ अ

थ गार्ग्यमते स्थालीपाकविशेषः॥ प्रथमप्रयोगे पौर्णमास्यां मातृपूजाश्राद्धपूर्विकान्वारंभणी

या॥ ब्रह्मासनाद्याज्यभागांतं पूर्ववत्॥ ग्रहणे अग्नाविष्णुभ्यां सरस्वत्यै सरस्वते जुष्टं गृह्णा

मि। ग्रहणं प्रोक्षणे वाधिकः॥ आज्यभागांते चरुहोमः॥ अग्नाविष्णुभ्यां स्वा० सरस्वत्यै स्वा०

सरस्वते स्वा० अग्नये स्विष्टकृते। महाव्याहृत्यादि ब्राह्मण भोजनांतं॥ ततो वैश्वदेवः॥ ततः श्वो

भूते ब्रह्मोपवेशनाद्याज्यभागांते विशेषः॥ चरुस्थालीद्वयं॥ ग्रहणेऽग्नये अग्नीषोमाभ्यामग्नी

षोमाभ्यां ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां जुष्टं अग्नये प्रजापतये विश्वे

त्रि

भ्यो देवेभ्यो जुहुयाद्द्वितीयचरुग्रहणं॥ ~~ओं [illegible]~~
